
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ अथ किरात प्रथमसर्गो लिख्यते ॥ राम ॥

श्रीगणेशाय नमः ॥ श्रिय इति ॥ आदितः श्रीशब्दप्रयोगात् वर्णगणादिशुद्धिर्नोक्ता यात्रोपयुज्यते ॥ तदु
क्तं ॥ देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ॥ ते सर्वे नैव निंद्याः स्युर्लिपितो गणतोपि चेति ॥ कु
रूणां निवासाः कुरवो जनपदाः तेषां निवासः तस्य निवास इत्यण्प्रत्ययः ॥ जनपदे लुक् ॥ तेषा
श्रे मधिपस्य दुर्योधनस्य संबंधिनीं षष्ठ्या विवक्षितेति ॥ श्रियो राज्यलक्ष्म्याः कर्तृकर्मणोः कृती
ति कर्मणि षष्ठी ॥ पाल्यते अनयेति पालिनी तां प्रेष्ठापिकामित्यर्थः ॥ प्रजानुरागमूलत्वात् ति
संपद इति भावः ॥ करणाधिकरणयोश्चेति करणे ल्युट् ॥ टिड्ढाणञित्यादिना ङीप् ॥ प्रजासु
जनेषु विषयेषु प्रजा स्यात्संततौ जने इत्यमरः ॥ वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरं अयुंक्त
स्ति नियुक्तवान् ॥ वर्णो प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी ॥ तदुक्तं ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं
गुह्यभाषणं ॥ संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषि
णः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं ॥ वर्णात् एतदष्टमैथुनाभावप्रशस्तिः ॥ वर्णी च ब्रह्म

किरातः ॥ भिल्लः किरातशबरपुलिंदा म्लेच्छजातय इत्यमरः ॥
चारिणीति निप्रत्ययः ॥ तस्य लिंगं चिन्हमस्यास्तीति वर्णिलिंगी ॥ ब्रह्मचारिवेषवानित्यर्थः ॥ नियु
क्तः वने चरतीति वनेचरः ॥ चरेष्ट इति टप्रत्ययः ॥ तत्पुरुषे कृति बहुलमित्यलुक् ॥ विदितं वेदन
मस्यास्तीति विदितः ॥ परवृत्तांतज्ञानवानित्यर्थः ॥ आर्शआदिभ्योच् प्रत्ययः ॥ अथवा कर्तरि
कर्मधर्मोपचाराद्वृद्धिः ॥ ततश्च ज्ञातो विदित इत्युच्यते ॥ उभयत्रापि पीता गावो भुक्ता ब्राह्मणा
विभक्ता भ्रातर इत्यादिवत्साधुत्वं न तु कर्तरि क्तः सकर्मकेभ्यः तस्य विधानाभावात् अत एव भा
ष्यकारः अकारो मत्वर्थीयः विभक्तिमेषामस्तीति विभक्ताः ॥ ते पीतमेषामस्तीति सर्वत्र ॥ अथ
वा उत्तरपदलोपोत्र द्रष्टव्यः ॥ विभक्तधना विभक्ताः भ्रातर इत्यपि पीतोदकाः ॥ पीता इति अत्र लो
यशब्दार्थमोहे केयष्ठः ॥ गम्यमानार्थस्याप्रयोगः प्रयोग एव च लोपोभिमतः ॥ विभक्ता भ्रातर
इत्यत्र धनस्य यद्विभक्तत्वं पीतोदका गाव इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यत इति
तद्वदत्रापि वृत्तिगतविदितत्वं वेत्तरि वनेचरे उपचर्यते ॥ एतेन वचनायपीतेप्रत्तिबाहुवसा ॥ या

पातुं न प्रथमं श्ववस्य तिजलं युष्मास्वपितेष्विस्येवमादयोरव्याता:॥ अथवा विदितो विदितिसर्गटीका

वाक्सकर्मकादप्य विवक्षिते कर्मणि कर्तरि क्तः यथा आशितः॥ कर्तरे त्यादोय थाहुः धातो
रर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसिद्धेरविवक्षातः॥ कर्मिणो कर्मिकाद् क्रियेते॥ व
नेचरातीति वनेचरः किरातश्चरिति तत्पुरुषे कृति बहुलमिति कैलुग्॥ द्वइतेयस्मात्तद् द्वैतं द्वै
तमेव द्वैतं तच्च वनं तस्मिन् द्वैतारव्यतपोवने युधिरणे स्थिरं युधिष्ठिरं धर्मराजं हलंता
त्सप्तम्याः संज्ञायामित्यलुक्॥ गवियुधिभ्यां स्थिरइति षत्वं समाययो संप्रतिश्रो अत्र व
नेचरइति द्वयोस्वरव्यंजनसमुदाययोरकादेवच सकृदनुप्रासो नामालंकारः॥ अस्मि
न्सर्गे वंशस्थवृत्तं तल्लक्षणं॥ जतो तु वंशस्थमुदीरितं जराविति ॥१॥ कृतप्रणाम
णामस्पति॥ तस्य तत्कालोचितसमाद् र्शयन्दूतस्य तद्गुण सपत्नत्वं च दर्शयन्नाह॥ कृतप्र
णामस्य तत्कालोचितात्कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योधनेन॥ रिपौ वैरिसप
त्नारिद्विषद्द्वेषणदुर्हृदः इत्यमरः॥ जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय

क्रियाग्रहणात्संप्रदानत्वं निवेदयिष्यतो ज्ञापयिष्यतः॥ स्लृदृः शेट्ठेति सन्प्रत्ययः॥ तस्य च वनेचरस्य
मनो न विव्यथे॥ कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचाले त्यर्थः॥ व्यथ भयचल
नयोरिति धातोर्लिट्॥ उक्तमर्थमर्थान्तरन्यासेन समर्थयते॥ नहीति॥ हियस्मात् हितमिच्छं

श्रियः कुरूणामधिपस्य पालिनीं प्रजासु वृत्तिं यमयुंक्त वेदितुं॥ स वर्णिलिंगी विदि
तः समाययो युधिष्ठिरं द्वैतवने वनेचरः १ कृतप्रणामस्य महीं महीभुजे जितां सपत्ने
न निवेदयिष्यतः॥ न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छंति मृषा हितैषिणः॥ २॥

तीति हितैषिणः स्वामिहितार्थिनः पुरुषाः मृषामि[illegible]भूतं प्रियं प्रवक्तुं नेच्छंति॥ अन्यथा
कार्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः॥ अमोरस्य भमां घ मम्मृषाभाषितं मेंदुहंके
त्वं चेति॥ चारगुणा इति नीतिव्याख्यामृते २

किरातप्रथ० ३ ति

ननुतथापिप्रियार्हे राज्ञि कुतो निष्ठुरोक्तिर्नयुक्तेत्याशंक्य स्वाम्यनुज्ञया न दुष्यतीत्याह ॥ द्विषा सर्गटीका
मिति ॥ रहस्येकांते सः वनेचरः द्विषां शत्रूणां कर्मणि षष्ठी ॥ विघाताय विहंतुमित्यर्थः ॥ तुम
र्थाच्च भाववचनादिति चतुर्थी भाववचनाश्चेति तुमर्थे घञ् प्रत्ययः ॥ अत्र तादर्थ्ये नौ निर्दोष
त्वयापि प्रयोगवैचित्र्यविशेषस्यापि अलंकारत्वादेवं व्याचक्षते ॥ विधातुं व्यापारं कर्तुं

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ॥ स सौष्ठवौदा
र्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥ ३ ॥

इच्छतः समानकर्तृकेषु तुमुन् ॥ द्विषो विहंतुमुद्युक्तस्येत्यर्थः ॥ अत एव भूभृतो युधिष्ठिर
स्यानुज्ञामधिगम्य सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यं सुष्ठुशब्दाद्व्ययादुद्गात्रादित्यादण्प्र
त्ययः ॥ उदारस्य भावः औदार्यं अर्थसंपत्तिः तयोः द्वंद्वः सौष्ठवौदार्ये अत्रौदार्यशब्दस्याजा
द्यदंतत्वेपि लक्षणहेत्वोः क्रियाया इत्यत्र अल्पस्वरस्यापि हेतुशब्दस्य पूर्वनिपातमकुर्वता स

३ पि ३

त्रकृतैव पूर्वनिपातस्यानित्यत्वज्ञापनान्न पूर्वनिपातः ॥ उक्तं च काशिकायां ॥ अयमेव लक्षणहेत्वोरि
तिनिर्देशः पूर्वनिपातव्यभिचारचिन्हमिति ते एव विशेषः ॥ तयोर्वा विशेषः तेन शालते शोभत इति
सौष्ठवौदार्यविशेषशालिनी तां ताच्छील्ये णिनि विनिश्चितार्थां विशेषतः प्रमाणतो निश्चितो नि
र्णीतोर्थो यस्यास्तां इति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवानुवाचेत्यर्थः ३ प्रथमं तावद्दन्त्रि...
निर्वेदकमात्मानं प्रत्यक्षोभं याचते ॥ क्रियास्विति ॥ हे नृप क्रियासु कृत्यवस्तुषु युक्तैः नियुक्तैरनुजीवि

क्रियासु युक्तैर्नृप चारचक्षुषो न वंचनीयाः प्रभवोनुजीविभिः ॥ अतोर्हसि
क्षंतुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

भिः भृत्यैश्चारादिभिरित्यर्थः ॥ चरंतीति चराः तस्य चाराः पचाद्यच् अंजतात्स्वार्थे प्रज्ञादित्वादण्प्रत्य
यः ॥ तएव चक्षूंषि येषां ते चारचक्षुषः ॥ गावः पश्यंति गंधेन वेदैः पश्यंति वै द्विजाः ॥ चारैः पश्यंति रा
जानश्चक्षुर्भ्यामितरे जनाः १ स्वपरमंडलकार्याकार्यविलोकने चाराश्चक्षूंषि क्षितिपतीनामिति नी
ति वाक्यामृते ॥ प्रभवः निग्रहानुग्रहसमर्थाः स्वामिनो न वंचनीयाः न प्रतारणीयाः सत्यमेव
वक्तव्या इत्यर्थः ॥ चारापचारे चक्षुरपचारवत्प्राज्ञां पदे पदे [illegible] निपात इति भावः ॥ अतोप्रतार्यत्वा

साधु अप्रियं साधु प्रियं वा मदुक्तमिति शिक्षः क्षुतुं सोढुं अर्हसि कुतः हितं पथ्यं मनोहारि प्रियं च व
चो दुर्लभं अतो मे [illegible] पि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ४ तर्हि तत्स्त्रीभावरव वरमित्याशं
क्याह ॥ स इति ॥ यः सखा अधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति ब्रूवीशासि इत्यादिना शा
से दुहादिपाठात् द्विकर्मकत्वं ॥ स हितानुपदेष्टा कुत्सितः सखा किंसखा दुर्मन्त्रीत्यर्थः ॥ किमः क्षेपस्तीति
समासान्तप्रतिषेधः ॥ तथा यः प्रभुः निग्रहानुग्रहसमर्थः स्वामी हितात् आप्तजनात् हितोदृष्टः
सकाशात् आख्यातोपयोग इत्यपादानत्वात् पंचमी ॥ न संश्रृणुते न शृणोति समो गम्य्छि । सो
दिनां सं पूर्वाच्छ्रुणोतेरकर्मकादात्मनेपदं ॥ अकर्मकत्वं च विवक्षितं स हितं श्रोता प्रभुः किंप्रभुः
कुत्सितः स्वामीत्यर्थः समासः ॥ सर्वथा सचिवेन वक्तव्यं स्वामिना श्रोतव्यं एवं सति राजमंत्रिणो
रेकमत्यं स्यादित्यर्थः ॥ ऐकमत्यस्य फलमाह ॥ सदेति ॥ हि यस्मात् नृपेषु स्वामिषु अमा सह भ
वाः अमात्याः तेषु च अमात्येषु ॥ अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिं अनुरा
रागं कुर्वते कुर्वन्ति ॥ न जातु जहतीत्यर्थः ॥ अतो मया वक्तव्यं त्वया श्रोतव्यं इति भावः ॥ अथैवं राजमं

त्रिणोर्हितानुपदेशतदश्रवणनिंदा सामर्थ्यात्कार्येण कारणसमर्थनरूपो अर्थान्तरन्यासोलंका
रः ॥ तदुक्तं ॥ सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यास इ
ति ५ संप्रति स्वाहंकारं परिहरन्ति ॥ निसर्गदुर्बोधमिति ॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहं इ षड्गुरसो

स किंसखा साधु न शास्ति योधिपं हितान्न यः संश्रृणुते स किंप्रभुः ॥ सदानुकूलेषु हि
कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः ॥ ५ ॥ निसर्गदुर्बोधमबोधविक्लवाः क्व भू
पतीनां चरितं क्व जंतवः ॥ तवानुभावोयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषां ६

दिन स्वाल्पप्रत्ययः ॥ भूपतीनां चरितं क्व अबोधविक्लवाः अज्ञानोपहताः जंतवः मादृशाः पा
मरजना इत्यर्थः ॥ क्व ॥ नोभयमेकत्र संघटत इत्यर्थः ॥ तथापि निगूढतत्त्वं संवृतयाथात्म्यं विद्वि
षां नयवर्त्म षाड्गुण्यसंप्रयोगो मया अवेदि ज्ञातमिति यत् ॥ विदेः कर्मणि लुङ् ॥ उक्तं च ॥ सं

धिर्विग्रहयानौ संस्थानाप्यासनमेव च ॥ द्वैधीभावश्च विज्ञेया षड्गुणा नीतिवर्णने ॥ संधिर्मै
त्रीकर्णे विग्रहः पीडनं यानं परं प्रतिगमनं संस्थापरदेहापणे आसनं उपेक्षणं ॥ एकेन

किरातप्रथ० ५

स

सार्द्धं संधार्यं अपरं प्रतियानं द्वैधीभावः॥ अयं इदं वेद न मित्यर्थः॥ विधेयप्राधान्यात्पुल्लिंगं निर्देशः कृतः
तदनुभावः॥ तव सामर्थ्ये अनुगतो भावो नु भावः इति घयं ते न प्रादि समासः॥ न न्रूप सर्ग
स्व अप्रत्ययः॥ श्रीणीभुवोनुपसर्गे इति अनुपसर्गात्॥ भवतेर्धातोर्घञ् विधानात्॥ अतएव नूकौ
शिकायां॥ कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादि समासः इति चोद्य परिहारो॥ सम्यक्‌ ज्ञात्वे
व प्रविज्ञापयामीनतु कथां कर्णकठोरं प्रकटयामीत्याशयः॥ ६॥ संप्रतियद्वक्तव्यं तदाह॥ विशंक

विशंकमानो भवतः पराभवं नृपासनस्थोपि वनाधिवाशिनः॥ दुरोदरछद्म
जितां समीहते नयेन जेतुं जगतीं सुयोधनः॥ ७॥

मान इति॥ सुखेन युध्यत इति सुयोधनः भाषायां शासियुधिदृशि धृषि मृषिभ्यो युज्वक्तव्य
॥ नृपासनस्थः॥ सिंहासनस्थोपि वनमधिवसतीति वनाधिवाशिनः॥ वनस्थात् राज्यभ्र
ष्टात् अपीत्यर्थः भवतः त्वत्तः पराभवं पराजयं विशंकमानः उत्प्रेक्षमाणः सन् दुष्टमुदरं
यस्येति दुरोदरं द्यूतं पृषोदरादित्वात् साधुः॥ दुरोदुरो द्यूतकारे पणे द्यूते दुरोदर मित्यमरः॥ तत्र एव
छद्मतामिषेण जितां लब्धां दुर्नयार्जितामित्यर्थः॥ जगतीं महीं॥ जगती विष्टपे मत्यां वास्तुछंदोविशे ५

षयोरिति वैजयंती॥ नयेन नीत्या जेतुं वशी कर्तुं समीहते प्रयतते तत्तु दुरासत इत्यर्थः॥ बलवत्स्वामि कमवि
गृह्यगमनं च यथनं भुंजानस्य कुतो मनसः समाधिरिति भावः॥ अत्र दुरोदरछद्मजितां इति विशेषण
द्वारेण पदार्थस्य चतुर्थपादार्थं प्रतिहेतुत्वेनोपन्यासाद्धितीयकाव्यलिंगमलंकारः॥ तदुक्तं॥ हे
तोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति॥ ७॥ नयेन जेतुं जगतीं समीहत इत्युक्तं तत्प्रकारमाह॥
तथेति॥ तथापि॥ साशंकोपि जितलोभक्रोधं चकैः इति याचत्‌ सदुर्योधनभवज्जिगीषयाशुणो

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा शयः॥ समुन्नयन्भूतिमना
र्यसंगमाद्वरं विरोधोपि समं महात्मभिः॥ ८॥

भवंतमाक्रमितुं इछयेत्यर्थः॥ हेतावितितृतीया॥ गुणसंपदा दानदाक्षिण्यादिगुणागरिम्णा
करणेन शुभ्रं यशस्तनोति॥ स खलु गुणलोभनीयांत्स्वं संपद्‌माला सात्कर्तुं त्वत्तोपि गुणवत्ता
मात्मनः प्रकटयतीत्यर्थः॥ नन्वेवं गुणिनः सतोपि सज्जनविरोधो महांस्तस्य दोष इत्याशं
क्यसोपितत्संसर्गलाभेनोच समागमाद्वरमुत्कर्षावहत्वादित्याह समुन्नयन्निति॥ तथा

टीका० ५

किरातप्र॰ टी॰ ६

हि॥ भूतिं समुन्नयन् उत्कर्षमापादयन् शत्रुशासनेन चाविसादिनालेढैः॥ शत्रुप्रसङ्गः॥ पुनः ल
दग्रहणसामर्थ्यात् प्रथमा सामानाधिकरण्ये॥ महात्मभिः समं सहेत्यर्थः॥ साकं सार्द्धं स
मं सहेत्यमरः॥ अनार्यसंगमात् दुर्जनसंसर्गात् पंचमीविभक्त्याविति पंचमी॥ विरोधोपि वरं
मनाक्प्रियः॥ देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये इत्यमरः॥ अत्र मैत्र्यपेक्षया मनाक्प्रि
यत्वं विरोधस्य भूतिं समुन्नयन् इत्यस्य पूर्ववाक्यान्वये समासस्य वाक्यार्थस्य पुनरादा
नात् समाप्तपुनरात्ताख्यदोषः॥ पत्तिः तदुक्तं काव्यप्रकाशे समाप्तपुनरादानात् समाप्त
पुनरात्तकमिति॥ न च वाक्यांतरमेतत्॥ येनोक्तदोषपरिहारः स्यादर्थांतरन्यासोलंकारः
स च भूतिं समुन्नयन्नित्यस्य पदार्थस्य विशेषणद्वारा विरोधवरत्वं प्रति हेतुत्वाभिधानरू
पकाव्यलिंगानुप्राणित इति ६ ननु कार्तर्यै केवलानीति रीत्याशंक्य नीतियुक्तं पौरुषम
स्येत्याह॥ कृतारिषड्वर्गजयेनेति॥ षण्णां वर्गः षड्वर्गः अशिष्टमंत्रः शत्रूणां कामक्रोधमदलोभम
दीनां षड्वर्गो रिपुषड्वर्गः॥ कामः क्रोधस्तथा लोभो मदो मात्सर्यमेव च॥ मोहश्चेत्यरिषड्वर्गः॥

सर्गः टीका ६

शिवगीतायां उक्तं॥ शिवभागवत् वत्समासः॥ तस्य जयः कृतो येन तेन तथोक्तेन विनीतेनेत्यर्थः
विनीताधिकारं प्रजापालनमिति भावः॥ अगम्यरूपां दुराकलनीयां मनोरिमां मानवीं मनूपदि
ष्टमार्गां सदाचारलक्षणामित्यर्थः॥ पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रतिपत्तुमिच्छुना प्रपद्य
तेः सन्नंतादुप्रत्ययः सनि मीमेत्यादिना इसादेशः अत्र लोपोभ्यासस्येत्यभ्यासलोपः॥ अस्ता

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना॥ विभज्य नक्तंदिव
मस्ततंद्रिणा वितन्यते तेन नयेन पौरुषं॥ ९॥

तंद्रिरालस्यं यस्य तेनास्ततंद्रिणा अनलसेनेत्यर्थः॥ तंद्रिः सौत्रो धातुः तस्मात्क्रत्र्यादयश्चेत्यौ
णादिक इकारप्रत्ययः॥ कृदिकारादक्तिनो वा ङीपूर्वकव्यः तंद्री घटी निशांतं इति आबंतेयी
ति क्षिरस्वामिः॥ तथा रामायणप्रयोगः स निस्तंद्रिरमित्रश्च स्वदोषपरदोषवदिति॥ तेन
उद्योगेन न पुरुषस्य कर्म पौरुषं पुरुषकारः॥ उद्योग इति यावत् युवादित्वादण्प्रत्ययः॥

पौरुषं पुरुषस्य भावे कर्मणि तेजसीति विश्वः॥ नक्तं च दिवा च नक्तंदिवं अहोरात्रयोरित्यर्थः अचतुरेत्यादिना सप्तम्यर्थे वृत्तस्याख्ययोर्द्वंद्वे निपातसमासांतः विभज्य अस्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते॥९॥ संप्रति भृत्याद्यनुरागमाह॥ सखीनिति॥ गतस्मयो निरहंकारः॥ स्मयो गर्वेऽद्भुते योगे गात व्येगायनेपि चेति विश्वः॥ अत एव

सखीनिव प्रीतियुजोनुजीविनः समानमानान्सुहृदश्च बंधुभिः॥ स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बंधुतां॥१०॥

स दुर्योधनः संततं अनारतं साधु सम्यग् अकपटमित्यर्थः॥ अनुजीविनो भृत्यान् प्रीतियुजः स्निग्धान् सखीन् मित्राणीव दर्शयते लोकस्येति शेषः हेतुमति चेति णिच् णिचश्चेत्यात्मनेपदं॥ शोभनं हृदयं येषां तान् सुहृदो मित्राणि सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः॥ बंधुभिः भ्रात्रादिभिः समानमानान् तुल्यसत्कारान् दर्शयते॥ बंधूनां समूहो बंधुतां

तां ग्रामजनबंधुसहायेभ्यस्तल् कृतमाधिपत्यं स्वाम्यं यस्याः तां कृताधिपत्यामिव दर्शयते बंधून् अधिपतीनिव दर्शयतीत्यर्थः॥ यथा भृत्यादिषु सख्यादिरिव बुद्धिर्जायते लोकस्य तथा तान् संभावयतीत्यर्थः॥ अनुजीव्यादीनां कर्तुरीप्सिततमं कर्मेति कर्मत्वं पूर्वस्मिन्नेव पद्यान्वयवाक्यार्थमित्थं वर्णयंति॥ स राजा अनुजीव्यादीन् सख्यादीनिव दर्शयते॥ सख्यादय इव लोकं पश्यंति॥ सख्यादिभावेन पश्यतस्तान् तथा दर्शयतीति॥ स्वयमेव छंदानुवर्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः॥ अर्थात्तस्येप्सिततमकर्मत्वं॥ अणि कर्तुरनुजीव्यादेरभिवादिदृशोरात्मनेपदेनुपसंख्यानमिति पाक्षिकं कर्मत्वं॥ एवं चात्राण्यंतकर्मणो राज्ञो ण्यंते कर्तृत्वेप्यारोह यत्तु हस्ती स्वयमेवेत्यादिवदश्रूयमाणकर्मांतरत्वाभावान्न णेरणाविति सूत्रस्य विषयत्वमप्यस्योक्तं यथाह॥ पश्यंति॥ भृत्या राजानं दर्शयंते भृत्यान् राजा दर्शयते भृत्यैः राजा इत्यात्मनेपदं सिद्धं भवतीति अत्र कैयटः॥ ननु कर्मांतरसद्भावादत्रानेनात्मनेपदं न भाव्यं उच्यते॥ अस्माद्वोदाहरणात् भाष्यकारस्यायमेवाभिप्राय उच्यते अण्यंतावस्थायां येषां कर्तृ

किरात प्रथम

६

नात्साधुः

कर्मणा तद्व्यतिरिक्तकर्मीतरस्संज्ञावात्मनेपदं न भवति॥ यथा रुक्षमारोहयंति मनुष्यानितीत्थं सर्गटीका
रण्यं तावत्स्थायां कर्तृणां करणानां रियो कर्मत्वं इति भवस्यात्मनेपदमिति॥१०॥ नन्वायैस्त्रि
वर्गोऽत्र माध्यतीत्याह॥ असक्तमिति॥ यथायथं यथास्वयं विभज्य असंकीर्णरूपं विविच्ये
त्यर्थः॥ यथास्वयं यथायथमिति निपातौ द्विर्भावो नपुंसकत्वं च रूस्यान पुंसके प्रातिपदिक

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया॥ गुणानुरागादि
वसख्यमीयिवान्न बाधतेस्य त्रिगणः परस्परं ११

स्येति रूस्यत्वं॥ पक्षेपातः पक्षपातः आसक्तिविशेषः स समस्तुल्यो यस्यां तया समपक्षपात
या भक्त्यानुरागविशेषेण पूज्येषु अनुरागो भक्तिरित्युपदेशः॥ पूज्यश्चायं त्रिवर्गः अस
क्तमनासक्तमव्यसनितयेति यावत् आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रयाणां
धर्मार्थकामानां गणस्त्रिवर्गः॥ त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः॥ गु

णानुरागात्तदीयगुणेष्वनुरागात् गुणवदाश्रयलोभादित्यर्थः॥ सख्यं मैत्रीं सख्युर्य इति यप्प्र
त्ययः॥ ईयिवानिव उपगतवानिवेत्युत्प्रेक्षा॥ उपेयिवाननाश्वाननूचानश्चेति क्वसुप्र
त्ययांतो निपातः॥ नात्रोपसर्गस्तंत्रमिति कासिकायां॥ परस्परं न बाधते॥ समवर्ति
त्वादस्य धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त इत्यर्थः॥ उक्तं च॥ धर्मार्थकामाः सममेव
सेव्या यो ह्येकसक्तः॥ स जनो जघन्य इति॥११॥ अथ श्लोकत्रयेणोपायकौशल्यं दर्शयन्ना
दौ सामदाने दर्शयति॥ निरत्ययमिति॥ तस्य दुर्योधनस्य निरत्ययं निर्बाधकं मायिकमि
त्यर्थः॥ अन्यथा उन्नतानां जनानां दुर्ग्रहत्वादिति भावः॥ साम सांत्ववचनं साम प्रेमप
रं वा क्वचिद्दानं चार्थविसर्जनं भेदः परजनाकर्षणं निग्रहः परिपीडनमिति॥ साम सांत्वमुभे
समे इत्यमरः॥ दानवर्जितं धनत्यागरहितं न प्रवर्तते॥ तथा युक्तं प्रवर्तते इत्यर्थः॥ अ
न्यथा लुब्धाद्याचकजनस्य शुष्कैः प्रियैर्वचनैर्दुष्करत्वादिति भावः॥ उक्तं च॥ लुब्धमर्थेन गृह्णी
यात् स्तब्धमंजलिकर्मणा॥ मूर्खं छंदानुरोधेन तत्त्वार्थेन च पंडितमिति॥ तथा भूरि अर्थ

दानं

न २

गृह्णी २

तं न तु कदाचित्स्वस्य मित्यर्थः॥ प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु इत्यमरः॥ दानं धनत्यागः स सग टीका
दिसादरार्थे व्ययं॥ आदरानादरयोः सदसती इति नियातसंज्ञास्मरणात्॥ तस्य क्रिया तां स
त्क्रियां विरहय्य विहाय स्यपि लघुपूर्वी दिसा मदेशः॥ न प्रवर्तते॥ अनादरेदाने वेफल्यादिति भा
व्यये वः॥ न चैवं सर्वत्रैहीनाविवेकित्वं कोशहानिसौंदिसाहसस्याभावेति॥ विशेषशालिनी अतिश

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियां॥ प्रवर्तते तस्य
विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया॥१२॥

ययोगिनी सत्क्रिया आदरक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्तते॥ एषचिंवि
नेसादिनात्तीया॥ गुणेष्वादरो भूरिदानं चेति नोक्तदोषावकाश इत्यर्थः॥ अत्रोत्तरो
त्तरस्य पूर्वं पूर्वं विशेषणतया स्थापनादेकावल्यलंकारः॥ तदुक्तं काव्यप्रकाशे॥ स्थाप्य
ते चोह्यते वा पि यथा पूर्वं परं परं॥ विशेषणतया वस्तु यत्र सैकावली द्विधेति॥ तथा चोदाह
रणं॥ न तज्जलं यन्न सुचारु पंकजं न पंकजं तद्यदलीनषट्पदं॥ न षट्पदोसौ कलगुंजितो न यो गुंजि

अथ दंडप्रकारमाह॥ वसूनीति॥ वशी सदुर्योधनः वसूनि धनानि वांछिन्नु धनलोभादित्यर्थः
न निहंती ति शेषः॥ तथा मन्युना कोपेन च न निहंती ति शेषः॥ मन्युर्दैन्ये क्रतौ क्रुधी त्यमरः
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति स्मरणात् इत्यर्थः॥ किंतु निवृत्तकारणो नि
वृत्तलोभादिनिमित्तः सन् स्वधर्म इत्येवः॥ स्वस्य राज्ञः सतो मम मायं धर्मो निग्रहं कर्तव्य मि कर्म

वसूनि वांछन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः॥ गुरूपदिष्टेन रि
पौ सुतेपि वा निहंति दंडेन स धर्मविप्लवं॥१३॥

त्यस्मादेवं हेतोरित्यर्थः॥ अदंड्या दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्॥ अयशो मह
दाप्नोति नरकं चाधिगच्छतीति स्मरणात्॥ गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन अर्थिप्रत्यर्थि
नोः पृच्छतीति प्राट् तयोर्वचनं विरुद्धमविरुद्धं वा सभ्यैः सह विविनक्तीति विवाकः॥ प्राट् चा
सौ विवाकश्चेति प्राड्विवाकः॥ उक्तं च॥ विवादानुगतं पृष्ट्वा ससभ्यस्तत्प्रयत्नतः॥ विचारयति

येनासौ प्राड्विवाकैस्तैस्मृतः॥ अर्थ्यत इत्यर्थः सोऽस्यास्तीति अर्थी तत्प्रतिपक्षः प्रत्यर्थी॥ धर्म
शास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः समाहितमतिः पश्यन्व्यवहारान् अनुक्रमादिति नार
दस्मरणात्॥ दंडेन दमयेन् स्वधर्मेण शिक्षयेत्यर्थः॥ रिपोः सुतेपि वा स्थितमिति शे
षः॥ एतेनास्य समदर्शित्वमुक्तं॥ धर्मस्य विप्लवं ~~धर्मविप्लवं~~ धर्मव्यतिक्रम ~~धर्म~~ मितिया
वत्॥ निरुंतीति निवारयति॥ दुष्ट एवास्य शत्रुः शिष्ट एवास्य बंधुः न तु संबंधनिबंधनः पक्षपातोस्तीत्यर्थः॥ २३॥ संप्रति भेदकौशल्यं दर्शयति॥ विधायेति॥ शंका संजाता यस्य शंकि
तो विश्वस्तः संनृपरितः सर्वत्र स्वपरमंडले परेभ्य इतरे परेतरे तान्परेतरानात्मीयानवं
चकानितियावत् यत्नाद्यपरानितरयंति भेदेनात्मसात्कुर्वंतीति परेतरः तान् रंजयंतात्कर्म तत्करोतीति
ण्यंण प्रत्ययः॥ रक्षंतीति रक्षास्तान् नरक्षीन् मंत्रगुप्तिसमर्थानित्यर्थः॥ नं द्विग्रहीत्यादि
नापचाद्यच् विधाय कृत्यानि युज्येत्यर्थः॥ अशंकितरूपाकारमुपैति स्वयं मविश्वस्तोपि

विश्वस्तवदेव व्यवहरं नृपरमुखेनैव परान्भिनतीत्यर्थः॥ न च तान्नरक्षाननुपेक्षते येन ते पि विकु
र्वीरन्नित्याह॥ क्रियेति॥ क्रियापवर्गेषु कर्मसमाप्तिषु अनुजीविसात्कृताः भृत्याधीना धि
कृताः अपुनराहत्तितया दत्ता इत्यर्थः॥ दयेत्याचेति सातिप्रत्ययः॥ संपदोस्य राज्ञः कृतज्ञ
तां उपकारज्ञत्वं वदंती प्रीतिदानेनैवास्य कृतज्ञत्वं प्रकाश्यते न तु वाङ्मात्रेणेत्यर्थः॥ कृतज्ञ

॥ विधाय रक्षान्नृपरितः परेतरान्। शंकिताकारमुपैतिशंकितः॥ क्रियापवर्गेष्वनुजीविसा जी
त्कृताः कृतज्ञतामस्य वदंति संपदः॥ २४॥

ज्ञे राजन्यनुजीविनोनुरज्यंतीति अनुरक्ताश्चैनं रक्षंतीति भावः॥ २४॥ अथोपायप्रयोगस्य
फलवत्तां दर्शयति॥ अनारतमिति॥ तेन राज्ञा पदेषूपादेयवस्तुषु॥ पदं व्यवशितत्राणस्था
स्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः॥ सम्यगसंकीर्णमव्यस्तं च विभज्य विनियोग एव सत्क्रि
सत् याः अनुग्रहाः॥ काराइतियावत्॥ ताः लंभिताः स्थानेषु सम्यक् प्रयुक्ता इत्यर्थः॥

उपायाः सामादयः संघर्षं परस्परस्पर्द्धां उपेत्येवेत्यत्र क्षेपापरिवृंहिता यतीः अप्रच्युतोत्तरकालाः स्थिरा इत्यर्थः अर्थसंपदो नारतमजस्रं पल्लवंतिप्रसवंतीत्यर्थः ॥१५॥ अर्थसंपदमेवाह ॥ अनेकराजन्येति ॥ अयुग्मेछदसप्तपर्णपुष्पस्यगंध इव गंधो यस्य सायुग्मछदगंधिः स सप्तपमाने स्यादिना बहुव्रीहिरुत्तरपदलोपश्च उपमानाच्चेति वि

अनारतं तेन पदेषु लंभिता विभज्य सम्यग्विनियोगसत्क्रियाः ॥ फलंत्युपायाः परिवृंहितायतीरुपेत्य संघर्षमिवार्थसंपदः ॥१५॥

समासांत इकारः ॥ नृपाणामुपायनान्युपहारभूतायेदंतिनः तेषां मदः उपायनमुपग्राह्यमुपहारस्तयोपदेत्यमरः ॥ राज्ञोपत्यानि पुमांसो राजन्याः क्षत्रियाः राजश्वसुराद्यदितियत्प्रत्ययः राज्ञोपत्ये जातिग्रहणात् रथाश्चाश्वाश्च रथाश्वं सेनांगत्वाद्द्वंद्वैकवद्भावः ॥ अनेकेषां राजन्यानां रथाश्वेन संकुलं तदीयमास्थाननिकेतनाजिरं सभा

मंडपांगणं भृशमाईतां पुंकिलत्वं नयति ॥ एतेन महासमृद्धिरस्योक्ता ॥ अत्र तएवंदात्तालंकारः यथात्यालंकारस्तत्संसमृद्धिमद्वस्तुवर्णनमुदात्तमित्ति ॥१६॥ संप्रति जनपदक्षेमकरत्वमाह ॥ सुखेनेति ॥ चिरायतस्मिं कुर्वो धनेक्षेमं वितन्वंति क्षेमकरे सत्तिदेवपर्जन्यर एवमातृकाः एषांते देवमातृकाः वृष्ट्यंबुजीविनो देशास्तेन भवंतीति आदेवमातृकाः नदीमा

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरं ॥ नयत्ययुग्मछदगंधिराईतां भृशं नृपोपायनदंतिनां मदः ॥१६॥ सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः ॥ वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥१७॥ श्री राम

तृका इत्यर्थः ॥ देशो नद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः ॥ स्यान्नदीमातृको देवमातृकश्च यथाक्रममित्यमरः ॥ एतेनास्य कुल्यादिपूर्त्तप्रवर्तकत्वं उक्तं वापि कूपतडागादि देवतायतनानि च ॥ अन्नप्रदानमारामस्तत्पूर्तमभिधीयते ॥ कुरूणां निवासाः कुरवो जनपदविशेषाः कृष्टे सत्ति पच्यंत इति कृष्टपच्याः राजसूयेत्यादिकर्मकर्तरि कृष्टस्य यांतो निपातः तद्भिन्नरिताः अकृ

स्तुपच्याइवकृषिर्येषामस्तीतिवलेः कर्षकेरजःस्तुष्यादित्यादिनालच प्रत्ययः॥वलइतिदीर्घः सुखेना
कृषेनलभ्याः लभ्युं शक्याः सस्यसंपदो धत्तोधारयंतः नामस्तात्तुरितिनुमागमप्रतिषेधः च
कासतिसर्वोत्कर्षेणवर्ततइत्यर्थः॥अदभ्यस्तादितिभेरदादेशः जक्षित्यादयः षडितिभ्यस्तसंज्ञा॥
संपन्नजनपदत्वान्तदसत्तापकरत्वाच्चकुरुः साध्वोपमितिभावः॥१७॥नन्वेवंजनपदानुवर्तिनः कथम
र्थलाभइत्याह॥उदारकीर्तेरिति॥उदारकीर्तेर्महायशसः उदारोदातमहतोरित्यमरः॥दयावतःपर

उदारकीर्तेरुदयंदयावतःप्रशांतबाधंदिशतोभिरक्षया॥स्वयंप्रदुग्धेस्यगुणेरुपस्नु
तावसूपमानस्यवसूनिमेदिनी॥१८॥

दुःखप्रहाणेच्छोः अतएवप्रशांतबाधंप्रशमितोपद्रवंक्रियाविशेषणमुदयविशेषणंवा वाशांतशातेत्यादि
नाशमिधातोर्ण्यंतान्निष्ठांतोनिपातः॥अभिरक्षयासर्वतस्त्राणेनायं वृद्धिं दिशतःसंपादयतः॥वसू
पमानस्यकुबेरोपमानस्यवसूक्ष्मर्मयूखाग्निधनाधिपेष्विति विश्वः॥अस्यगुणैः सौंदर्यदा
ण्यादिभिरुपस्नुताद्राविता मेदिनीवसूनि धनानिवसुर्मयूखाग्न्योरश्मोच वसुतायेधनमणाविति॥वैजयं

ति॥स्वयंप्रदुग्धेअक्लेशेनदुग्धइत्यर्थः॥दुहेः कर्मकर्तरिलिट्॥नदुरुत्सनमांपरुविरणाविति यकप्रतिषेधः॥य
थाकेनचिद्दुग्धेनरक्षितात्वद्धिताचगौः स्वयंप्रदुग्धेतिहिदितिभावः॥अलंकारस्तु विशेषणमात्रसा
म्यादप्रस्तुतस्यगम्यत्वेसमासोक्तिरितिसर्वस्यालंकारः॥अत्रप्रतीयमानयागवासहप्रस्तुतायाः भेदि
न्याःभेदेअभेदलक्षणातिशयोक्तिवशाद्दोग्ध्यत्वेनोक्तिरिति संक्षेपः १८ संप्रतिवीरभटानुकू
ल्यमाह॥दर्शितपराक्रमाः वीराःसंभावितपराक्रमाभटाः॥महोजसइति॥महोजसोमहाबलोः
अन्यथादुर्बलानामनुपकारिकत्वादितिभावः॥मानःकुलशीलाद्यभिमानएवधनंयेषांतेमा
नधनाः अन्यथाकदाचिद्दलदर्पाद्धिकुर्वन्तीतिभावः॥धनाचिर्ताः धनैःसत्कृताः अन्यथादा
रिद्र्याद्देनंजह्युरितिभावः॥संयतिसंगरेलब्धाकीर्तिर्यैस्तेलब्धकीर्तयः बहुसङ्गुणाद्दृत्यर्थः॥बहु
अन्यथाकदाचिन्मुत्यकरितिभावः॥संहताः मिथःस्परस्परसंगताः स्वार्थनिष्ठानभवंतीतिनसं
हताःन्नभर्थस्यनशब्दस्यसुपूसुपेतिसमासः॥तयाभिन्नवृत्तयोमिथोविरोधात्स्वामिकार्यवि
घातकानभवंतीतिनभिन्नवृत्तयः पूर्ववत्समासः॥अन्यथास्वामिकार्यविघातकतया स्वामिद्रो

दिणस्तु रिरक्तभयत्रापि तात्पर्यं धनुर्भृतो धानुष्काः॥ आयुधमात्रोपलक्षणमेतत्॥ प्राधान्य धनुर्ग्रहणं॥ तस्य दुर्योधनस्य प्रियाणि असुभिः प्राणैः समीहितुं कर्तुं वाञ्छंति अनृण्यार्थं प्राणानपि दातुमिच्छंतीति अन्यथा दोषस्मरणादिति भावः॥ अत्र महौजसादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्याहेतुत्वाभिधानात्काव्यलिंगमलंकारः तल्लक्षणं तु उक्तं तया

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः॥ न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छंत्यसुभिः समीहितुं॥१९॥

साभिप्रायविशेषणत्वात्परिकरालंकार इति द्वयोस्तिलतंडुलवद्विभक्ततया स्फुरणात्संसृष्टिः॥१९॥ स्वराष्ट्रवत्परराष्ट्रवृत्तांतमपि वेत्तीत्याह॥ महीभृतामिति॥ अशेषितक्रियः समापितकृत्यः आफलोदयकर्मेत्यर्थः॥ सः दुर्योधनः सच्चरितैः शुभचरितैः अवंचकैरित्यर्थः॥ चरंतीति चराः तैः प्रणिधिभिः प्रणिधीप्रार्थने च रह इत्यमरः॥ पञ्चायच महीभृतां क्रियाः प्रारंभा

अपसर्पश्चरश्चारः प्रणिधिर्गूढपुरुषः॥

धाताब्जयोनिर्द्रुहिणो विरंचिः कमलासनः॥ स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिरित्यमरः

नि नैर्विशेषं वेद वेत्ति॥ विदो लटो वेत्ति णलादेशः॥ स्वरैस्यं कंचिन्न वेदेत्याह महोदयैरिति धातुरिव तस्य दुर्योधनस्य ईहितमुद्योगो महोदयैर्महाद्धिभिर्हितमनुबध्नंतीति अनुरूपं धतीति हितानुबंधिभिः स्वंतैरित्यर्थः फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते फलानुमेयाः तस्य प्रारंभा इत्यर्थः॥ अत्र प्रतिभिन्नबलमाह॥ नेति॥ तेन राज्ञा क्वचिदुत्रापि सह ज्यया मौर्व्या सज्यं मौर्वी ज्या शिंजिनी गुण इत्यमरः

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः॥ महोदयैस्तस्य हितानुबंधिभिः प्रतीयते धातुरिवेहितं फलैः॥२०॥ न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननं॥ गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनं॥२१॥

तेन सह वर्तत इति तुल्ययोग इति बहुव्रीहिः॥ धनुर्नोद्यतं आननं वा कोपविजिह्मं कोपकुटिलं न कृतं यस्य कोप एव नोदेति कुतस्तत्प्रयुक्तप्रसक्तिरिति भावः॥ कथं तर्ह्याज्ञां कारयति राजा इत्यत्राह गुणेति गुणेषु दयादाक्षिण्यादिषु अनुरागेण माल्यपक्षे सूत्रानुषंगिणेत्यर्थः॥ अथ वासौरभ्यलोभेन नराधिपैरस्य शासनमाज्ञां माल्यमिव माल्यवदिव योर्वर्णादित्वात्स्वार्थे ष्यञ् इति स्वामी॥

[illegible]

शिरोभिरुह्य तेधार्यते धाव चित्वपिय जादीनां किंतीतियकिंसंप्रसारणं॥ अत्रोपमास्युटेवर संप्रसस्यधार्मिकत्वमाह॥ सइति॥ इद्धशासनो प्रतिहताज्ञ इत्यर्थः॥ सदुर्योधनो नवयौवनोद्धतं प्रगल्भं धुरंधरमित्यर्थः॥ दुःखेन शास्यत इति दुःशासनः तं भाषायां शासि युधि दृशि धृषि मृषिभ्यो युज्वाच्य इति खल् थे खल्प्रत्ययः॥ यौवराज्ये युवराजकर्मणि ब्राह्मणादित्वात्ष्यञ् विधायनियुज्य

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः॥ मखेष्वखिन्नो नुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसं २२ श्रीगणे

त्यर्थः॥ पुरोधसा पुरोहितेनानुमतोनुज्ञातस्मिन्याजकेसतीत्यर्थः॥ तदुल्लंघने दोषस्मरणादिति भावः॥ निष्टभूतार्थे क्तः॥ नत्तुमितिबुद्धिस्यादिना वर्तमानार्थे अन्यथा पुरोधसे सत्रक्तस्य च वर्तमानइति षष्ठीस्यात्॥ अखिन्नोनलसः मखेषु क्रतुषु हिरण्यरेतायस्य तं हिरण्यरेतसं अग्निं हव्येन धिनोति प्रीणयति॥ धिनः प्रीणनार्थद्विःचीकृणवोरच्चोसच प्रत्ययः॥ अकारश्चांतादेशः २२

नचैतावतानिरुद्योगे भ्रांत्यमित्याशां दर्शयति॥ प्रलीनभूपालमिति॥ सदुर्योधनः प्रलीनभूपालं निःसपत्नं इत्यर्थः॥ स्थिरायति चिरस्थायीत्यर्थः॥ भुवो मंडलं आवारिधिभ्यः आवारिधि आङ्मर्यादाभिविध्योरित्यव्ययीभावः॥ प्रशासत आज्ञापयन्नपि जक्षित्यादयः॥ षडित्यभ्यस्तसंज्ञा नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः॥ त्वत्त्वत्तः॥ एष्यतीरागमिष्यंतीः धातूनां अनेकार्थत्वादुक्तार्थसिद्धिः॥ अचाडःपाठः एत्येधत्यूठस्विति वृद्धिः॥ लृटःश

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधिमंडलं भुवः॥ स चिंतयत्येव भियस्त्वदेष्यतीरहो दुरंता बलवद्विरोधिता॥ २३॥

प्रत्ययः॥ उगितश्चेति ङीप्॥ आच्छीनद्योर्नुमिति विकल्पान्नुभावः॥ भियोभयहेतून्विपद इत्यर्थः॥ चिंतयत्यालोचयत्येव तदेवाह॥ अहोबलवद्विरोधिता दुरंता दुष्टावसाना सार्वभौमस्यापि प्रबलैः सह वैरायमानत्वमनर्थपर्यवसाय्येवेत्याश्चर्यं सामान्येन विशेषेण समर्थनरूपोऽर्थांतरन्यासः॥ २३॥ श्रीरामजयराम

ननुशठकारिंगितस्यतस्य भयंकथंनिर्धारीत्यत्राह॥कथाप्रसंगेनेति॥कथाप्रसंगेनगोष्ठीवशेनजनैरन्यत्रक
थाप्रसंगेनविषवैद्येन।कथाप्रसंगोवार्तायांविषवैद्येपिवाच्यवदितिविश्वः॥एकवचनस्यापिकथा
प्रसंगशब्दस्य जात्यभिप्रायेणबहुवचनसंबंधाज्जनविशेषणं॥उदाहृतात्उच्चारितात् ।तवाभिधा
नात्॥नामधेयात्स्मारकाद्धेतोःहेताविति पंचमी॥आख्याह्वे अभिधानंचनामधेयंचनामचेत्यमरः
अन्यत्रतवाभिधानात्नामैकदेशेनामग्रहणमितिन्यायात्॥तस्यवत्सतनौतद्धर्मैवासुकीतयोर
कथाप्रसंगेनजनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः॥तवाभिधानात्व्यथतेनताननःसुदुःसहान्मंत्रपदा

भिधानंयस्मिन्तस्मात्कथाप्रसंगेषुईनाम्यंतेजनाम्यस्येकपदंवा॥अनुस्मृताःआखंडलःइंद्रःतस्यसूनुःपुत्रोर्जुनस्त
स्यविक्रमःपराक्रमःपौरुषंयेनतथोक्तःस्मृतार्जुनपराक्रमःसुदुःसहादतिदुःसहान्मंत्रपदान्मंत्रशब्दात्स्मारकात्।
अन्यत्र आखंडलसूनुविक्रमःआखंडलसूनुरिंद्रानुजःउपेंद्रोविष्णुरितियावत्॥सूनुपुत्रेनुजेरवाविति विश्वः॥
तस्यविपक्षीगरुडइत्यर्थः॥तस्यक्रमःपादविक्षेपःसोनुस्मृतोयेनसःतथोक्तः॥स्मृतगरुडमहिमाउरगइवनता
२५

ननःसंन्व्यथतेदुःखायते॥पीडवाधाव्यथादुःखइत्यमरः॥इत्थंभयदादिविकाराडुर्वाराइतिभावः॥सर्वत्रजय
मन्विछत्पुत्रादिषुपराजयमितिन्यायात्अर्जुनोत्कर्षकथनंयुधिष्ठिरस्याभूषणमेवेतिसर्वमवदात
निगमयति॥तदाशुकर्तुमिति॥तत्तस्मात्त्वयिजिह्मकपटंकर्तुमुद्यतेत्वांजिघांसौविरयर्थः॥तत्र
तस्मिन्उद्योधनेविधेयंकर्तव्यमुत्तरंप्रतिक्रियाआशुविधीयतां॥ननुकर्तव्यंत्वयैवोच्यतांतत्राह॥परेति॥

तदाशुकर्तुंत्वयिजिह्ममुद्यतेविधीयतांतत्रविधेयमुत्तरं॥परप्रणीतानिवचांसिचि
न्वतांप्रवृत्तिसाराःखलुमादृशांगिरः॥२५॥

परप्रणीतानिवचांसिचिन्वतांसंगृह्णतांमादृशांवार्ताहारिणामित्यर्थः॥गिरःप्रवृत्तिसाराःवार्ता
मात्रसाराः॥वार्तामात्रवादिनोवयंनतुकर्तव्यार्थोपदेशसमर्थाः॥अतस्त्वयैवनिर्धार्यमि
तिभावः॥सामान्येनविशेषणसमर्थनादर्थांतरन्यासः॥२५॥

इतीति॥वनसन्निवासिनां पत्योवनेचराणां अधिपुइतिगिरमीरयित्वाउक्त्वा आत्तसत्क्रिये गृहीतपारितोषि केगते सति तु छिन्नमेव चाराणां वेतनं॥ते कृष्णाभाव स्वामिकार्यश्रवी घस्थं तुरगति नी ति वा क्या स्तात्॥ अथमही भुजा राज्ञा युधिष्ठिरः सद्दन कृष्णापदी गृहं प्रविश्य अनुजसन्निधौ तद्वचः कृष्णा आचचक्षे॥ श्राव्यातं॥ अथवा कृष्णेतिपद घ्छेदः सदनप्रविश्य अनुजसन्निधौ तद्वचः कृष्णा आचक्षते आख्याता॥ चक्षिङो दुहादिकर्मकत्वाद

इतीरयित्वागिरमात्तसत्क्रियेगतेथपत्योवनसन्निवासिनां॥प्रविश्यकृष्णासदनंमहीभुजातदा

चचक्षेनुजसन्निधौवचः॥२६॥निशम्यसिद्धिंद्विषतामपाकृतीस्ततस्ततस्त्याविनियंतुमक्षम

मा॥नृपस्यमन्युव्यवसायदीपिनीरुदाजहारद्रुपदात्मजागिरः॥२७॥

प्रधानेकर्मणिलिट्॥२६॥निशम्येति॥अथाद्रुपदात्मजाद्रौपदीद्विषतांसिद्धिं वृद्धिरूपांनिशम्यततः हि ष्यः आगताः ततस्त्या अव्ययात्यप्॥अपाकृतीः विकारान् विनियंतुंनिरोद्धुं अक्षमासतीनृप सा स्ययुधिष्ठिरस्यमन्युव्यवसायौ क्रोधोद्योगयोः दीपिनीः संवर्द्धिनीः गिरोवाक्यान्युदाजहार जगाद॥२७॥

आत्मनः समर्थयापयतीसतीत्याह॥भवादृशेष्विति॥भवादृशाः भवद्विधाः पंडिता इत्यर्थः॥तेषु विषयेत्यदादि ष्वित्यादिना क्षः॥आसर्वनाम्नः इत्यकारादेशः॥प्रमदाजनोदितं स्त्रीजनोक्तं वदेः कः चापि स्वपीत्यादिना संप्रसारणं॥अनुशासनं नियोगवचनं अधिक्षेपस्तिरस्कार इव भवति अतोनयुक्तं वक्तुमित्यर्थः॥त तथापिनिरस्तनारीसमयाः त्याजिताशालिनतारूपसमाचाराः॥समयाः शपथाचारकालसिद्धांतसं

भवादृशेषुप्रमदाजनोदितंभवत्यधिक्षेपइवानुशासनं॥तथापिवक्तुंव्यवसा

ययंतिमांनिरस्तनारीसमयादुराधयः॥२८॥अखंडमाखंडलतुल्यधामभिश्चिरंधृताभूपति

पद इत्यमरः॥दुराधयः समयोल्लंघनहेतुत्वात् दुष्टाः मनोव्यथाः पुंस्याधिर्मानसीव्यथेत्यमरः॥मांव क्तुंव्यवसाययंति प्रेरयंति नकिंचिद्दयुक्तं दुःखिनामिति भावः॥२८॥अखंडमिति॥आखंडलतुल्यधा मभिः इन्द्रप्रतापैः स्ववंशजैः भूपतिभिः भरतादिभिः चिरं अखंडं अविच्छिन्नं धृतामहीत्वयामदच्यो तनीति मदच्युत् क्विप्॥तेनमदस्राविणागजेनस्रगिवआत्महस्तेनस्वकरेणस्वचापलेनेत्यर्थः॥अयवर्जितापरिहृतास्व॰॥२९॥छ॥ ॥छ॥ ॥छ॥

भिःस्ववंशजैः॥ स्ययात्महस्तेनमहीमदच्युतामत्तगजेन स्रगिवोपवर्जिता॥२९॥

स्यदोषादेवायमनर्थागमइत्यकतंकस्यचदोषःकुटिलेषुकौटिल्यमेवेत्याह॥ व्रजंतीतिमूढधियानिर्विवेक बुद्धयस्तेपराभवंव्रजंति॥ येमायाविषुमायावस्तुविषयअस्मायेत्यादिना विनिप्रत्ययः॥ मायिनःमा यावंतः व्रीह्यादित्वादिनिप्रत्ययः॥ नभवंति॥ अत्रेवार्थातरन्यस्यतिप्रविश्येतिशठःअपका रिणः धूर्तास्तथाविधान् अकुटिलनसंवृतांगान् वर्मीतिशरीरान् निशिताइषवइवप्रविश्यघ्नंति

व्रजंतितेमूढधियःपराभवंभवंतिमायाविषुयेनमायिनः॥ [illegible]तथाविधा नसंवृतांगान्निशिताइवेषवः॥ ३०॥ गुणानुरक्तामनुरक्तसाधनःकुलाभिमानीकुलजांन राधिपः॥ परैस्त्वदन्यःकइवापहारयेन्मनोरमामात्मवधूमिवश्रियं॥ ३१॥ राभ

कृत्वाघ्नंतिहिआर्जवंहिकुटिलेषुनीतिरितिभावः॥ ३०॥ नचलक्ष्मीचांचल्यात्तअयंअनर्थागमःकिं तुस्योपेक्षादोषमूलत्वादित्याशयेनाह॥ गुणानुरक्तामिति॥ अनुरक्तसाधनःअनुकूलसहाय वान्॥ उक्तंच॥ कामंदके॥ योगाले दनिवृत्तस्यसुसहायस्यधीमतः॥ छायेवानुगतातस्यनित्यं

नित्यंश्रीःसहचारिणीतिकुलाभिमानीक्षत्रियत्वाभिमानी अन्यत्रकुलीनत्वाभिमानीचत्वद न्यः॥ त्वत्तोन्यःअन्यारादित्यादिनापंचमी॥ कोनराधिपेः गुणैःसंध्यादिभिःसौंदर्यादिभिर्श्च्या अनुरक्तांकुलजां कुलक्रमादागतांकुलीनांचमनोरमांश्रियमात्मवधूंस्वभार्यामिवं वधूर्जायास्नुषास्त्रीचेत्यमरः॥ परैःश त्रुभिरपहारयेतस्वमेवापहारंकारयेदित्यर्थः॥ कलत्रापहारं चलक्ष्म्यापहारोपिराज्ञांमानहानिकर नि

भवंतमेतर्हिमनस्विगर्हितेविवर्तमानंनरदेववर्त्मनि॥ कथंन्नमन्युर्ज्वलयत्युदीरितः शमीतरुंशुष्कमिवाग्निरुत्सिखः॥ ३२॥

त्वादनुपेक्षणीयइतिभावः॥ ३१॥ अथद्वाभिःश्लोकैःकोपोद्दीपनंकरोति॥ भवंतमिति॥ हेनरदेवनरें द्र एतर्हिइदानीअस्मिन्नापत्काले इत्यर्थः॥ एतर्हिसंप्रतीदानीमधुनासांप्रतंतथा इत्यमरः॥ इदमोर्हि लितिर्ल्प्रत्ययः॥ एततोरथोरित्यनोदेनादेशः॥ आपदमेवाह॥ मनस्विगर्हितेश्रूरजनजुगुप्सितवर्त्मनिमा र्गेविवर्तमानंशत्रुकृतांदुर्दशामनुभवंतमित्यर्थः॥ भवंतंउदीरितःउद्दीपितमन्युःक्रोधःशुष्कंनीरसंशुष्कं सोतरुश्चेतिविशेषणसमासः तंशमीतरुंशमीग्रहणंशीघ्रप्रज्वलनस्वाभाव्यात्कृतं इत्सिखःउद्गत तामिस्यर्थः मितारुइतिरुस्व॥ ३२॥

कइतिनिद्रुतकारस्यककारःशमीवा स्यादेःखचित्स्यादिप्रत्ययविशेषःखम्भगर्दःधा सिद्धिलकर्थंसमस्थयात्॥ अमरकरदिकुबी

नव्वंतः शत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशंक्याह॥ अवंध्यकोपस्येति॥ अवंध्यकोपस्य अत एव आ
पदां निहंतुः निग्रहानुग्रहसमर्थस्येत्यर्थः॥ पुंस इति शेषः देहिनो जंतवः स्वयमेव वश्याः वशंगता भवं
ति॥ वशंगतावश्यतिस्य प्रत्ययः॥ अतः त्वया कोपिना भवितव्यमित्यर्थः॥ व्यतिरेकेत्वनिष्टमाचष्टे अ
मर्षशून्येन निष्कोपेन जंतुना कन्यथा शोक इति वहता विति तृतीया॥ हृदयस्य कर्म हार्दं स्नेहः

अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव देहिनः
अमर्षशून्येन जनस्य जंतुना न जातहार्देन न विद्विषादरः ३३

प्रेमः प्रियता हार्दं प्रेम स्नेहोथ दोहद इत्यमरः॥ युवादित्वादण प्रत्ययः॥ हृदयस्य हृल्लेखयदण्लासो
विति हृदादेशः जातहार्देन जातस्नेहेन सता जनस्य आदरो न हि वांचसत्तादरोन अमर्षहीनस्य राग
द्वेषा च किंचित्करत्वादगण्या विसर्थः॥ अथवा विद्विषा च सत्तादरो भयं न हरो स्त्रियां भयं स्वभ्रेत्यमरः
एतस्मिन्नेव प्रयोगे संधिय शाद्विधा परिच्छेदः पुंबाव्यपुनर्दोषः॥ अंतस्थाने कोपकार्यः सान्यस्य॥

परिश्रमन्निति॥ लोहितचंदनोचितः उचितलोहितचंदनः वाहिताग्न्यादित्वात्साधुः अभ्यस्तरक्तचंदन इत्यर्थः
अभ्यस्तेप्युचितं न्याय्य इति यादवः॥ महारथोरथ्या चारि तु भयत्रापि प्रागिति शेषः॥ आत्मानं सा
रथिं चाश्वान् रक्षत्य ध्येतयो नरः॥ समाहारथसंज्ञस्यादित्याहुर्नीतिकोविदः॥ श॥ अध्यत्तु॥ रेणु
रेणुरूषितः धूलिविच्छुरितः पादाभ्यामततीति पदातिः पादे चाजिआज्यती भ्यां चेत्यनुवृत्त्या

परिश्रमल्लोहितचंदनोचितः पदातिरंतर्गिरि रेणुरूषितः॥
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ३४

पादेवोयेणादिक् इण प्रत्ययः॥ पदस्य पदाज्याति गोपहतेषु इति पदादेशः॥ गिरिषु अंतः इति अंतर्
गिरिः॥ विभक्त्यर्थेऽव्ययी भावः॥ गिरेश्च सेनकस्येति विकल्पत्वात्समासांतः भावः परिश्रमन्
वृकोदरो भीमः सत्यधनस्येति साल्लुंठवचनं अयापि सत्यमेव रक्ष्यते न तु भ्रातर इति भावः॥ तवेद
तिशेषः मानसं नो दुनोति कच्चित् परितापयति न किं कच्चित्कामप्रवेदन इत्यमरः॥ स्वाभिप्रायाविष्क

विजित्येति॥ वासवः उपमानं यस्य सः वासवोपमः इंद्रतुल्यः धनंजयः उत्तरान्कुरून्मेरोरुत्तरान् अमा नुषान्देशान्विजित्य प्राज्यं॥ प्रभूतं प्रचुरं प्राज्यमद्भ्रं बहुलं बहुलमित्यमरः॥ कुप्यादन्यदकुप्यं हेम रौप्यात्मकं॥ स्यात्कोशश्च हिरण्यं च हेमरौप्ये कृताकृते॥ ताभ्यां यदन्यत्तत्कुप्यमित्यमरः॥ वसु ध नं मयच्छत् दत्तवान् यामेत्यादिना दाणोयच्छादेशः सः धनं जयतीति धनंजयः अर्जुनः संज्ञायां

विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः
स वल्कवासांसि तवाधुनाहरन्करोति मन्युं न कथं धनंज
यः॥ ३५॥

भल्लबजाजीत्यादिना खचप्रत्ययः॥ अरुर्द्विषदित्यादिना मुमागमः अधुनास्मिन्काले अधुने ति निपातनात्साधुः वल्कलवासांसि आहरन्के कथं तव मन्युं क्रोधं दुःखं वा न करोति॥ ३५

वनांतशय्येति॥ वनांते वनस्वरूपे अंतः प्रांते निकेतने मनोस्वरूपे च मनोरमे इति विश्वः वनभूमि रेव शय्या तया कठिनीकृताकृतिः कठिनीकृतदेहः आकारो देह आकृतिरिति वैजयंती॥ विष्वक् समंतात् समंततस्तु परितः सर्वतो विष्वगित्यमरः॥ कचाचितौ कचव्याप्तौ वशीकृतकेशावित्यर्थः अतएव वनगजोगिरिसंभवौ गजाविवस्थितौ एतौ यमौ युग्मजातौ माद्री

वनांतशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ॥ कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नु त्सहसेन बाधितुं॥ ३६॥

पुत्रावित्यर्थः॥ यमौ दंडधरे ध्वांक्षे संयमे यमजेपि चेति विश्वः॥ विलोकयन्पश्यन् त्वं धृतिसंयमौ संतोषो नियमो॥ धृतिर्योगांतरे धैर्ये धारणाध्वरतुष्टिष्विति विश्वः॥ बाधितुं नोत्सहसे न प्रवर्तसे शकधृषेत्यादिना तुमुन्॥ अहोते मोहो धैर्यमिति भावः॥ ३६॥ अथ राज्ञो दुर्दशां दर्शयितुमुपोद्घातमाह॥ प्रकृतार्थं वर्णयितुमर्थांतरवर्णनमुपोद्घातः॥ चिंतां प्रकृतिसिध्य

वनांतशय्येति॥ धीमुपोह्य तं प्रचक्षते॥ इमामिति॥ इमां वर्तमाना तवेमां तावकीं त्वदीयां तस्येदमित्यणप्रत्ययः॥ तवकममकावेकवचने इति तकादेशः॥ धियं सदापद्विषयां चित्तवृत्तीमहनवेदकी। हा शीवानवेभिपरवुहेरन्यस्यक्षत्वादितिभावः॥ विदोलयेराणादेशः॥ नचात्मदृष्टांतेनापेन्नत्वात् उःखित्वमनुमोक्तुं शक्यते धीरा धीराद्यिष्वनेकां कत्वादित्याशयेनाह॥ चित्तवृत्तयो विचित्ररूपाः धीरो धीराद्यनेक

इमामहं वेद्म तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः॥ विचिंतयंत्या
भवदापदं परां रुजंति चेतः प्रसभं ममाधयः॥ ३७॥

प्रकाराः खलु परासु त्कटं भवदापदं विचिंतयंत्याः भावयंत्या मम चेतः चित्तं आधयो मनोव्यथाः उपसर्गेघोः किरिति कप्रत्ययः॥ प्रसभं प्रसत्यं रुजंति भजंति। रुजिः धातोर्लट् परस्य तां मपिङः सह उःखं जनयति॥ त्वद्विपत्तिरनुभवितारं त्वां कथं न विकरोतीति महचित्रमित्यर्थः॥ चेतः इत्यत्र राजार्थानां भाववचनानामज्वरस्तीति षष्ठीन भवति तत्र शेषाधिकारात् शेषस्यैव वक्षिकत्वादिति॥ ३७॥ राम॥ छ॥

त्वदापदमेव श्लोकत्रयेणाह॥ पुरेति॥ यस्त्वं महाधनं बहुमूल्यं श्रेष्ठमित्यर्थः॥ महाधनं महार्हं मूल्यं इति विश्वः॥ शयनं शय्यां अधिरूढः सन् स्तुतयश्च गीतयश्च ता एव मंगलानि तैः करणभूतैः पुरा विबोध्यसे वैतालिकैरिति शेषः पूर्वं निबोधितः इत्यर्थः॥ वैतालिका बोधकराश्चक्रिका घांटिकार्थिकाः॥ स्युर्मागधास्तु मगधा बंदिनः स्तुतिपाठकाः इत्यमरः॥ सुताः यौरागिकाः प्रोक्ता मागधा वंशसूचकाः॥ बंदिनस्त्व

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमंगलैः॥ अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ३८

मनप्रज्ञाप्रस्तावसदृशोतकयः॥ पुरि लुङ्चास्म इति भूतार्थे लट्॥ स त्वं अदभ्रदर्भां बहुलकुशां॥ अस्त्री कुशं कुशो दर्भ इत्यमरः॥ अदभ्रं बहुलं बह्वित्यमरः॥ स्थलीं अकृत्रिमभूमिं जानपदेत्यादिना अकृत्रिमार्थे ङीप् एतेन उःसहस्पर्शत्वं उक्तं॥ अधिशीङ्स्थासां कर्मेति कर्मत्वं॥ अधिशय्य शयित्वा। अयङि यकिति अयं अदेशः॥ अशिवैः अमंगलैः शिवारुतैः क्रोष्टीवासितैः शिवाहरीतकीक्रोष्टी शमीनयामनक्षयपि तिवैजयंती॥ निद्रां जहासि त्यजसि इति शेषः॥ ३८॥

अनारतमिति॥अनारतमजस्त्रं मणिपीठशायिनौ मणिमयपादपीठशायिनौ यौ चरणौ राजसिरस्रजां नमद्भूपाल मौलिस्रजां रजः परागै रंजयतः तौ चरणौ अद्य गहि जैरुक्तपस्विभिः आलूनशिखेषु छिन्नाग्रेषु बर्हिषां कुशानां व र्हिः कुशः कुशाश्रयो रित्यमरः॥वनेषु निषीदतः तिष्ठतः॥३९॥पुरेति।हेनृपयद् अन्नं पुरा।वर्तिवपुः पुरा द्विजातिशेभ्य एकजातीयघातेद्विजातयः तदुक्तं।जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यत इति द्विजः पक्षिदंत विप्राश्चेति विश्व

अनारतं यौ मणिपीठशायिनौ वरंजयतः राजसिरः स्रजां रजः॥ निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूननशि खेषु बर्हिषां॥३९॥पुरोपनीतं नृपरामणीयकं द्विजातिशेषेण यदेतदंधसा॥ तदद्य ते वन्यफलाशिनः परं परैति [illegible]

स्यमरः॥द्विजभुक्तावशिष्टेन अंधसा अन्नेन भिस्सा स्त्री भक्तमंधोन्नमित्यमरः॥रमणीयस्य भावो रामणीयकं मनो हरत्वमुपनीतं प्रापितं नयतेर्द्विकर्मकत्वात्प्रधानेकर्मणिक्तः प्रधानकर्मण्याख्येयत्वादीदुर्हिकर्मकाण्यमितिव चनात्॥अद्य वन्यफलाशिनस्ते तव तद्वपुः यशसा समं परं नतिमात्रं कार्श्यं परैति प्राप्नोति॥उभयमपि क्षीयत इ त्यर्थः॥अत्र सहोक्तिरलंकारः॥तदुक्तं काव्यप्रकाशे सा सहोक्तिरलंकारः॥सहार्थस्य बलादेकार्थवाचकमिति

॥४०॥

ननु सर्वप्राणिसाधारण्या आपदिकापरिवेदनेत्यत्राह।द्विषन्निमित्तेति॥यदयतः कारणात्इयं दशावस्था॥दशावार्तावव स्थायामित्यमरः॥द्विषंतो निमित्तं यस्याः सा द्विषो मित्र इति शतृप्रत्ययः॥अतो मे मनः समूलं सातिशयं उन्मूलयतीव उत्पाटयतीव दैवकीयापदः स्वायत्ताह॥परैः शत्रुभिः अपर्यासिता अपर्यावर्तिता वीर्यसंपदो येषां तेषां मानिनां प राभवोपि विपदपि उत्सव एवेति धर्मेणार्थांतरन्यासः॥मानहानिदुःसहानत्वापदिति भावः॥४१॥

ए

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः॥परैरपर्यासितवीर्यसंपदां पराभवोप्युत्स व एव मानिनां॥४१॥विहाय शांतिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषां॥व्रजंति शत्रू नवधूय निस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः॥४२॥

विहायेति।हे नृप शांतिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः संधेहि अंगीकुर्वीत्यर्थः॥प्रसीद प्रार्थनायां लोट् शमेन कार्यसिद्धौ किं क्रोधेनेत्यत्राह॥व्रजंतीति॥निस्पृहा मुनयः शत्रून् अविधूय अनिर्जित्य शमेन क्रोधविवर्जितेन सिद्धिं व्रजंति भूभृतः तु न व्रजंति क्षत्रस्य वशजकार्यं न शांति शाध्यमित्यर्थः॥४२॥

पुरःसराइति॥ किंचिधामवतांतेजस्विनांपरविकारासहिष्णुनामित्यर्थः॥ पुरःसरंतीतिपुरःसराः अग्रेसराः पुरोग्रेषुसर्तेरप्रत्ययः यशोधनाः भवादृशाः सुदुःसहं अतिदुःसहं इदृत्रामुक्तप्रकारंविकारंप्राप्य रतिंसंतोषमधिकुर्वतेचेत्नहंतहंतइतिखेदे मनस्विताअभिमानिता निराश्रयासतीहतातेजस्विजनेकस्मरणत्वात्मनस्विताया इत्यर्थः॥ अतःपराक्रमितव्यमितिभावः॥ यथत्रअसहनस्यासंगतेरहिपूर्वोक्तोतेरधेःअसहनइत्यात्मनेपदंभवतिअ

पुरःसराधामवतांयशोधनाःसुदुःसहंप्राप्यविकारमीदृशं॥ भवादृशाश्चेदधिकुर्वतेरतिंनिराश्रयाहंतहतामनस्विता॥ ४२॥ अथक्षमामेवनिरस्तविक्रमश्चिरायपर्येषिसुखस्यसाधनं॥ विहायलक्ष्मीपतिलक्ष्मकार्मुकंजटाधरःसंजुहु

सहनंपरिभावइतिकाशिकातआप्यस्याकर्तृअभिप्रायविवक्षायामेवप्रयोजकत्वात्कर्त्रभिप्रायेस्वरितञितइत्यादिनैवात्मनेपदंसिद्धं॥ ४३॥ व्यवसायानंगीकारेदूष्यमाह॥ अथेतिअथपक्षांतरेत्वंनिरस्तविक्रमःसन्चिरायचिरकालेपिक्षमांशांतिमेवक्षितिक्षांत्योःक्षमेत्यमरः॥ सुखस्यसाधनंपर्येषिचेदन्वगच्छसितर्हिलक्ष्मीपतिलक्ष्मराजचिन्हंकार्मुकंविहाय धरतीतिधरःपचाद्यच्जटानांधरःजटाधरःसन्वनेयावकंजुहुधीयावकेहोमंकुर्वीत्यर्थः॥ अधिकरणेकर्मत्वायचारःविरक्तस्यकिंधनुषेत्यर्थः॥ हुजेत्योर्होधिः॥ ४४॥

अथसमयोल्लंघनात्बिभेषिचेत्तदपिनकिंचिदित्याह॥ नेति॥ परेषुशत्रुषुनिकृतिःपरप्रधानंयेषुतेषुतथोक्तेषुअपकारतत्परेषुसत्सुभूरिधाम्नःमहौजसःप्रतीकारक्षमेस्येत्यर्थः॥ तेतवसमयस्त्रयोदशवत्सरान्वनेवस्यामइत्येवंरूपासंवित्॥ समयाःशपथाचारकालसिद्धांतसंविदइत्यमरः॥ तस्यपरिरक्षणंप्रतीक्षणंनक्षमंनयुक्तंयुक्तेक्षमंशक्तेहितेत्रिषुइत्यमरः

नसमयपरिरक्षणंक्षमंतेनिकृतिपरेषुपरेषुभूरिधाम्नः॥ अरिषुहिविजयार्थिनःक्षितीशाविदधतिसोपधिसंधिदूषणानि॥ ४५॥

हियस्माद्विजयार्थिनःक्षितीशाःअरिषुविषयेसोपधिसकपटंयथाभवतितथा॥ कपटोस्त्रीव्याजदंभोपधयःछद्मकेतवइत्यमरः॥ संधिदूषणानिविदधतिकेनचितव्याजेनदोषमापाद्यसंधिंदूषयंतिविघटयंतीत्यर्थः शक्तस्यहिविजिगीषोःसर्वथाकार्यसाधनंअन्यत्समयपरिरक्षणादिकंअशक्तस्येतिभावः अर्थांतरन्यासोलंकारः॥ पुष्पिताग्रावृत्तं। तल्लक्षणंअयुजिनयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्रेति॥ ४५॥

तयोर्नियोगात्नियमनाद्धेतोः

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति। विधीति॥ विधिः दैवविधिर्विधाने दैवेपीत्यमरः॥ समयः कालः तयोर्दुरतिक्रमणादिति भावः॥ अगाधे दुस्तरे आपत्पयोधिरिव इत्युपमितिसमासः॥ दिनकृतमिवेति वक्ष्यमाणानुरोधात्। तस्मिन्नापत्पयोधौ मग्नं सूर्योपि सायं सागरे मज्जतीति परे युरुन्मज्जतीत्यागमः॥ दीप्तिः प्रतापः आतपश्च तस्याः संहारेण जितं अप्रसन्नं शिथिलवसु शिथिलधनं अन्यत्र शिथिलरश्मिं॥ वसुर्धने मौरश्मौ च वसु तोये

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलबलमगाधे मग्नमापत्पयोधौ॥ रिपुतिमिरमुदस्योदीयमानं दिनादौ दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥ ४६॥

धने मणाविति वैजयंती॥ शिथिलबलमिति पाठे उभयत्रापि क्षीणशक्तिकमित्यर्थः॥ अथ रिपुस्तिमिरमिव रिपुः तिमिरं उदस्य निरस्य उदीयमानं उद्यतं इण् गतौ इति धातोर्दैवादिकात् कर्तरि शानच्॥ त्वां दिनादौ दिनकरमिव लक्ष्मीः भूयः समभ्येतु भजतु आशिषि लिङ्लोटाविति लोट्॥ चमत्कारितया मंगलाचरणरूपतया सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः॥ यथाह भाष्यकारः॥ मंगलादीनि मंगलमध्यानि मंगलांतानि शास्त्राणि प्रथयंते वीरपुरुषाण्यायुष्मत्पुरुषाणि भवंति॥ अध्येतारश्च प्रवक्तारो भवंति॥ पूर्णेनायमालिनीवृत्तं सर्गान्तत्वाद्वृत्तभेदः॥ यथाह दंडी॥ सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः॥ सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरंजनमिति॥ अथ कविः काव्यवर्णनामाख्यानपूर्वकं सर्गसमाप्तिं कथयति इत्यादि॥ शब्दः परिसमाप्तौ भारवीकृत इति कविनामकथनं महाकाव्यमिति महच्छब्देन सलक्षणसंपत्तिः सूचिता किरातार्जुनीय इति काव्यवर्ण्ययोः कथनं सर्गः समाप्त इति शेषः॥ एवमुत्तरत्रापि द्रष्टव्यं किरातार्जुनावधिकृत्य कृतोयं ग्रंथः किरातार्जुनीयः॥ शिशुक्रंदयमसभद्वंद्वेन्द्रजननादिभ्यः छ इति द्वंद्वाच्छप्रत्ययः॥ राघवपांडवीयमितिवत्॥ तथाहि॥ अर्जुन एवात्र नायकः किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः॥ यथाह दंडी॥ वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि। तज्जयान्नायकोत्कर्षकथनं च धिनोति नः॥ इति॥ यथाह संग्रहे॥ नेता मध्यमपांडवो भगवतो नारायणस्यांशभाक् तस्योत्कर्षकथानुवर्ण्यचरितो दिव्यः किरातः पुनः॥ शृंगारादिरसोयमत्र विजयी वीरप्रधानो रसः शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलं॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां घंटापथसमाख्यायां प्रथमः सर्गः समाप्तः॥ १॥

॥ किरातप्रथमसर्गसमाप्तः॥ श्रीरामसमर्थ॥

॥ श्रीगणेशायनमः

॥ श्रीतापिंछिनमः

श्रीगणेशायनमः॥ द्वाभ्यांयुग्ममितिप्रोक्तंत्रिभिःश्लोकैविशेषकं॥ कलापकंचतुर्भिःस्यात्तदूर्ध्वं कुलकंस्मृतं १ अथत्रिभिर्मुनिविशेषणानि॥ चतुर्भिःकलापमाह॥ [illegible] तिततःउपविष्टानंतरं धर्मात्मजोयुधिष्ठिरःशरच्चंद्रकराइवाभिरामैराल्हादकैरुत्सर्पिभिरूर्ध्वप्रसारिभिरंशु

ततःशरच्चंद्रकराभिरामैरुत्सर्पिभिःप्रांशुमिवांशुजालैः॥ बिभ्राणमानीलरुचंपिशंगीर्जटास्तडित्वंतमिवांबुवाहम् १

जालैःप्रांशुमुन्नतमिवस्थितमुत्प्रेक्षा॥ पुनरानीलरुचंकृष्णवर्णंपिशंगीःकृष्णवर्णाःगौरवर्णाःजटाःबिभ्राणंधारयंतंमत एवमतंडित्वंतंविद्युत्कंमंबुवाहमिवस्थितमित्युत्प्रेक्षा १॥

प्रसादेतिपुनःसमग्रांसंपूर्णांप्रसादःसौम्यत्वंतस्यलक्ष्मींसंपदंदधतंअतएवजनमतिगच्छतीति जनातिगेनलोकातिशयेनाअतोअन्यत्रापिचदृश्यतइतिडःप्रावपुःप्रकर्षेणाकारसंपदा॥ असंस्तुतानांअपरिचितानामपिसहोदरायमित्यज्ञानत्वानामपीत्यर्थः॥ संस्तवःस्यात्परिचितइत्य

प्रसादलक्ष्मींदधतंसमग्रांवपुःप्रकर्षेणजनातिगेन॥ प्रसह्य चेतःसुसमासजंतमसंस्तुतानामपिभावमार्द्रम् २

मरः॥ चेतस्सुचित्तेषुआर्द्रंस्निग्धंभावमभिप्रायंप्रसह्यबलात्समासजंतंलगयंतंमितियावत्॥ दंशसंजयस्वजांशपीत्युपधालोपः॥ प्रसन्नाकारेषुसर्वेषुस्नेहमितिभावः २

कि॰
२

अनुद्धतेति। पुनरुद्धताकारतया शान्ताकारत्वेन लिंगेन अंतःकरणस्य वृत्तिं विविक्तां पूतामिति यावत्। विविक्तो पूतविजनाविति अमरः। नचंतं प्रकटयंतं आकृतिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः। पुनः माधुर्येति सर्गे सौम्ये विश्रंभो विश्वासस्तयोर्विशेषमतिशयं भजतीति तथोक्तेन

॥ अनुद्धताकारतया विविक्तां तन्वंतमंतःकरणस्य वृत्तिं ॥
॥ माधुर्यविश्रंभविशेषभाजा कृतोपसंभाषमिवेक्षितेन २

क्षितेन दर्शनेनैव कृता उपसंभाषा भाषणं येन तं पेकस्त्रिवत्तमिव स्थितोस्ति। दृष्टिविशेषेणैव उपसंभाषणमिव स्थितमित्यर्थः। काशिकायां तु उपसंभाषा उपसांत्वनमिति। भासनादिसूत्रे

॥ श्री ॥

२

धर्मेति पुनर्धर्मनिबध्नंतीति धर्मनिबंधीनीनां अग्निहोत्रादिधर्मप्रतिपादकानां एनः प्रणुदं अघच्छिदां क्विप्। श्रुतीनां वेदानां श्रुतिस्त्रिवेद आम्नायस्त्रयमरः प्रसूतिं प्रभवं सुखेन उपविष्टं मुनिं तदभ्या

धर्मात्मजो धर्मनिबंधिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनां हेतुं तदभ्या
गमने परिप्सुः सुखोपविष्टं मुनिमाबभाषे ४

गमने तस्य मुनेः आगमने हेतुं कारणं परीप्सुः जिज्ञासुः धर्मात्मजः आप्नोतेः सनंतादुः प्रत्ययः अप् ज्ञप् धाम कारः। अत्रलोपाभ्यासस्येत्यभ्यासलोपः आबभाषे उवाच ४

अनाप्तेति॥ हे मुने अनाप्तपुण्योपचयैः अकृतपुण्यसंग्रहैः दुरापा दुर्लभा फलस्य सवित्री श्रेयस्करीत्यर्थः निर्धूतरजाः हतरजोगुणा॥ अन्यत्र निरस्तधूलिश्च रजो रजोगुणे धूलौ परागार्तवयोर पीति विश्वः एषा भवद्दर्शनसंपत् संपत्तिरित्तियावत्॥ संपदादिभ्यो क्विप् भावार्थत्वात् वीतबलाहकायाः निर्मेघायाः दिवोन्तरिक्षस्य

अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री॥
तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ५

संबंधिन्याः॥ वृष्टेस्तुल्या इत्युपमालंकारः॥ अभ्र वृष्टि च दत्तवर्धितोपपन्नं भवद्दर्शनं सर्वथा कस्यचि च्छ्रेयसो निदानमित्यर्थः॥ वारि वहन्तीति बलाहकाः पृषोदरत्वात्साधुः ५

अद्येति॥ अद्य क्रतूनां क्रिया अनुष्ठानानि कामान् दुहंतीति कामदुघाः फलदा इत्यर्थः दुहः कप् घश्चेति कप्रत्ययः अभादेशः संप्रति अद्य भूमिदेवाः ब्राह्मणाः द्विजात्यग्रजन्मानभूमिदेवाः॥ वाडवा विप्र ब्राह्मणा इत्यमरः सत्या आशिषो जाताः ब्राह्मणाशिषो फलिता इत्यर्थः कुतः यद्यतः कारणात् त्वय्यागते सति

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः संप्रति भूमिदेवाः॥ आसंसृतेरस्मि जगत्सु जा
तस्त्वय्यागते यद्बहुमानपात्रं ६

त्वदागमननिमित्तेनेत्यर्थः॥ अस्मीत्यहमर्थेव्ययं॥ अस्मीत्यस्मादर्थानुवादे अहमर्थेपीति गणव्याख्याने दर्शने कचागमश्चि भावो व्यधिन्त प्रभणां पाद प्रहारं दधिनास्मि दयेइति योगश्च आसंसृतेः आसंसारं याव त्संसारमित्यर्थः॥ अभिविधावाङ् कल्यादिसमासः॥ जगत्सु बहुमानपात्रं जातः सकलस्य सत्कर्मफलगूतं त्वदागमनं येन तेन मान्यतेतिभावः ६

कि॰
४

श्रियइति। आत्मनेब्रह्मणइवलोकगुरोस्तवामोघमविफलंसंदर्शनंश्रियंविकर्षत्याकृष्याद
दाति। अघानिदुःखानिदुःखानिअपहंतिनश्यतीति। अंहोदुःखव्यसनेष्वघमित्यमरः श्रियंपु

श्रियंविकर्षत्यपहंत्यघानिश्रेयःपरिस्तौतितनोतिकीर्तिं॥ सं
दर्शनंलोकगुरोरमोघंतवात्मयोनेरिवकिंनधत्ते॥ ७॥

रुषार्थस्तदुक्तंचपरिस्तौति॥ स्वचतिकीर्तिंतनोति। किंबहुनाकिंनधत्तेकिंन्नकरोतिअपि
तुसर्वंकरोतीत्यर्थः ७ श्रीयहरशंकरगौरीशंवंदेगंगाधरमीशमु॥ ७॥

च्योतन्निति। हेमुनेभगवन्च्योतन्मयूखमपिसुधास्त्राविण्यपिहिमद्युतौचंद्रेऽपिविषयेननिर्वृ
तंनसुखंप्राप्तंनत्र्यर्थेनशाङ्कस्यसूक्ष्मपेतिसमासः। मेचक्षुः। तत्सन्निधौनिर्वृतिंसुखमेति
तथाचेतश्चसमुज्झितज्ञातिवियोगदुःखंसत्तबंधुचिरहदुःखंसमुच्छूसितीयानुपरोधेनप्राणि

च्योतन्मयूखेऽपिहिमद्युतौमेननिर्वृतंनिर्वृतिमेतिचक्षुः॥ स
मुज्झितज्ञातिवियोगखेदंत्वत्सन्निधावुच्छ्वसतीवचेतः ८

तीवेत्युत्प्रेक्षा। दर्शनाद्धेतुर्निवृत्तिकारणेनसत्यपिइदानींवृत्तिकथनाद्विशेषोक्तिः॥ तदुक्तं
सत्सुसामग्र्यामनिर्वृत्तिर्विशेषोक्तिर्निगद्यतइति ८ द्वंद्वाभिभूतंममचेतसंहर॥

न

निरास्पदमिति। प्रश्नकुतूहलित्वं। आगमनप्रयोजनप्रश्नो निरास्पदः निराश्रयः आस्पदं प्रति
ष्ठायामिति निपातः। प्रश्नाविकारो हेतुमाह। निस्पृहाणां युष्मदृशामस्मासु अधीनमायत्तं किमु
न किंचिदस्म तोलभ्यमित्यर्थः। आधारस्तविचक्षायां सप्तमी तथापि कल्याणकरी मस्मात्स्पृहि
तैकहेतुमित्यर्थः निस्पृहप्रवृत्तेः परार्थ्योदितिभावः कुतूहलित्वादिना रुत्वप्रत्ययेडीप्। ज्ञातस्तगि

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निस्पृहाणां॥ तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरी

श्रोतुमिच्छा करोति। मां मुखं वागस्यास्तीति मुखरः मुखरं वाचालं करोतीति निरंतरभाषी त्वमुखकं जेभ्यारः अमुख
रः मुखरः संपद्यमानस्तथा करोति वाचालं करोति। दुर्मुखे मुखरा बद्धमुखे तु इत्यमरः। तत्तच्चित्र
सः व्यावहारयतीत्यर्थः। निस्पृहस्यापि तवावाक्यमस्मद्धितकरं श्रोतव्यमित्यर्थः ९ श्रीराम॥

त्वा

रुतिकप्रियंवदे

य

इतीति। इतीत्थमुक्तिविशेषरम्यमुक्तवैचित्र्यचारु यथा तथोक्त्वा उदारचेता महामना नरेंद्रो
द्वैपायनेन व्यासेन द्वीपमंतरस्त्वानं जन्मभूमिर्यस्य स द्वीपायनः स एव द्वैपायनो व्यासः तेन प्रज्ञा
दिभ्यश्चेति स्वार्थेण प्रत्ययः नापत्यार्थेन डिपः फक्तेषांश्च पाठात्तत्वधिताधिकारात्तां जयोपपत्तौ

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ॥
उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेंद्रः १०

मनः समाधाय जयसिद्धिमपदसे इत्यर्थः। इतिवक्ष्यमाणप्रकारामुदारामर्थवतीं गिरमभि
दधे जगाद। उदाहृत्यादप्रधाने कर्मणि लिट्। प्रधानकर्मण्याख्येये लादीनाहुर्द्विक
र्मकत्वे। अप्रधाने दुहादीनां ण्यंते कर्तुश्च द्विकर्मण इति वचनात्॥१०॥ गोविंदः॥

आहौत्ताचत्रचस्यमध्यस्थभंगदोषं युग्मेनपरिहरन्ति। चिचीषतामिति। अलघ्वीं गुर्वीं बाते। गुणवचनात्तूइ इति ङीप्। यशोवतंसां कीर्तिभूषणां उभयत्र इह अमुत्र च भूतिं श्रेयस्करीं चिचीषतां चेतुं संग्रहीतुं मिच्छतां चिनोतेः सन्नंता च्छत्रु प्रत्ययः जन्मवतां शरीरिणां बंधु

चिचीषतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिं ॥
अभ्यर्हिता बंधुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानां ११

विषये तुल्यरूपा एकविधा वृत्तिर्व्यवहारोभ्यर्थितः उचिता तपोधनानां त्वस्मद्रशां विशेषेण नियमेन अभ्यर्हिता ११ भयाब्धि न स्थाव न वी चिलुं ठितं ॥ ॐ नमो भगवते

तथापि तुल्यवस्योचिते हि नृपतावकीनैः त्वदीयैः युष्मदस्मदोरन्यतरस्यां खञ् च प्रत्ययः। ताव कामामकौ येकवचने इति तावकादेशः। गुणौघैः गुणसमूहैः प्रह्वीकृतं आवर्जितं मे हृदयं निघ्नं त्वदायत्तं अधीनो निघ्न आयत्त इत्यमरः। ननु निस्पृहस्य तव कोयं पक्षपात इत्यत्राह

तथापि निघ्नं नृपतावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः ॥
वीतस्पृहाणामपि मुक्तिभाजां भवंति भव्येषु हि पक्षपाताः १२

वीतेति। वीतस्पृहाणां विरक्तानां मुक्तिभाजां मुमुक्षूणामपीत्यर्थः भवंतीति भव्याः साधवः भव्य गेयेत्यादिना सूत्रेण कर्तरि निपातः तेषु विषये पक्षपाताः स्नेहाः भवंति न तु साध्व नुग्रहो महतां माध्यस्थ्यभंजकः इति भावः १२ त्वत्प्रसादपोतं यदि लभ्यते तदा ॥ नारायण

अथ न परस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दुश्चेष्टामुद्घाटयति। सुतान् इति। यूयं तस्य राज्ञः धृ-
तराष्ट्रस्य सुतान्न किमु सुता एवेत्यर्थः। गुणैः सुयोधनं नातीता नातिक्रान्ता एवेत्यर्थः। कर्तरि क्तः।
अस्त्वत्समगुणसंचयस्त्यागे हेतुर्युष्मासु नास्तीत्यर्थः। उपालंभे कारणमाह। य इति। यो धृतरा-
सुतान्न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः॥ यस्त्यक्तवान्वः स वृथा बलाद्वा मोहं विधत्ते विष
ष्ट्रो वः युष्मान् त्यक्तवान् स वृथा निष्कारणमेव त्यक्तवान् यद्यपि वयं पुत्रा गुणाधिकाश्च न हि कथमसा-
वित्यत आह। बलात् इति। विषयाभिलाषो भोगतृष्णा बलाद्बलात्कारादेव वा स्याद्विकल्पोपमयोरिवा-
र्थेपि समुच्चयमिति विश्वः। मोहमविवेकं विधत्ते विषयाभिलाषातिरिक्तो न कश्चिद्युष्मत्त्यागे हेतुरि-
त्यर्थः। अत्र कारणकार्यसमर्थनार्थान्तरन्यासोऽलंकारः॥७॥

७

जहातु॥ अथ राज्ञ उत्साहवर्धनाय शत्रोर्हानिं सूचयति॥ जहातु इति एवं धृतराष्ट्रमर्थसिद्धिः
कथं न जहातु अपि तु जहात्येवेत्यर्थः। प्रैषातिसर्गप्राप्तकालेषु प्रकृत्याश्चेति प्राप्तकाले लोट्
हानिकालस्तस्य प्राप्त इत्यर्थः। कुतः यो धृतराष्ट्रः संशय्य संदिह्य कर्णादिषु तिष्ठते कर्णा-
दीन्दुर्मन्त्रिणः संदिग्धार्थो निर्णेतृत्वेनावलंबत इत्यर्थः। प्रकाशनस्थेयाख्यायां चेति स्थेयामा-
जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः। असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां प
याख्यायामात्मनेपदं प्रकाशनस्थेयाख्ययोश्चेति तिष्ठत्यस्मिन्निति स्थेयो विवादपदनिर्णे-
ता इति काशिकायां तथा हि असाधुयोगा दुर्जनसंसर्गा जयान्तरायाः जयविघातकाः किंच प्रमा-
थिनीनामुन्मूलनशीलानां विपदां विपत्तीनां पदानि स्थानानि पदं व्यवसितत्राणस्थानलक्ष्मा-
ङ्घ्रिवस्तुषु इत्यमरः न केवलं जयविघातकाः किं त्वनर्थकारिणश्चेत्यर्थः धृतराष्ट्रोऽपि दुर्जनवि-
धेयत्वाद्विनश्यतीत्यर्थः॥ ८

एवं शत्रोरनर्थं स्वयि स्त्वा राज्ञो धीसिद्धिं सूचयति पथ इति रिपूणां समितौ सभायां सभा समितिः संसद इत्यमरः पथश्च्युतायां सन्मार्गात् भ्रष्टायां सत्यां दुरात्मदुःशासनस्य स्त्रीकर्षणप्रहरणसाध्वसभंगीकृतत्वस्यामित्यर्थः चिराय धर्म्यां धर्मादनपेतां धर्मपथ्यार्थन्यायादनपेता इति यप्रत्ययः धुरं भारं दधा

पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय त्वया विपत्स्व
प्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु १५

नेन कृच्छ्रेष्वपि धर्मादचलतेत्यर्थः त्वया विपत्स्वपि विपत्तिः दुःखेष्वविनाशि अत एव रम्यं मनोहरं गुणेषु शांत्यादिषु विषये परमुत्कृष्टं प्रेमाविष्कृतं प्रकटीकृतं दुःसहमपि सोढवता त्वया धुसाकृतमिति भावः १५

विधायेति शम एव एका मुख्या वृत्तिर्यस्य तस्यापरोपतापिन इत्यर्थः भवतश्छलेन कपटेन आत्मने हित आत्मनीनः सन्न भवतीति अनात्मनीनः स्वस्यैवानर्थहेतुरित्यर्थः तं आत्मविश्वजनभोगोत्तरपदात् ख इति यप्रत्ययः विध्वंसं अपकारं विधाय कृत्वा प्रकाशितः प्रख्यापितस्त्वन्मति शीलयोस्तव प्रज्ञाशे

विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन प्रकाशितत्वन्मतिशी
लसाराः कृतोपकारा इव विद्विषस्ते १६

तत सु

वृत्तयोः सारः प्रकर्षो यैस्तथोक्ताः ते तव विद्विषः कृतोपकारा इवोपकुर्वत इव अपकारोप्युपकारायैव संवृत्तस्तद्दौर्जन्यं तव सौजन्यस्य जगति व्यक्तमासीदित्यर्थः विद्यमानस्यापि सुजनस्य गुणश्चंदनदारुण इव परिभव एव प्रचुरीभवतीति भावः १६

१०

अथप्रयोजनांशमाह लभ्येति भवत्वयेत्यर्थः कृत्यानांकर्तरिचेतिषष्ठी धरित्रीविक्रमेणलभ्या प्राप्तव्या नद्विनानचसुलभेत्याह विपक्षस्यशत्रुरपिवीर्यशौर्यमस्त्राण्याग्नेयादीनि बलानिसैन्यानितैर्ज्यायान्प्रशस्यतरोधिकतरइतियावत् ज्याचेतिज्यादेशः अतःप्रक

लभ्याधरित्रीतवविक्रमेणज्यायांश्चवीर्यास्त्रबलैर्विपक्षः अ
तःप्रकर्षायविधिर्विधेयःप्रकर्षतंत्राहिरणेजयश्रीः १७

र्षायाधिक्यायविधिरुपायोविधेयःकर्तव्यः कुतोहियस्माद्रणेजयश्रीप्रकर्षतंत्रा प्रकर्षप्रधानाउत्कर्षाधीना तंत्रंप्रधानेसिद्धांतेइत्यमरः बलिनएवजयनतुदुर्बलस्यइति

१८

अथत्रिरित्यादिनाश्लोकचतुष्टयेनविपक्षस्यजायस्त्वंवर्णयति त्रिःसप्तकृत्वइति त्रिरावृत्तान् सप्तवारान् त्रिःसप्तकृत्वएकविंशतिवारानित्यर्थः त्रिःसप्तशब्दःसुप्सुपेतिसमासः संख्यायाः क्रियाभ्यावृत्तिगणनेकृत्वसुच्प्रत्ययः जगतीपतीनांराज्ञांहन्ताघातकः गुरुःस्वस्यवेदोपदेष्टासमीसद्वइत्यर्थः अतएवसच्छब्दापेक्षकत्वेन तदुक्तंकाव्यप्रकाशे प्रक्रांतप्रसिद्धानुभूतार्थविषयस्तच्छब्दोजमदग्नेरपत्यं

त्रिःसप्तकृत्वोजगतीपतीनांहन्तागुरुर्यस्यसजामदग्न्यः वीर्यावधूतःस्मत
दाविवेदप्रकर्षमाधारवशंगुणानां १८ राम कृष्ण

पुमान्जामदग्न्यः वर्गादिभ्योयत्रितिञ्प्रत्ययः यस्यभीष्मस्यवीर्यावधूतोविक्रमाभिभूतः अंबिकास्वयंवरइत्यर्थः तदाभंगप्राप्तिसमयेगुणानांशौर्यादीनांप्रकर्षमितिशयंम्याधारवशंम्याश्रयाधीनंविवेदविजज्ञे स्यवियायाःस्वशिष्येभीष्मेस्वस्मादपिप्रकर्षाधानदर्शनादितिभावः स्मेतिपादपूरणे स्मपादपूरणेभूतेर्थेचेतिविश्वः १८

यस्मिन्निति यस्मिन् भीष्मविषये अनीश्वरस्य भावो अनैश्वर्यं असामर्थ्यं न लघु चीश्वरक्षेत्रज्ञकुशलनिपु
णानामिति विकल्पान्नञ्‌ पूर्वपदस्य वृद्ध्यभावः तेन कृतव्यलीकः जनितवैलक्ष्यः दुःखवैलक्ष्यव्यलीकइ

॥यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवंप्राप्यइवांतकोपि॥धुन्वन्धनुःकस्य
॥रणेनकुर्यान्मनोभयैकप्रवणंसभीष्मः॥१९॥श्रीकृष्णबलराम॥

तियादवः॥अंतकोपिपराभवंप्राप्तइव॥भीष्मस्यस्वेच्छामरणत्वादंतकोपियपराजितइतिवाकिमुतान्येतिभा
न्येतिभावः॥सभीष्मोरणेधनुर्धुन्वन्नास्फालयन् कस्यमभयैकप्रवणंकं भयएकप्रवणंएकोन्मुखंगरिव
भागवत्समासः॥नकुर्यात्सर्वस्यापिमनसिभयंनकुर्यादित्यर्थः॥१९॥

सृजंतमिति आजौरणे इषुसंहतीर्बाणसंघातान् सृजंतं वर्षंतं मुंचतं कोपज्वलितं कोपेनोद्दीप्तं अतएव
परिस्फुरंत्योलोलाश्च शिखाग्राण्यवजिह्वायस्यतं तथोक्तं जगल्लोकं जिघत्संतं मत्तुमिच्छं

सृजंतमाजाविषुसंहतीर्वसहेतकोपज्वलितंगुरुंकः परिस्फुरल्लोलशिखाग्रजि
ह्वंजगज्जिघत्संतमिवांतवन्हिं २०

तं अद्‌ः सनंताच्छत्प्रत्ययः लटसनोघस्त्लृतीतिघस्लादेशः अंतवन्हिकालाग्निमिवस्थितं
गुरुंद्रोणंवःयुष्माकंमध्येकः सहेतसोढुंकः शक्नुयान्नकोपीत्यर्थः शकिलिङ्‌तिशक्यार्थेलिङ्

२१

अथानंतरंकरणीयमागमनप्रयोजनंचयुग्मेनाह॥ ययेति॥ ययाविद्ययाकरणेनसुदुश्चरमितिसुदुश्चरामितिसुदुश्चरातपस्यांतपश्चर्यां॥ कर्मणेरोमंथतपोभ्यांवर्तिचरोरिति क्यप्॥ अप्रत्ययादिति स्त्रियामप्रत्ययः॥ आचरताकुर्वतापशुपतिंउद्दिश्यतपः कुर्वतइत्यर्थः॥ अतएवसमासादितंप्राप्तंसाधनंपशुपतायस्त्ररूपंएनतेनकपिः हनुमान्केतनंचिन्हंयस्यतेनार्जुने

ययासमासादितसाधनेनसुदुश्चरामाचरतातपस्यां॥ एतेदुरापंसमवाप्यवीर्यमुन्मूलितारःक पिकेतनेन॥ २२

अन्व नेनदुरापंदुर्लभंवीर्यंतेजःसमवाप्यप्राप्यैतेपूर्वोक्ताः भीष्मादयउन्मूलितारः॥ उन्मूलयिष्यंते॥ उन्मूलंतेएव्यतात् कर्मणिलुट् चिण्वदिडागमेतस्यसिद्धवदात्राभावादित्यसिद्धत्वात् रगेनिरं॥ नीढितिनिलोपः नन्वितस्यैवानिष्ठितिनिषेधात् तदुक्तंचिण्वद्वृद्धियुक्तवहंते श्वतत्वंदीर्घश्चोक्तोपिनितिवा चिणिनीरंप्रसिद्धिरित्तयमेलुप्यतेनिर्णिसश्वयंचलि मितोमानिति॥ २२॥

निरीक्ष्येति संरंभेणकोपेननिरस्तंत्याजितंधैर्यंनिर्विकारचित्तत्वंयेनतंतथोक्तं आकारेणैवपरधैर्यापहारिणमित्यर्थः आराधितजामदग्न्यं शुश्रुशितभार्गवजामदग्न्याद्धिगतास्त्ररहस्यमित्यर्थः आराधेयंराधासुतंकर्णं स्त्रीभ्योढक् निरीक्ष्य मृत्योरपिअसंस्तुतेष्वपरिचितेषु संस्तुवेस्यात्सरि

प्रसभं चितइत्यमरः भयेषुपक्षपातःपरिचयोजायेत भवेत् मृत्युरपिअस्मात्बिभीयात् किमुतान्यइति

निरीक्ष्यसंरंभनिरस्तधैर्यंराधेयमाराधितजामदग्न्यं असंस्तुतेषुप्रसभंभयेषु जायेतमृत्योरपिपक्षपातः २१

भावः सभावनायांलोट् अत्रजनिक्रियापेक्षयासमानकर्तृकत्वाभावात्पक्षपातःक्रियापेक्षयासंभावनानिरीक्षेतित्यपनिर्देशः समर्थनीयः प्रधानोपसर्जनभावस्यप्रयोजकमिति व्यतिरेकालंकारः उक्तिविवेककारः अत्रभयसंबंधरहितस्यमृत्योर्भयसंबंधाभिदानादसंबंधेसंबंध

२२ महत्वेति॥हेनृपअहमितिशेषः॥महत्वयोगाय प्रकर्षलाभाय महामहिम्नां माहानुभावानां देवतानां मिंद्रादीनां आराध्यते अनयेति आराधिनी प्रसादयित्री करणाधिकरणयोरोतिल्युट्‌ ङीप्‌॥भूरिधाम्नीं महाप्रभावां धाम देहगृहे त्विट्प्रभावस्थानेजन्मप्रभावयोरिति विश्वः॥अन्नत उपधालोपीनोन्यतरस्यामिति ङीप्‌॥तां विद्यां इन्द्रमंत्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति विद्ययाअमोघत्वोक्तिः प्रदानोचितदानपात्र भूतफलभोक्तृत्व

महत्वयोगायमहामहिम्नामाराधिनींतांनृपदेवतानां॥दातुंप्रदानोचितभूरिधाम्नीमुपागतःसि
द्धिमिवास्मिविद्यां॥२३॥इत्युक्तवंतंव्रजसाधयेतिप्रमाणयन्वाक्यमजातशत्रोः॥प्रसेदिवांसंत
मुपाससादवसन्निवांतेविनयेनजिष्णुः॥२४॥

दस्यदानपात्रत्वोक्तिः दातुमुपागतोस्मि २३ इतीति॥इत्थंइत्युक्तवंतंभाषणं प्रसेदिवांसं प्रसन्नं भाषायांसदवसश्रुवइ तिक्वसुः तं मुनिं जिष्णुरर्जुनोजयनशीलः॥ग्लाजिस्थश्चग्स्नुरितिप्रत्ययः॥व्रजसाधयानुतिष्ठेत्येवंरूपं अजातशत्रोर्ध र्मराजस्यवाक्यमविद्वेषेणशीलत्वादितिसंज्ञा॥वाक्यंप्रमाणयन्‌ तदादेशः संन्नित्यर्थः॥अंतेवसन्‌ छा त्रइव छात्रांतेवासिनौ शिष्येविस्मरः॥विनयेनानौद्धत्येनोपाससाद समीपं प्राप २४

निर्यायेति॥अथवह्निकणावदातास्फुलिंगवदुज्वला देवतासान्निध्यादितिभावः॥विद्याइंद्ररूपमंत्रः दिनादि रम्यात्प्रातःभास्करस्यार्कस्य बिंबादिवमरुषेव्यासस्यमुखान्निर्याय निर्गत्य॥समासेनिजपूर्वेल्यप्‌॥दिदीप्तिरर्कदी प्तिः स्फुरद्विकसत्पद्ममिव पार्थाननं अर्जुनस्य मुखं अभिपेदे प्रविष्टा २५॥योगमिति॥योग्यतमायार्हतमायत स्मैपार्थायअर्जुनायतंवक्ष्यमाणं महिमानं योगं ध्यानविधिंचयोगः सन्नोपायध्यानसंगतियुक्तिष्वित्यमरः॥

निर्यायविद्याथदिनादिरम्याद्विंबादिवाकस्यमुखान्महर्षेः॥पार्थाननंवह्निकणावदातादीप्तिःस्फुरत्
पद्ममिवाभिपेदे २५ योगंचतंयोग्यतमायतस्मैतपःप्रभावाद्वितितारसद्यः॥येनास्यतत्वेषु कृतेव भा
सेसमुन्मिमीलेवचिरायचक्षुः २६

तपःप्रभावात्सद्योवितताररददौ चिरकालं प्राप्यमितिभावः येनयोगेनतत्वेषु प्रकृतिमहदादिषु तथाचप्रकृतिःम हत्‌ अहंकारः मनः पंचतन्मात्राणि पंचबुद्धींद्रियाणि पंचकर्मेंद्रियाणि पंचमहाभूतानि इतिचतुर्विंशतितत्वानि तेषु अवभासे साक्षात्कारे कृते सति अस्यार्जुनस्यचक्षुरक्षि चिराय समुन्मिमीलेवोन्मिमिषितमिवेत्युत्प्रेक्षा योगि यंतस्यार्जुनस्याखिलज्ञानं॥जंतुस्तत्वावभासविरोधस्य दृष्टिलाभस्वाभवदितिभावः २६

२२ आकारमिति ॥ आशंसितं भूरिला भोनेकश्रयः शान्तिः येनतंतथोक्तं ॥ माहाभाग्यस्त्वकमित्यर्थः ॥ अंतःकरणशब्देनतु
२३ वृत्तिरुत्साहोलक्ष्यते ॥ तदनुरूपंतदनुकूलमुत्साहानुगुणव्यापारक्षमभित्यर्थः ॥ आकारंमूर्तिं दधानंतमर्जुनंमुनिव्यो
सौविजयोदयेविजयफलकेतपःसमाधौतायौनियमौसमाधिर्नियमध्यानेजितेचेवसमर्थनइतिविश्वः ॥ नियो
जयिष्यन्नियोजितुमिच्छन्नित्यर्थः ॥ लट्सदितिसप्रत्ययः ॥ इतिवक्ष्यमाणंउवाच २७ ॥ अनेनेति ॥ अनेनस्वेदिष्टेन

आकारमाशंसितभूरिलाभंदधानमंतःकरणानुरूपं ॥ नियोजयिष्यन्विजयोदयेनंतपःसमाधौमुनिरित्युवाच ॥ २७ ॥ अनेनयोगेनविवृद्धतेजानिजांपरस्मैपदवीमयच्छन् ॥ समाचचारोरुपात्तशस्त्रोजपोपवासाभिषवैर्मुनीनां ॥ २८ ॥ करिष्यसेयत्रसुदुश्चराणीप्रसत्तयेगोत्रभिदस्तपांसी ॥ शिलोच्चयंचारुशिलोच्चयंत मेषक्षणान्नेष्यतिगुह्यकस्त्वां ॥ २९ ॥

योगेनोपायेनविवृद्धतेजाः विवृद्धप्रतापः निजांस्वियांपदवींमार्गंपरस्मैअन्यस्मैअयच्छन्परस्याप्रवेश्यमयच्छन्नित्यर्थः ॥ उपात्तशस्त्रोगृहीतायुधएवसन्जपोपवासाभिषवैःस्नानैःध्यायानशयनस्नानेत्यमितिशाश्वतः मुनीनामाचूरमनुष्ठानंसमाचरअनुतिष्ठ २९ ॥ क्षत्रविशेषेनतपःसिद्धिरित्याशयेननतांनिदर्शयन्नाह ॥ करिष्यसइति ॥ यत्रशैलोच्चयपर्वतेगोत्रभिदः इंद्रस्यप्रसत्तयेप्रसादायसुदुश्चराणितयांसिकरिष्यसेचारुशिलोच्चयंगिरिरम्यशिखरंशिलोच्चयंइंद्रकीलरूपअद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयमित्यमरः ॥ तामेषगुह्यकोयक्षः अनंतरमेवास्यपुरस्तादुभविदे

इतीति इतीत्थंमहेंद्रसूनुमर्जुनंब्रुवाणेनउक्तवतेत्यर्थः वर्तमानसमीपेभूतेवर्तमानेवत्सप्रत्ययः ॥ तिरोधानस्यापिविलंबसूचनार्थः तेनमहर्षिणाव्यासेनतिरोबभूवेअंतर्दधेभावेलिट् ॥ राजराजोयक्षः राज्ञोनराधिपः ॥ राजाप्रभौनृपेचंद्रेयक्षेक्षत्रियराजयोरितिविश्वः ॥ तस्यानुचरः पूर्वोक्तयक्षः अस्यमुनेरादेशात्साक्षात्कारस्थानमिवसद्यस्तंअर्जुनाधिष्ठितंप्रदेशमधितस्थौप्रापइत्यर्थः ॥ स्थाविश्वेभ्यासेनचाभ्यासस्येतिषत्वं ३०

इतिब्रुवाणेनमहेंद्रसूनुंमहर्षिणातेनतिरोबभूवे ॥ तंराजराजानुचरस्यसद्यः प्रदेशमादेशइवाधितस्थौ ॥ ३० ॥ कृतानतिर्व्याहृतसांत्ववादेजातस्पृहः पुण्यजनः सजिष्णौ ॥ इयायसख्याविवसंप्रसादंविश्वासयसाशुसतां हियोगः ॥ ३१

कृतेति सपुण्यजनोयक्षः कृतानतिः कृतप्रणामः संव्याहृतसांत्ववादेउक्तप्रियवचने ॥ व्याहारउक्तिर्लपितंइत्यमरः ॥ जिष्णावर्जुनेजातस्पृहेजातानुरागः संसख्यौसुहृदिवअथमित्रंसखासुहृदितियमरः संप्रसादविश्रंभमरः ॥ जिष्णावर्जुनेजातस्पृहेजातानुरागः सन्सख्यौसुहृदिवअथमित्रंसखासुहृदितिसमरः संप्रसादंविश्रंभंविश्वासमियायप्राप ॥ तथाहि ॥ सतांसाधूनांयोगः संगतिराशुविश्वासयतिहि ॥ सामान्येविशेषणसमर्थनरूपार्थांतरन्यासः ॥ ३१ ॥

अथेति॥ आथोह्मभासास्सूर्येणोदयायपुनरुन्मनाय विहीयमानान्कृसज्जमानिनिति तमः शान्तिकरणत्वोक्तिः रहयुतीस्रोव र्णदीप्यमानानितितमः संकोचनेकारणत्वोक्तिः॥ सुमेरुकुंजानिवसुमेरुग्रहणंकुंजानांसौवर्णत्वद्योतनार्थं तेनार्जुनेनोद यायश्रेयसेविलीयमानानिति॥ रहयुतिनेनेकबुद्धिसकाशान् पूर्वं बहिरशोघेरद्वयस्य प्रयोजनमर्जुनेनुसंधेयं॥ पांडु सुतान्नेतवइतिशेषः॥ युधिष्ठिरादीन् स्वेन कृपणे कृतउत्सादितं आलक्ष्मो भउत्सतिर्यस्मात्तथोक्तः॥ तेषांविवे कित्वात्कथंचिल ब्धोदयमित्यर्थः॥ तमःशोकोंधकारश्च॥ तमोंधकारेस्थभानोतमः शोके गुणौतत्रउभयत्रापिविरुद्धः॥ अने

अथोह्मभासे॥ वसुमेरुकुंजान्विहीयमानानुदयायतेन॥ रहयुतीन्दुःखकृतात्मलक्ष्मं तमः शनैः पांडुसुतान्प्रपेदे ३२

अक्षशयालोचितकार्यन्तुनुः प्रेम्णासमानीयविभज्यमानः॥ तुल्याद्विभागाद्विवत्तमनो भिन्नस्त्वातिभारोपिलघुः समेन ३३

मंदप्रपेदे॥ तेषांविवेकित्वादन्विभीतमिवेतिभावः॥ अत्रतमः शब्दस्यश्लिष्टत्वात्श्लेषानुप्रणीतेयमुपमा ३२ असंशये ति॥ असंशयमीदिग्धंयथातथाआलोचितंविचारितं यत्कार्यंतेनकार्येण नुनोनिरस्तइतिलघुत्वेहेतूक्तिः॥ नुदविदोद त्राग्रहीभ्योन्यतरस्या॥ इतिनिष्ठात्वंकार्यगौरवमवलोक्यनिरणइत्यर्थः॥ त थापिप्रेम्णा [illegible] समानीय समानिवक्त्वसपुनराकृष्यविभज्यमानः समभागीक्रियमाणः तुल्येप्रेम्णातुल्यदुःखत्वं भवतीतिभावः॥ सपूर्वोक्तोदुः खमेवेतिभारोदुःखातिभारोपिभारभूतमितिदुःखमित्यर्थः॥ तन्मनो भिन्नैषांचतुर्णांपार्थानांमनो भिन्नस्तुल्याद्विभागादिवपूर्वो कात्समक्रृतासमविभागादिवेत्यर्थः॥ वस्तुतस्तुविवेक दिवेतिभावः॥ पुनर्विभागग्रहणंतस्यहेतोत्सक्षार्थमनुग्रहण मनुवादइत्सदोषः॥ लघुर्मेनेमतः॥ अथेकोनेकधाविभज्यबहुभिरूह्यतेसनोमहानपिभारोलघुर्मन्यतेतद्वदित्यर्थः ३३

अथैवंप्रेम्णा आकृष्यमाणंमपिशोकंविवेकोनिर्जगाममयेत्याह॥ धैर्येणेति॥ धैर्येणतेषांनिसर्गतो निर्विकारचित्तत्वे नतयामहर्षेर्व्यासस्यप्रवर्तकस्वेतिशेषः॥ विश्वासतया श्रद्धावेचनत्वेनेत्यर्थः॥ आरातिप्रभवात् आरातिहेतुकात्तीव्राद् सत्वाउरापान्मन्योः क्रोधाद्वेतो॥ तथार्जुनप्रभावपरिज्ञानाच्चेतिकेचतरं विशेषणमुखेनाह॥ मघोनः सुतअर्जुने वीर्यंचनलोकोत्सादिनाषष्ठीप्रतिषेधः॥ विद्वत्स्कृज्ञानतस्कशतियावत्॥ विदेशतुशतुर्वारत्कारितिविकल्पाद्वत्स्वादेशः तेषुचतुषुपार्थेषुसंशोकः स्थानंस्थितिंनावापं ३४ तानिति॥ तान्पार्थास्त्यकवद्धर्मसुखं॥ शमशांतिसुखानिचेत्समरः

धैर्येणविश्वासतयामहर्षेस्तीव्रादरातिप्रभवाच्चमन्योः॥ वीर्यंचविद्वत्स्कसुतेमघोनःसंतेषुनस्थानमवापशोकः॥ ३४॥

ता भूरिधाम्नश्चतुरोपिहर्तंवीहाययामानिववासरस्य॥ एकायभूतंतदशर्मकृष्णाविभावरींध्वांतमिवाभिपेदे॥ ३५॥

तुषारलेखाकुलितोत्पलाभेपर्यश्रुणीमंगलभंगभीरुः॥ अगूढभावापिविलोकनेसानलोचनेमीलयितुंविषेहे॥ ३६॥

तद्विरुद्धंअशर्मदुःखंन्नितिन ञ्समासः॥ भूरिधाम्नस्तेजस्विनमतिशानिरुतुचोक्तिः॥ चतुरस्तान्पार्थान्नवासरस्यभूरिधाम्नःच तुरोपियामान्प्रहरानिवहरस्त्विहायस्थितां एकायभूतंएकराशिस्थितसंतमिष्यादयः रुत्यादिभिरतिवर्धकधर्मधारयः श्रे ण्यादिषुयाकृतिगणइतिशकन्धयणः॥ कृष्णाविभावरींकृष्णपक्षरात्रिं ध्वांतमिवकृष्णाद्रौपदीप्रपेदे ३५ तुषारेति साद्रौपदी लोकनेः अर्जुनावलोकनेगूढभावोस्याभिप्रायास्फुटाभिप्रायालापइतियावत्॥ भावालीलाक्रियाचेष्टाभस्याभिप्रायजेतुध्ये तिवैजयंती॥ मंगलभंगभीरुःमंगलभंगहानि भीतासतीपर्यश्रुणीपरिगताश्रेवबाष्पवती॥ अमरः॥ चतुषारलेखाकुलितो

आक्रंमेति॥इत्थमनुरर्जुनःक्रिययानिर्वृत्तःकृत्रिमःतद्धितःत्रिरितित्रिः॥कुसुमितिनिमन्त्रयस्त्वद्धितुः प्रेमरसोऽकृत्रिमेण प्रेमरसेनाभिराममन्यत्रप्रेमरसेनमधुरादिनावाभिरामंरमया रमण्यार्पितंदत्तंदृष्टिविलोभयतीतिदृष्टिविलो भिदृष्टिप्रियंदृष्टंदर्शनं॥नपुंसकेभावोक्तः॥मनःप्रसादःप्रसन्नत्वंतदर्थः॥साञ्जलिरिवोपमितिसमासः॥तेनमनःप्र सादाञ्जलिनापथिसाधुपाथेयंशंबलमिवपथ्यतिस्थितंजून्निकामातिशयेनजग्राह॥रामार्पितंपाथेयंपथिक्षेमायभ

अकृत्रिमप्रेमरसाभिरामंरामार्पितंदृष्टिविलोभिदृष्टं॥मनःप्रसादांजलिनानिकामंजग्राहपाथेय मिवेंद्रसूनुः॥२७॥धैर्यावसानेनहृतप्रसादावन्यद्विपेनेवनिदाघसिंधुः॥निरुद्धबाष्पोदयसन्नकंठ मुवाचकृच्छ्रादितिराजपुत्री॥२८॥

तृतीयाशमः॥२७॥धैर्येति वन्यद्विपेनवनगजेनवनगतरंगछं खलद्योतनार्थं निदाघसिंधुः ग्रीष्मनदीवनिपयहृतं दौर्बल्यद्योतनार्थं धैर्यावसादेन धैर्यभ्रंशेनहृतप्रसादाहृतनैर्मल्याक्षोभंगामिनात्मनराजपुत्रीक्षात्रियसुताद्रौपदी अक्षात्रमेवक्ष्यन्तीतिभावः॥निरुद्धबाष्पोदयेसुरुद्धरोदनंसन्नकंठहीनस्वरंतयोर्बहुव्रीह्योःक्रियाविशेषणं योर्विशेषणसमासः॥कृच्छ्रात्कथंचिदितिवक्ष्यमाणमुवाच॥२८॥

१५

श्रीगणेशायनमः ततइति ततः प्रस्थानानंतरं जनप्रियः सोऽर्जुनः कूलहंसाने खलारवे त्कपमितसमासः अन्यत्रकलहं साश्वमेरखलेनिविशेषणसमासः कूजंतीकलहंसमेखलायस्यास्तांसत्पाकेनवनंनरनिसपाकांन्विप कानिनः सस्येराहितः संपो दितः पांडुनेवगुणोयस्यास्तांभुवंआसादितेयौवनंप्रियामिवोपजनंजनसमीपे॰ ल्पत्रसरवीसमक्षांसमीपार्थेऽव्ययीभावः उपाससादे पगतवान्॥ उपमालंकारः १ विनम्रेति सोऽर्जुनो विनम्रशालिप्रसवौघशालिनीरवनतशालिफलस्तंभशोभिनीरपेत

ततः सकूजत्कलहंसनादिनीं सपाककस्याहितपांडुतांगुणां॥ उपाससादोपजनंजनप्रियः प्रियामिवासादितयौवनां भुवं॥ १॥ विनम्रशालिप्रसवौघशालिनीरपेतपंकाः ससरोरुहांभसः॥ ननंदपश्यंनुपसीमसस्थलीरुपायनीभूतशरद्गुणप्रियः॥ २॥

पंकानिष्पंकाससरोरुण्यंभांसियासुतानुथोक्ताउपायिनीभूता अर्जुनंप्रत्युपहारीभूताशरद्गुणप्रियः पूर्वोक्ताः शरद्धर्म संपदोयासुता उपसीमंग्राममसिमासुवित्यर्थेऽव्ययीभावः॥ समासांतविधेरनित्यत्वाद्न श्चेतिसमासांतोऽनभवतीति॥ केचित्तु अन्येषामपि दृश्यत इति दुर्गमग्रामसीमेत्यादिनानपुंसकप्रयोगदर्शनात्नपुंसकादन्यतरस्यामिति विकल्पात्साधुरित्याहुः॥ स्थलीरकृत्रिमभुवः जानपदकुण्डेत्यादिनाकृत्रिमार्थेङीप्॥ पश्यत्ननंदजहर्ष॥ अत्र

निरीक्ष्यमाणाइति॥ विस्मयाकुलैराश्चर्यरसाविष्टैरतएवउन्मीलितान्युन्मिषितानिपद्मान्येवलोचनानियेषांतैः सरोभिः रंभोभिः निरीक्ष्यमाणाउत्संस्थिताः॥ हृतेः प्रियादृष्टिविलासानांविभ्रमः शोभायाभिस्तास्तथोक्ताः॥ इतिमनोहरणहेतुत्वोक्तिः विभ्रमः संशयेभ्रांतोशोभायांचेतिवैजयंती॥ शफरीविवृत्तयोमत्स्य॰॰॰तानिअस्यार्जुनस्यमनोजह्रुः॥ ३॥ तुतोषेति॥ सोऽर्जुनः सवारिजेसकलमेजलेवारिणिजलेकमलस्यशालिविशेषस्यशालयः कलमाद्याः श्चपुंस्त्वमित्यमरः॥ रमणीयस्यभावः राम

निरीक्ष्यमाणाइवविस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः॥ हृतप्रियादृष्टिविलासविभ्रमामनोस्यजह्रुःशफरीविवृत्तयः॥ ३॥ तुतोषपश्यन्कलमस्यसोऽधिकं सवारिजेवारिणिरामणीयकं॥ सुदुर्लभेनार्हतिकोभिनंदितुंप्रकर्षलक्ष्मीमनुरूपसंगमे॥ ४॥

णीयकं॥ योपधाद्गुरूपोत्तमाद्वुञ्॥ तत्पश्यन्नधिकंतुतोष॥ अनुरूपसंगमत्वादितिभावः॥ तथाहि॥ सुदुर्लभेनुरूपसंगमेयोग्यसमागमेलब्धेसतीतिशेषः॥ प्रकर्षलक्ष्मींयोग्यसमागमनिमित्तामुत्कर्षसंपदंअभिनंदितुंकोनार्हतिसर्वोप्यभिनंदित्येवेत्यर्थः॥ सामान्येनविशेषसमर्थनरूपोर्थांतरन्यासः॥ ४॥

नुनोदेति ॥ आविष्कृताभ्रकाशितापेनसंततिः डिंडिरसमूहो यस्य तत्तथोक्तं डिंडिरे ब्धिकफेनः फेनइत्यमरः ॥ अवाप्तः किंज
ल्कविभेदः केसरापगयो येन तत्तथोक्तं ॥ उच्चैः उच्चकैः उच्चैर्यथातथा विवृत्तेन ॥ लुठितेन पाठीनेन मत्स्यविशेषेण पराह
तमाहतं सहस्रदंष्ट्रः पाठीनइत्यमरः ॥ पयः अच्छं तस्यार्जुनस्य स्थलकपद्मिनीगतं तत्तेन उत्थरमित्यर्थः ॥ वितर्कं संशयं नु
नोदस्फोटयामास पाठीनपराहत्या किंजल्कापायिजलदर्शनात् स्थलपद्मिनीशंका निष्टेत्यर्थः ॥ अत्रनिश्चयोत्त

नुनोदतस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंतति ॥ अवाप्तकिंजल्कविभेदमुच्चकैर्विवृत्तपा
ठीनपराहतं पयः ॥ ५ ॥ कृतोर्मिलेखं शिथिलत्वमायता शनैः शनैः शांतरयेण वारिणा ॥ निरीक्ष्य रेमे
ससमुद्रयोषितां तरंगितक्षौमविपांडु सैकतं ॥ ६ ॥

रसंदेहालंकारः ॥ ५ ॥ कृतेति ॥ सोर्जुनः शिथिलत्वमायता गच्छता दिनेदिने क्षीयमाणेनात एव शनैः शनैः शांतरयेणान्य
थोर्मिलेखानुदयादितिभावः ॥ वारिणा कृता ऊर्मयः पर्वाण्येव रेखा राजयो यस्य तत्तथोक्तं ॥ तरंगायस्य संजातास्तरंगि
तं यत्क्षौमं दुकूलं तद्वद्विपांडु शुभ्रं इत्युपमालंकारः ॥ समुद्रयोषितां नदीनां सिकता अस्यसंतीति सैकतं पुलि
नं सिकताशर्कराभ्यां चेत्यणप्रत्ययः ॥ तोयोत्थितं तत्पुलिनं सैकतं सिकतामयमित्यमरः ॥ निरीक्ष्य रेमे तुतोष ॥ ६ ॥

नतः शालिगोपिकां वर्णयति ॥ मनोरममिति ॥ अणुना सूक्ष्मेण केसरेषु किंजल्केषु किंजल्कः केसरेस्त्रियामित्यमरः ॥ योरेणुः
परागः तेन अलंकृतं अतएव मनोरमं मनोरमयतीति मनोरमं ॥ कर्मण्यणित्यण्प्रत्ययः ॥ भ्रुवोरंतरं मध्यं प्रापितं भ्रूमध्ये निवेशि
तमित्यर्थः ॥ बंधुजीवकं बंधुजीवमित्यमरः ॥ अलक्तकताम्रस्यालाक्षारागरक्तस्याधरपल्लवस्य श्रिया शोभया समानयंती
समानं कुर्वतीमिवेत्यर्थः ॥ उत्प्रेक्षालंकारः ॥ ७ ॥

मनोरमंप्रापितमंतरं भ्रुवोरलंकृतं केसररेणुनाणुना ॥ अलक्तताम्राधरपल्लवश्रिया समानयंतीमिव बंधुजीवकं ॥ ७ ॥
नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ ॥ चकासयंतीमरविंदजं रजः परिश्रमांभः पुलके
नसर्पता ॥ ८ ॥

बनेति महानिवेशः ययोस्तौ महानिवेशौ पीवरावित्यर्थः पयोधरौ परितः स्तनयोः समंतादित्यर्थः ॥ अभितः परितः समयानिक
षाहतेप्रतियोगे द्वितीया मुहुराहितं नवातपालोहितं बालातपवत्ताम्रमरविंदजं रजः परागो सर्पता प्रसरता परिश्रमां
भःपुलकेन स्वेदाम्बुदेन चकासयंती ॥ चकास्तेर्ण्यंतात्कर्तरि ङीप् ॥ अलंकरणामलंकुर्वतीतत्रापि बिकसंतीतिभावः ॥ ८ ॥

गतैःखलुलिंभवदुत्कर्षवर्णैःस्वैरकपोलसंश्लेषिविलोचनत्विषाविभूषयंती

कपोलेति॥पुनः कपोलसंश्लेषियद्दवतंसको त्पलेविलोचनत्विषाविभूषयंती माभरणस्याप्या भरणमिति भावः॥ कलमस्यगो पिकागोपायतीति गोपिका शालिगोप्त्रित्यर्थः प्रत्ययः॥ निरीक्ष्य पांडोः सुतेनार्जुनेन शरदः कृतार्थता २ ता साकल्य नत्व लेगुणवरस्यपुंवद्भावावकव्यः॥ मेनेमान्यतेस्म॥ कर्मणिलिट् शरदः स्वगुणसंपत्त्या सिद्धिन योग्यत्वात् कलादिति भावः॥९॥ उपारतइति॥ पश्चिमश्चासौरात्रिश्च विशेषणसमासः अपररात्र इत्यर्थः॥ पूर्वकालादिकपश्चिमं नभइत्यादिवदेकदेशीश शब्दस्यैकदेशशब्दसमाना धिकरण्यादेकदेशेपर्यवसानं ननु पश्चिमरात्रिरित्येकदेशीसमासः॥ तद्विधाके पूर्वापरादि

कपोलसंश्लेषिविलोचनत्विषाविभूषयंतीमवतंसकोत्पलं॥ सुतेनपांडोः कलमस्य गोपिकांनिरीक्ष्यमेने शरदः कृतार्थता ९

उपारताः पश्चिमरात्रिगोचरादपारयंतः पतितुंजवेनगां॥ तमुत्सुकाश्चक्रुरवेक्षणोत्सुकंगवांगणाः प्रस्नुतपीवरोधसः १०

सूत्र पश्चिमशब्दग्रहणादत आह॥ सर्वैकदेशेऽद्दासा देना समासांतोपितस्य पूर्वापरादिसूत्रेकसमासविषयत्वा दिप्रकाश वर्षस्त्वेकदेशीसमाससमेवाश्रित्यसमासांतोपितस्यापूर्वात माच्छत भृग्यं गोव स्थरत्रापिगोचरपरगवां न स्थिरस्थानं नपश्चिमरात्रोयोगोचरस्तस्मादुपारताः संनिवृत्ताः योजवेनगांभुवंपतितुंधावितुंअपारयतः अशक्नुवंतः प्रकाः संनिवृत्ताः योजव स्तुपीवरोधसावत्सस्मरणात् स्वलितापिनाः उत्सुकाः कृ॥ विभाषीनमित्यर्थः उधस्तेनङि: ति स्त्री ग्रहणं कर्तव्यमिति नि यमात्ननानङादेशः॥ उत्सुकावत्सेपुत्कंठिता गवांगणाः तमर्जुनमीक्षणे उत्कं दर्शनलालसंचक्रुः सर्गे पुपशवा रूपवत्त्वादि

भय त्रासैः तिवेजयंती अत्र स्वभावाख्यालंकारः॥ स्वभावोक्तिरलंकारो॥ यथावद्वस्तुवर्णनमितिलक्षणात्॥१०॥

परीतमिति॥ सोर्जुनो क्षावजयेउक्षांतरभंबेसतीजयश्रिया परीतं परिवेष्टितं उच्चैर्नदंतं क्षतसिंधुरोधसं रुग्णंसरित्तटं शरदिभवोशारदः पुष्टिं अवयवोपचयंदधतं गवामधिपतिं महोक्षंवृषं सविग्रहं मूर्तिमंतं दर्पमिवउक्षेक्षाददर्श अपश्यत्॥११॥ विमुच्यमानैरिति॥ हिमानिविशदैः हिमसंघातशुभ्रैः हिमानीहिमसंहतिरिति संमरः॥ इंद्रवरुणेत्यादिनाङीप्रत्ययः नियो गादनमागमश्चैमगवांकदंबकैः समूहैः कर्तृभिः मंथरंमंदं विमुच्यमानैरपि किमुतअशनैरिति भावः॥ अन्नशरन्नदीनांसं

परीतमुक्षावजयेजयश्रियानदंतमुच्चैः क्षतसिंधुरोधसं॥ ददर्शपुष्टिंदधतंसशारदींसविग्रहं दर्पमिवाधिपंगवां॥११

विमुच्यमानैरपितस्यमंथरंगवांहिमानीविशदैःकदंबकैः॥ शरन्नदीनांपुलिनैःकुतूहलंगलद्दुकूलैर्जघनैरिवादधे॥१२

गतान्पशूनांसहजन्मबंधुतांगृहाश्रयंप्रेमवनेषुबिभ्रतः॥ ददर्शगोपानुपधेनुपांडवःकृतानुकारानिवगोभिरार्जवे॥१३॥

संबंधिभिः शब्ददहणंप्रारब्धं निवृत्त्यर्थं तत्रपुलिनदर्शनादितिभावः॥ पुलिनैः कर्तृभिः गलद्दुकूलैर्जघनैरिवतस्यार्जुनस्यकुतूह लंकौतुकमादधे आहितं॥१२॥ गतानिति॥ पांडवोर्जुनः पशूनांगवांसहजन्मानःसोदरास्तएवबंधवस्तेषांभावः बंधुतांगता न्पशुषुसोदराभिमानवंत इत्यर्थः॥ गृहाश्रयंगृहविषयंप्रेमवनेषुबिभ्रतः वनेषुगृहाभिमानवत इत्यर्थः॥ आर्जवेऋजुत्वेविषये गोभिःपशुभिः कृतानुकारानिवानुकृतानिवस्थितानिवृत्ताःसत्तानतानविधेयानित्यर्थः॥ गांपांतीतिगोपाः गोपालाः अतो नुपसर्गेकइतिकप्रत्ययः॥ धेनुपधेनुधेनुसमीपेसमीपार्थेऽव्ययीभावः॥ ददर्शतानत्रक्षानुप्राणितास्वभावोक्तिरलंकारः१३

अथचतुर्भिर्बल्लवीर्नर्तकीसाम्येनवर्णयति ॥ परिभ्रमन्निति ॥ मूर्द्धजाः षट्पदाइवेत्युपमितिसमासः ॥ सरोजचारुभिरित्युपमानुसारात् ॥ परिभ्रमद्भिः चलद्भिर्मूर्द्धजैः षट्पदैः आकुलानितैः दंताकेसराइवइतिपूर्ववत्समासः ॥ स्मितोदयेनदर्शिताः प्रकाशिताः दंतकेसरायेषांतेस्तथोक्तैः चलत्कुंडलरश्मिरंजितैः चलत्कनकवर्णवेष्टनप्रभानुलिप्तैः अतएवनवातपाश्लिष्टबालातपाश्लिष्टयत्सरोजंतद्वत्चारुभिर्मुखैरुपलक्षिताः ॥ १४ ॥ प्रवृद्धेति ॥ प्रवृद्धेनानुरुद्धेननिविनिश्वासेनविकंपिता अधराय।

परिभ्रमन्मूर्धजषट्पदाकुलेस्मितोदयादर्शितदंतकेसरैः ॥ मुखैश्चलत्कुंडलरश्मिरंजितैर्नवातपाश्लिष्टसरोजचारुभिः ॥ १४ ॥ प्रवृद्धनिश्वासविकंपिताधरालताइवप्रस्फुरितैकपल्लवाः ॥ व्यपोढपार्श्वैरपवर्तितत्रिकाविकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥

सांतास्तथोक्ताः ॥ अतएवपरिस्फुरितैकपल्लवाः प्रचलितैकपल्लवाइत्यर्थः ॥ एकचितंसंख्याशब्दस्यकतविशेषेपिश्चार्थत्वंसपर्णादिवदितिकेय्यटः लताइवस्थिताः देवादेकापल्लवस्यापिस्फुरणस्यापिलोकेसंभावउपमेयेवनोपक्षः ॥ किंविष्यायांनिविपरिताग्निवर्तिता निरस्तियावत् ॥ पार्श्वायेषुतैः पाणिवा हारहारिभिः पाणिविक्षेपमनोहरैः अंगेहारोंगविक्षेपइत्यमरः ॥ विकर्षणे मंथनगुणाकर्षणे अपवर्तितत्रिकाः संवलितनितंबाः यपिपृष्ठवंशाधरेत्रिकमित्यमरः ॥ तथापिनितंबलक्ष्यते ॥ १५ ॥ रामचंद्रप्रभोरामचंद्रप्रभोरामचंद्रप्रभोरामचंद्रप्रभोरामचंद्रप्रभोरामचंद्र ॥

व्रजेति ॥ व्रजाजिरेषुगोष्ठांगणांगनेषु अधिकरणेसप्तमी ॥ व्रजोगोष्ठध्वनिवृंदेषुइत्यमरः ॥ अंबुदनादशंकिनीर्गर्जितभ्रमवतीरिति भ्रांतिमदलंकारः ॥ शिखंडिनांयोषितोमयूरीः योषिद्ग्रहणंमौढ्यातिशयात् उन्मदयत्सु उन्मदाः कुर्वत्सु नदत्करोतीतिण्यन्ताच्छतृप्रत्ययः ॥ मथामथनदंडानां वैशाखमंथमंथानोमंथदंडइत्यमरः ॥ विवर्तनेपरिभ्रमणेः मुहुः प्रणुन्नेषुकंपितेषुइतिस्वभावोक्तिः ॥ कुंभेषुकलशेषुमृदंगगंभीरंमंदंनदत्सुस्वनत्सु स्वनत्सु इतिवाद्यसाम्योक्तिः ॥ भावलक्षणेसप्तमीयं १६ ॥ स्तद्वेति ॥ मंथरंमंदमावलिताश्चवलाः पीवराः स्तना

व्रजाजिरेष्वंबुदनादशंकिनीशिखंडिनामुन्मदयत्सुयोषितः ॥ मुहुः प्रणुन्नेषुमथांविवर्तनैर्नदत्सुकुंभेषुमृदंगमंथरं १६ ॥ समंथरावल्गितपीवरस्तनीः परिभ्रमाः क्लांतविलोचनात्पलाः ॥ निरीक्षितुंनोपरराम बल्लवीरधिप्रनृत्ताइववारयोषितः ॥ १७ ॥

यासांतास्तथोक्ताः स्वगोचोपसर्जनादसंयोगोपधादितिङीप् परिश्रमेणाक्लांतानिम्लानानिविलोचनोत्पलानि यासांतास्तथोक्ताः बल्लवीर्गोपीः ॥ गोपेगोपालगोसंख्यगोधुगाभीरबल्लवाइत्यमरः ॥ अभिप्रनृत्तान्नृत्तंप्रवृत्तीः गत्यर्थाकर्मकेत्यादिनाकर्तरिक्तः ॥ गतिबुद्धित्यादिनाभूजा थैभ्यश्चेतिचकारस्तर्तमानार्थत्वं ॥ वारयोषितोवेश्याइव ॥ वारस्त्रीगणिकावेश्याइत्यमरः ॥ सोर्जुनः निरीक्षितुंनोपररामनविरम तिस्म ॥ उपाच्चेकर्मकादितिपरस्मैपदंहेत्वर्थस्तुमन्नव अत्रचतुः श्लोक्यामुपमा ॥ सभावात्यासंसृष्टिः ॥ १७ ॥

यपातेति ॥ सोर्ज्जुनः पूर्वं प्राग्दृषेण्यां जितं तां व कृतां पंक्ति लत्वं जहत स्य जनः ॥ शरदि निष्पं कृत्वेन समरे स्वपेक्षिवसुम
मत्वादिति भावः ॥ जहतेः शत्रुप्रत्ययः ॥ दृषोपभुक्तां निकस्य संपदः दृषभ तो पातसस्य संपन्दिनः सुकृत दृषभेव
षड्स्लमरः ॥ सीमंताइव सीमंता ग्रामाणाग्रपद्धतयः सीमंतवतः कृताः सीमंतिता ॥ मत्वेतात करोति भितिणि विलुन
दृष्ट्वेप्साबान्मतुपौर्लुकः स्कंगोम्बकेः सीमंतिता ॥ सांद्रकर्दमानिभ्रंतयं कायसुतान्बस कर्क संपातेन संततसंचा
रेण पृथूकृतान् पथो मार्गान् पपातजगामेति स्वभावोक्तिः ॥ १८ ॥ जनैरिति सोर्ज्जुनः उपयामं ग्रामेषु विभक्तय

कलापकं ॥ यपात पूर्वं जहतो विजितं तां दृषोपभुक्तांतिकसस्य संपदः ॥ रथां रसीमंतितसांद्रकर्दमान् प्रसक्त
संपातपृथूकृतान्यथः ॥ १८ ॥ जनैरुपग्राममनिंद्यकर्मभिर्विविक्तभावेंगितभूषणैर्वृतः ॥ भृशं ददर्शाश्रममंडपो
पमाः सपुष्पहासाः सनिवेशवीरुधः ॥ १९

यैव्ययीभावः ॥ अनिंद्यकर्मभिः अनिषिद्धवृत्तिभिः वृत्तिश्चकृतकृष्यादिरन्यत्र शिलोञ्छादिभिर्वि विविक्तान्यका
याणि भावाभिप्रायः इंगितचेष्टा भूषणमलंकारस्तेषां येषां ते स्तथोक्तेः जनैर्वृतः अधिष्ठितः अत एवाश्रमेषु
मुनिस्थानेषु ये मंडपास्तदुपमाः ॥ मंडपो स्त्रीजनाश्रयः अः सपुष्पहासाः पुष्पविकाससहिताः तेन सह
स्यादिनाबहुव्रीहिः निवेश विरुधो गृहगुल्मिनीः विरुधो गुल्मिन्या वितति वंज यंती भृशं सादरं ददर्श ॥
उपमालंकारः ॥ १९ ॥

ततस्त्विति ॥ ततः सर्वतोकोपयक्षः शरत्कृतां श्रियं संप्रेक्ष्य दर्शनीयां वर्णनीयां चेत्यर्थः ॥ शक्रुणालोकनेलोलचक्षुषं ॥
लोलश्चलसतृष्णयोरित्यमरः ॥ तमर्ज्जुनं मनोदितापि अपृष्ठोपि गंगवाचंडवाच ॥ तथाहि ॥ इंगितज्ञो भवतः
इंगितं हृतोभवत्यमरः ॥ सज्जनाथसुरउक्तियोग्यकालेनावसीदति ॥ वाचंनयच्छति नास्तृकस्यचिद्दृया
दितिनिषेधस्वनाकांक्षितोक्ति विशयश्रतिभावः ॥ मान्येन विशेषसमर्थनरूपोर्थांतरन्यासः ॥ २० ॥ इयमिति ॥

ततः ससंप्रेक्ष्य शरत्कृतां श्रियं शकृणालोकनलोलचक्षुषं ॥ उवाच यक्षस्तमनोदितोपि गां नहींगितज्ञोव
सरेवसीदति ॥ २० ॥ इयं शिवाया नियतेरिवायतिः कृतार्थयंती जगतः फलैः क्रियाः ॥ जयश्रियं पा
र्थपृथूकरोतु ते शरत्प्रसन्नांबुरनंबुवारिदा २१ ॥

हे पार्थ शिवायाः कल्याणकारिण्या नियतेः शुभावहदैवस्य आयतिः फलदानकालः सेव जगतः क्रियाः कृष्यादिक
र्माणि फलैर्व्रीहेः लाभनिष्पत्तिर्योगिषु बीजभावेधनफलमिति वैजयंती ॥ कृतार्थयंती फलं फलयंती प्रसन्नांबु
निर्मलोदका अनंबुवारिदा निर्जलमेघा अनेन विशेषणद्वयेन यावाप्तश्रियो राकल्यं सूचितं ॥ इयं शरत्ते ज
यश्रियं पृथूकरोतु ॥ आशीरर्थे लोट् ॥ २१ ॥

उपैतीति॥सस्यंव्रीह्यादिकंपरिणामेणपरिपाकेणरम्यतांउपैति॥नदीरनौद्धत्यमगम्यरूपत्वंउपैति॥महीअपं
कतांनिष्पंकत्वंउपैति॥तथाहि॥संप्रतिनवैर्गुणैःपूर्वाकैःशरद्धर्मैःसंस्तवेनपरिचयेनस्थिरंदृढंअपिघनागम
श्रियःप्रावृट्लक्ष्म्याःसंबंधितविषयामित्यर्थः॥प्रेमतिरोहितंनिरर्थकंकृतमित्यर्थः॥गुणंतंत्राःप्रेमाणोन
पस्थिरंतत्राइतिभावः॥२२॥पततीति॥अस्मिन्नभसिविशदाःपतत्रिणोबलाहकाःनपतंतीनप्रसरंती॥

उपैतिसस्यंपरिणामरम्यतांनदीरनौद्धत्यमपंकतांमही॥नवैर्गुणैःसंप्रतिसंस्तवस्थिरंतिरोहि
तंप्रेमघनागमश्रियः॥२२॥पततिनास्मिन्विशदाःपतत्रिणोधृतेंद्रचापानपयोदपंक्तयः॥त
थापिपुष्णातिनभश्रियंपरांनरम्यमाहार्यमपेक्षतेगुणं॥२३॥

धृतेंद्रचापाःपयोदपंक्तयश्चनपतंती॥तथापिअधिकरणाभावेपिनभःपरामुत्कृष्टांश्रियंशोभांपुष्णाति
तथाहि॥रम्यस्वभावसुंदरंवस्तुआहार्यंआरोप्यमाणंनापेक्षतेनेच्छति॥तत्रस्वभावस्यैवसमर्थ
त्वादितिभावः॥अर्थांतरन्यासः॥२३॥रामचंद्रप्रभो॥रामचंद्रप्रभो॥रामचंद्रप्रभो॥ ६७॥ ॥५॥

पांशुभिरिति॥कदंबानीलशब्देनवर्षर्तुरुपलक्ष्यतेसएवभर्तातस्यसंयेविरहेम्लान॰तयानिर्जलत्वयादुर्बलत्वयाचभुवि
पांशुभिस्युतानिरहितानिअचिराभागुणविद्युल्लताएवहेमदामानिसुवर्णसूत्राण्याभरणानिचयेभ्यस्तेपयोध
रैःअंभोदैरेवपयोधरैस्तनैरुपलक्षितानिदामानीतिशेषः॥स्तनंभोदौपयोधराविति वैजयंती॥दिशएववध्वः
स्तासांकृशतानराजइतिकिंतुराजतएवअभियुक्तत्वात्॥आर्तेमुदितेहृष्टाप्रोषितेमलिनाकृशामृतेम्रियेतेया

विपांडुभिर्म्लानतयापयोधरैश्च्युताचिराभागुणहेमदामभिः॥इयंकदंबानिलभर्तुरत्ययेनदिग्वधूनांकृशतानराजते॥२४॥
विहायवांछामुदितेमदात्ययादरक्तकंठस्यरुतेशिखंडिनः॥श्रुतिश्रयत्युन्मदहंसनिस्वनंगुणाःप्रियत्वेधिकृतानसंस्तवाः॥२५

पत्नीसास्त्रीज्ञेयापतिव्रताम्भरणादितिभावः॥सामान्यतःप्रयुक्तेमराजसंकार्श्यस्यानेकनयतत्राद्येद्वितीयेनापि
निषेधयति॥तथाहमानवःसंभाव्यनिषेधनिवर्तनेहेतुप्रतिषेधाविरतिरूपकालंकारः॥स्फुटएव॥२४॥विहायेति॥
यदात्ययात्मदक्षयाद्दरक्तकंठस्याकंठशब्देनतद्भावः॥स्वरोलक्ष्यतेशिखंडिनःसंबंधीन्मुदितेउच्चैःरुतेरुते
कूजितेवांछांश्रवणेच्छांविहायश्रुतिःश्रोत्रंशब्देकर्णेअहोयोत्रश्रुतिःश्रवणंश्रवइत्यमरः॥उन्मदहंसनिस्व
नंमत्तमरालकूजितंश्रयतिरंजनिनिनदकांक्षयापरिचितपरिहारेणापरिचितेप्रीतिःस्कंदयइत्याशंक्यार्था
तरंन्यस्यति॥गुणाइति॥प्रीणातीतिप्रियः॥इगुपधाज्ञाप्रीकिरःकःइतिकप्रत्ययः॥प्रियत्वेप्रीतिकरणत्वेगुणाअधि
कृताःनियुक्ताःसंस्तवाःपरिचयाःनाधिकृताःनसमर्थाइत्यर्थः॥अप्राप्तमेवगुणत्वनपरिचयइत्यर्थः२५॥६७

च० कि०
८

अमीति॥ अमी पृथून् स्तंबान् गुच्छान् बिभ्रतीति पृथुस्तंबभृतः॥ स्तंबो गुच्छस्तृणादिनामित्यमरः॥ फलस्य प्रसवस्य
विपाकेन परिणामेन पिशंगतां गताः शालयो व्रीहिविशेषाः वप्राः भंग्सि केदारा उदके पुंन्नपुंसकयार्वप्र केदारो
क्षेत्रमुच्यत इत्यमरः॥ विकासि विकचं गंधस्पर्षितं ज्ञापितं अस्मितोत्पलं निघ्रातुमाघ्रातुमिव नमंति॥ निघ्रातु
मिव पाठे द्रष्टुमिवेत्यर्थः॥ वर्णस्तु मित्यर्थः॥ निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणमित्यमरः॥ अत्र फलभारान्नि
मितस्य नमनस्यानिघ्राणं फलमुत्प्रेक्षत इति फलोत्प्रेक्षा॥२६॥ चतुर्भिः कलापं आह मृणालिनीनामिति॥ मृणा

अमी पृतुस्तंबभृतः पिशंगतां गता विपाकेन फलस्य शालयः॥ विकासि वप्रा भस्ति गंधसूचितं नमंति निघ्रा
तुमिवासितोत्पलं॥२६॥ मृणालिनामनुरंजितं त्विषा विभिन्नमंभोजपलाशशोभया॥ पयः स्फुरच्छा
लिशिखापिशंगितं द्रुतं धनुःखंडमिवाहिविद्विषा॥२७॥

लिनीनां पद्मिनीनां त्विषा हरिद्वर्णेनेत्यर्थः॥ अनुरंजितं दर्णनामापादितं अथ च अंभोजपलाशशोभया पत्र
लकांत्या अरुण्येनेत्यर्थः विभिन्नं मिश्रं तथा स्फुरच्छालिशिखापिशंगितं स्फुरद्भिः कलमाग्रैः पिंगलीकृतमीत्थंना
नावर्णत्वाद्द्रुतं पलायितमहिविद्विषा वज्रशत्रोः सर्पवैरी वज्रासुरः सर्पहिरिति वैधनुःखंडमिवास्थितं निस्यसमासे
उत्तरपदस्थस्य पत्तिर्विसर्जनीयस्य सत्वे पलापयावत्रारंभः अपदिश्य धावतामित्यंगगीनां संबंधः॥ अत्र धनुःख
डश्रुतस्य लोके प्रसिद्धत्वात् उत्प्रेक्षयैनोपमा॥२७॥ रामचंद्रप्रभो॥ रामचंद्रप्रभो॥ रामचंद्रप्रभो॥ ७॥ ७॥

पांडुरिति॥ विपांडु शुभ्रमनिलोद्धतमनिलेनाक्षिप्तं सततसप्तपलाशानि पर्वसु येषां ते वृक्षाः सप्तपलाशाः क्वचित् सं
ख्याशब्दस्य वृत्ति विषये विप्सार्थत्वं सप्तपर्णादिवदिस्य केः॥ तेषां पुष्पाणि सप्तपलाशानि द्धितहीनं प्रसवे स्त्रीमि
त्यमरः॥ फलेलुगित्यणो लुक् तेषु जातं सप्तपलाशजं रजः परागः संख्यानमुत्तरीयमिव॥ संव्यानमुत्तरीयं चेत्यमरः॥
निरुंधती निर्वारयंती अनाविलानि अकलुषाणि उन्मीलितानि च बाणानि नीलसैरेयकाणि च क्षूंषि यासां तास्तथो
नीलस्त्वर्थंगतो दासीकर्णा तुंदानवाक्यमिति धन्वंतरिः पुष्पाणि हासा इव तैः सह वर्तंत इति सपुष्पहासाः वनराजयो

विपांडुसंव्यानमिवानिलोद्धतं निरुंधतः सप्तपलाशजं रजः॥ अनाविलोन्मीलितबाणचक्षु
षः सपुष्पहासा वनराजियोषितः॥२८॥ अदीपितं वैद्युतजातवेदसा सितांबुदच्छेदतिरो
हितातपं॥ ततांतरं सांद्रखारिसीकरैः शिवं नभोवर्त्म सरोजवायुभिः॥२९॥

योषित इवेति वनराज्यो योषितः॥ ताः आदिश्यत्येत्यन्वयः अत्र संख्यानमिवेत्युपमेव॥ अन्यत्रोपमितं तु समासे
लिंगं यथा कांचित्कन्यवितकालुष्केनाक्षिप्तस्तनांशुकानि रुंधती तद्वदित्यभावः॥२८॥ आदीपीतमित्यमि॥ वैद्युत जात
वेदसा वैद्युताग्निना आदीपीतम प्रकाशितं विद्युत प्रकाशस्य दृष्टिप्रतिधानकत्वात् तद्ग्राहिस्संगुणइतिभावः॥ सितां
बुदच्छेदैः खंडैः तिरोहितातपं न दृष्टिबाधोनाप्यातपबाधइति भावः॥ सांतरखारिसीकरैः रलाबुकणैस्ततांतरं
व्याप्तमध्यं सरोजवायुभिः शिवं रम्यं नभोवर्त्म चापादिश्य धावतामिति स्वभावोक्तिरलंकारः॥२९॥ रामचंद्रप्रभो॥

सितच्छदानामिति ॥ अपदिश्य धावतामितिपूर्वश्लोकस्योक्तं पयः प्रभृतिमपदिश्य धावतां अमीषां सितच्छदानां प
तत्रिणां हंसानां हंसास्तु श्वेतगरुतः चक्रांगा मानसौकसः इत्यमरः ॥ रुतैः शब्दैः ग्रथिता दृढः ग्रथितं तु दृब्धं गुंफितं गा
ढमित्यमरः ॥ वारिदरोधनिर्गताः मेघोपरोधनिर्मुक्ताः अतएवामलाः प्रसन्नाः दिशः परस्परालापं प्रकुर्वत
इव दिशो मेघोपरोधनिर्मुक्ता चिराद्दृष्टसिता इव इतिहंसकूजितव्याजेन परस्परं संलापयंतीवेत्युत्प्रेक्षा ॥ २०॥

सितच्छदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणां ॥ प्रकुर्वते वारिदरोधनिर्गताः प
रस्परालापमिवामला दिशः ॥ २० ॥ विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपं
क्तयः ॥ असक्तमूधांसि पयः क्षरन्त्यमूरुपायना इव नयन्ति धेनवः ॥ २१ ॥

विहारेति ॥ विहारभूमेः परात्रिगोचरादित्यर्थः ॥ आगच्छंत्य इति शेषः अभिघोषं मुत्सुकाः व्रजं प्रत्युत्कंठि
तः वत्सं प्रत्येति भावः ॥ घोषो आभीरपल्ली स्यादित्यमरः ॥ च्युताविश्रुतिताः यूथानां कुलानां पंक्तिः श्रेणिः यं
धायासां तास्तथोक्ताः ॥ सजातीयैः कुलं यूथं त्यमरः ॥ अमूः धेनवः असक्तं प्रतिबन्धं यथा क्षरन्ती वत्सस्मरणा
त्प्रस्नुवंतीत्यर्थः ॥ क्षरन्तेः शत्रुप्रत्ययः ॥ ऊधांसि शरीरेभ्यो अपत्येभ्यो ऊधाय नानीवादितानुषकारिणी त्युत्प्रे
क्षा ॥ नयंति प्रापयंति ॥ यथा लोके कश्चित् प्रवासादित्यमरः ॥ किंचित् खाद्यमानयंति तद्वदिति भावः ॥ २१ ॥

जगदिति ॥ जगत्प्रसूतिर्जगत्कारणं आज्यादिद्वारा विश्वोपकारिणी गौरिति भावः ॥ जगतामेकपावनी मुख्यशो
धिनी व्रजोपकंठं गोष्ठांतिकं ॥ दूरांतिकार्थे द्वितीया चेति उपकंठांतिकाभ्यर्णाभ्यग्राण्यपि तोऽभ्
य इत्यमरः ॥ तनयैरुपेयुषी संगता उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययांतो निपातः ॥ उणि

जगत्प्रसूतिर्जगदेकपावनी व्रजोपकंठं तनयैरुपेयुषी ॥ द्युतिं
समग्रां समितिर्गवामसावुपैति मंत्रैरिव संहिताहुतिः ॥ ३२ ॥

तश्चेति ङीप् असौ गवांसमितिः संहतिः मंत्रैः ऋग्यजुषादिभिः मंत्रैः ऋगादिभिः संहिता योजिता आहुति
रिव समग्रां द्युतिं उपैति आहुतिरिति जगत्प्रसूतिः जगदेकपावनी च अग्नौ प्रास्ताहुतिः सम्
यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मरणात् ॥ ३२ ॥ राम ॥

कृतावधानमिति॥जितर्बर्हिणध्वनौकेकानुकारिणीत्यर्थः।एतेषड्जस्वरप्रायंगायंतीतिमृगाः॥तथाहमातंगः षड्जंमयूरोवदतीति॥गाः यांतीतिगोपाः तेषांभार्याः गोप्यः अतोनुपसर्गेकइतिकप्रत्ययः॥पुंयोगादाख्या यामितिङीष्।ताएवजनः सुरक्तोयोमधुरकंठोयोगोपीजनोबल्लवीजनः तस्यगीतनिस्वनेकृतावधानं एकाग्रचित्तं॥इदंपुरोवर्तिमृगीकदंबकंकर्तृ।भूयसीमतिमहतीजिघत्सांउत्कृष्टमिच्छांअदेसनगाड्

कृतावधानजितबर्हिणध्वनौसुरक्तगोपीजनगीतनिस्वने॥इदंजिघत्सामपहायभूय सीनसस्यमभ्येतिमृगीकदंबकं॥२४॥असावनास्थापरयावधीरितःसरोरुहिण्या शिरसानमन्नपी॥उपैतिशुष्यन्कलमःसहांभसामनोभुवातप्तइवाभिपांडुतां॥२

प्रत्ययः॥लुङ्सनोर्घस्लुदेशः॥अपहायहित्वासस्यंनाभ्येतिनोपैति॥गीतश्रवणासक्तमपिनग्रस यतीत्यर्थः॥२४॥असाविति॥शिरसाजयराग्रभागेनमन्नपिनमन्नपिनास्थापरयानादरप रयासरोरुहिण्यावधीरितोवज्ञातः अंभसाजलचरंभूतेनेतिभावः॥शुष्यन्सकलमःशालिविशे षोमनोभुवस्वकामार्तइवाभिपांडुतामुपैति॥अत्रानास्थापरयेतिसरोरुहिण्याविशेषसामर्थ्यात्प्र

अमीत्ति॥समुद्धृतसरोजरेणुनेतिसारभ्योक्तिःहृतासारकणेनोयातांबुकणेतिशयोक्तिः॥धारासंपातआ सारःसमरः॥वायुनाहृत्वाआकृष्टाअमीशिलीमुखाःभृंगाः आयांतामुपागमेराजादिभयादिगमे श्रद्धरिताउष्कर्मणाम्भोरास्यइवगम्यतेइतिगतिगंतव्यदेशः।देशापायगमेगतिरितिवेजयंती निश्चोत्तुनालनसमर्थाः एकत्रपायोः सर्वतिकिलनानिश्चयादन्यत्रभयपृथत्वादितिभावः॥२५॥

अमीसमुद्धृतसरोजरेणुनाहृताहृतासारकणेनवायुना॥उपागमेदुश्चरिताइवा पदांगतेनंनिश्चेतुमलंशिलीमुखाः॥२५॥मुखैरसौविद्रुमभंगलोहितैःशिखा पिशंगीःकलमस्यबिभ्रती॥शुकावलिर्व्यक्तशिरीषकोमलाधनुश्रियंगोत्रभिदोनुगच्छती॥२६

मुखैरिति॥विद्रुमभंगलोहितैःमुखैः पिशंगीःकलमस्यशिखाशाल्यग्राणिबिभ्रतीव्यक्तशिरीष कोमलाविकसिताशिरीषसवर्णस्यर्थः॥असौशुकावलिःगोत्रभिदेधनुषःश्रियमिंद्रधनुगच्छति अनुकरोतीतिनानाकर्णत्वात्ईदृशधनरिवभास्करूपमालंकारः॥२६॥रामचंद्रप्रभोरामचंद्रप्रभो

इतीति॥ अथ कृत्स्नतस्मिन् पक्षे इतिकथयति सति नाति दूरादनति दूरादिश हरइ सर्य॥ नय अर्थस्य नशब्द स्य सुपसुपेति समासः॥ पिहितो भ्रमरश्मि बिंबस्तिरोहितार्कमंडल इत्यर्थः सौन्तस्यो क्तिः॥ नगाधिराजो हिमाद्रिर्विगलितो जलभारो यस्य पातितथोक्तः अत एव सुकुमासः द्वयोरन्यतरस्य विशेष्यत्व विवक्षा यां विशेषण समासः॥ तेषां विगलितस्तु कुभासो अंबु मुचां निचय इयेयचम पचंद्रमिवदृष्ट शरदृष्टः॥ २७॥ नमिति॥ जिष्णुः सोऽर्जुनः अतनुभिर्महत्तीभिः घनराजिभिः श्यामलाः श्यामिताः उपत्यकांतिकाः आसन्नभू

इतिकथयति तत्र नाति दूराद्दष्टदृष्टशोपिहितोष्मरश्मिबिंबः॥ विगलितजलभारस्तु कुभासो निचय इवांबुमुचां नगाधिराजः॥ २७॥ तमतनुवनराजिश्यामितोपत्यकांतं नगमुपरिहि मानिगौरमासाद्य जिष्णुः॥ अपगतमदरागस्यानुसस्मार लक्ष्मीमसितमधरवासो बिभ्र तः शीरपाणेः॥ २८॥ इति श्री किरातार्जुनीये महाकाव्ये भारविकृतौ शरद्वर्णनं नाम चतुर्थः सर्गः॥

मिभूदेशा यस्य तं तथोक्तं उपत्यका द्रेरासन्नभूमिरूर्ध्वमधित्यकेत्यमरः उपाधिभ्यां त्यकन्नासन्नारूढ योरिति त्यकन्प्रत्ययः॥ उपरि हिमानि हिमसंघातैः गौरधवलं तन्नगं हिमाद्रिमासाद्य अपरक्तानि वृत्ता मदरागो यस्य तस्यासितं नीलमधरवासोऽन्तरीयमिति भावः॥ बिभ्रतः शीरपाणौ यस्य तस्य शी रपाणेः हलायुधस्य सप्तम्युपमानस्य पूर्वपदस्येति बहुव्रीहिः॥ प्रहरणार्थेभ्यः॥ परनिष्ठा सप्तम्यौ

श्रीगणेशायनमः॥ अथहिमवर्णनमारभते॥ ततः पंचदशभिः कुलकेनाह॥ अथेति॥ अथसोर्जुनोमेरुमहीभृतोमहाद्रेः जयायनुअर्थार्थोवानुशब्दोत्र वितर्केनुपृच्छायांकिंतर्केचेत्यमरः॥ रभसावेगः रभसोवेगहर्षयोरित्यमरः॥ विश्वप्रकाशाविति॥ तद्वत्सारभसायाती्व्रोत्कंठतयेयावत् अर्षादित्वादचप्रत्ययः दिगंतानांदिदृक्षयाद्रष्टु

अथजयायनुमेरुमहीभृतोरभसयानुदिगंतदिदृक्षया॥ अभिययोसहिमालयमुच्छ्रितंसमुदितंनविलंघयितुंनभः॥१॥

मिच्छयावानभोविलंघयुतुं अतिक्रमयितुंवासमुदितंसमुत्पतितुमिवास्थितमित्यर्थः॥ कुतः उच्छ्रितंउन्नतंहिमस्यालयमभिययौ॥ अत्रनिर्दृष्टानेकफलजोनेकगुणनिमित्तोउत्तानक्रियोत्प्रेक्षा॥ अचलत्वंजकात्प्रयोगात्प्रतीयमानेपिदकसंक्षेपः॥ द्रुतविलंबितं॥ द्रुतविलंबितमाहनभौभराविति लक्षणात्॥१॥

तपनेति॥ पुनः एकतः एकस्मिन्भागेसार्वविभक्तिकस्तस्त्येकेतपनमंडलेनदीपितंप्रकाशितं अन्यतः अन्यस्मिन्भागेसततेनानिविनेननैशेनतिमिरेनध्वांतमसाकृतंएकत्राह्नाराव्याचान्यत्र संगतमित्यर्थः॥ अतएवपुराग्रेहसितेनहासेनविभिन्नतमिस्रचयंनिरस्ततस्तोयेतथागजचर्म

तपनमंडलदीपितमेकतः सततनैशतमोवृतमन्यतः॥ हसितभिन्नतमिस्रचयंपुरः शिवमिवानुगतंगजचर्मणा॥२॥ याम

णानुगतंपश्चाद्व्याप्तंपश्यातसादृश्ययोरन्वित्यमरः॥ शिवमिवस्थितं॥ तपनतेजः प्रसरोप्यस्यकोणइवकुत्रचित्परिमाप्यतइतिमहत्त्वातिशयोक्तिः॥२॥

क्षितीति ॥ परस्परेऽन्योन्येकर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यात् पूर्वशब्दस्य द्विर्भावः समासवच्च बहुलं यदा समासवत् तथा मेकवचनं वा अन्योन्यशब्दस्यैवत् यथा माघे अन्योन्येषां पुष्करैरामृशन्तमिति ॥ अदृष्टाः परस्परेण ये स्तत्तथोक्ताः क्षितौ नभसि सुरलोके च निवसन्ती निरन्तेरुत्तथोक्ताः भूर्भुवः स्वर्लोकनिवासिभिरित्यर्थः कृतनिकेतं कृतास्पदं अत एव शंभुना विभुतां स्वसा

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ॥ प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शंभुना ॥ समुदितं निचयं ततिरुच्चकैर् लंघयता शरदंबुदसंहतिं ॥ उत्तरार्द्धं ॥ भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना ॥ पूर्वार्द्धं ॥ ॥ ५ ॥

मर्थ्यं प्रथयितुं अभिनिर्मितं जगतां प्रतिनिधिं प्रतिकृतिमिवेत्युत्प्रेक्षा ॥ प्रतिकृतिरर्चा पुंसि प्रतिकृतिरूपमानं स्यादित्यमरः ॥ त्रैलोक्यश्लाघ्योऽयमपरिच्छेद्य श्चेति भावः ॥ भू ॥ भुजगेति ॥ पुनरप्यभुजगराजसितेन शेषाहिधवलेन नभःश्रिता गगनस्पृशा कनककांतिभिः स्वर्णरेखाभिः विराजिताः

२

मणीति ॥ पुनः मणिमयूखचयाः अंशुकानिवयस्यकल्पनीवीनेर्भासुराः सुरवधूभिः परिभुक्ताः लताः गृहाश्च लता गृहायासु ताः तथोक्ताः उच्चानि शिलांतराणि गोपुराणि च शिलांतराणि शिलामध्यानि यासु ताः उदितानि जितानि विकसितानि तानि पुष्पाणां वनानि यासु ताः अत एव पुर इव स्थिताः ॥ भुवोदधतं ॥ भू ॥ अविरतेति ॥ अविरतं अविच्छिन्नं उज्झितं वारि येन तं इत्यर्थः ॥ अत एव विपाण्डुभिः स्तोयैर्विरतीनि न वारि विवि

मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ॥ दधतमुच्चशिलांतरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ भू ॥ अविरतोज्झितवारिविपांडुभिर्विरहितैरचिरद्युतितेजसा ॥ उदितपक्षमिवारतनिस्वनैः पृथुनितंबविलंबिभिरंबुदैः ॥ ६ ॥ राम ॥

पांडुभिः अत एव हिमवत्सदृशत्वं संभवतीति भावः ॥ अचिरद्युतितेजसा विरहितैररतनिस्वनैः प्रशांतगर्जितैः वान्यथा पक्षत्वहानिः स्यादिति भावः ॥ पृथुनितंबविलंबिभिः महाकटकसंगिभिः ॥ कटकोऽस्त्री नितंबोऽद्रेरित्यमरः ॥ अंबुदैरुदितपक्षं संजातपक्षमिव स्थितं प्राक् छिन्नपक्षस्यापि हिमाद्रेर्धवलांबुदसंबंधात् पुनः पक्षोत्थानमुत्प्रेक्षते ॥ ६ ॥ रामचंद्रप्रभो ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥

दधतमिति॥ पुनः आकारः खनिरेषामस्यास्तीत्याकरिणी वनेसाकरिभिराकरगजैः खनिस्त्रियामाकरस्यादित्यमरः करिभिर्गजैः कलभैः क्षतरुणैः समवतारे पुलिनेषु समेष्विषमैः असमैः असदृशैः अनुपमैरित्यर्थः॥ त टैरुपलक्षिताः महिताभसः श्लाघ्योदकाः अतएव विविधेभ्यः कामेभ्यः अवगाहाद्युपभोगेभ्यो हिताः अनु कूलाः चतुर्थ्यर्थ्यादिना समासः॥ स्फुटानि विकासितानि सरोजवनानि यासुताः जवनाः वेगवतीः जवक्र म्येत्यादिना पुनश्चन दीर्दधतं यमकं वृत्तमनुप्रासभेदत्वात्त्वयमेवालंकारः। अथालंकारस्तन्मुच्चयः॥ तस्या

दधतमाकरिभिः करिभिःक्षतैः समवतारसमैरसमैस्तटैः॥ विविधकाममहितामहितांभसः स्फुट सरोजवनाजवनानदीः॥७॥ नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाश्मनां॥ नि हितसांध्यमयूखमिव क्वचित् निचितकांचनभित्तिषु सानुषु॥८॥

पिपुष्करत्वादुत्समोपोरत्नाद्रिपतितनडकं आयशोयमकेचित्रैरत्पुष्टैर्नमृग्यते॥७॥ नवेति पुनश्च नवानि विनि द्राणि च यानि जपाकुसुमानि ताम्रपुष्पिकाकुसुमानि तेषामिव त्विड्यत्विषा येषां रुद्रपुष्पं जपापुष्परूपि काताम्रपुष्पिके तिवाग्भट्टः॥ तेषां द्युतिमतां महाश्मनां मणीनां पद्मरागाणामित्यर्थः विशेषणसाम र्थ्यात्तन्निकरेण समूहेन हेतुना क्वचिन्निचिताः संघटिताः कांचनभित्तयो येषु तेषु सानुषु निहिताः संध्याः

पृथ्वीति॥ पुनश्च पृथुभिः कदंबकदंबकैः नीपनिकुरुंबकैः राजितं कदंबप्रियः सिद्धार्थे निपे च निकुरुंबमेकभय मपि इति विश्वः॥ ग्रथितमालिः बद्धपंक्तिभिः तमालवनैस्तापिच्छवनैराकुलमाकीर्णं तालस्कंधस्तमाल स्यातापिच्छ इत्यमरः॥ लघुतुषारस्तस्यसीकरस्य च तुषारजलं हिमोदकं तत्स्रवतीति तं थोकं तुषारोऽहि मसीकरावित्यमरः॥ अन्येभ्यो दृश्यंतीति क्विप्॥ सदानाः समदाः सदाननाः शोभमानाननाश्च दंति

पृथुकदंबकदंबकराजितं ग्रथितमालतमालवनाकुलं॥ लघुतुषारतुषारजलश्चुतं धृतसदानसदाननदंतिनं॥९॥ रहितरत्नचयान्नशिलोच्चयानपलताभवनानदरीभुवः॥ विपुलिनांबुरुहान नसरिद्वधूरकुसुमान्दधतं नमहीरुहः॥१०

नैस्त्यधतायेननंतथोक्तं॥९॥ रहितेति॥ पुनश्च रहितरत्नचयान् रहितपरिसकारत्नचयोरत्नराशि यैस्तान् शिलोच्चयान् शिखराणि न दधतं अपलताभवनाः लतागृहरहिताः दरीभुवो गुहाप्रदेशान् नदधतं दरीतु कंदरो वास्त्री देवखातबिले गुहेत्यमरः॥ विगतानि पुलिनानि अंबुरुहाणि च यासां ताः सरितो वध्व इव तासरिद्वधून् दधतं अत्र सरितां वध्वौपम्यात् पुलिनानां अंबुरुहाणां वदनजघनौपम्यं गम्यते अ

व्यथिते पुनस्थनिरशनैरनिर्मैर्खलैः सरशनेरित्यर्थः ॥ घनैर्निबिडैरमरलोकवधूजघनैर्व्यथितसिंधुम्नो भिन्नदी
कंभयमपरः सर्ग इति भावः ॥ रम्याश्चते लताश्चवकुलाः केसराश्चदर्पिताः प्रियाः येषां तैः तथोक्तैः विशारदो
मध्यगंधोबकुलसचकेसरी तिर्विधकेफणमस्तांकुलैरभितस्ततव्याप्तंतथावितत विस्तृतं ॥११॥ ससुरेति ॥ अ

॥ व्यथितसिंधुमनीरशनैःशनैरमरलोकवधूजघनैर्घनैः ॥ फलभृतामभितो विततं ततं दर्पित
॥ रम्यलतावकुलैः कुलैः ॥११॥ ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपांडुभिः ॥ अवि
॥ चलं शिखरैरुपबिभ्रतं ध्वनितसूचितमंबुमुचांचयं ॥१२॥ रामचंद्रप्रभो ॥ ॥

नेकाविचित्राः मणिप्रभायेषांतैस्तथोक्तैः हिमेन विपांडुभिः शिखरैः ससुरचापं सेन्द्रचापं अपयो निर्जलत्वात्
एव विशदं श्यतत्र पयो विशदं च अविचलं शिखरशोभास्यादिस्यर्थः ॥ किंतु ध्वनितेन गर्जितेन सूचितं
ज्ञापितं अंबुमुचांचयं उपबिभ्रतं अत्र कविकल्पितसादृश्यात् शिखरमेघसंदेहो मेघध्वनिश्चयांतः ॥ स
देहालंकारः ॥१२॥ रामचंद्र

तिकचेति पुनरूपविकचवारिरुहं नित्यविकासितारविंदमित्यर्थः ॥ इति सामार्थ्यात् कलहंसगणैः सहवर्तत इति सकल
हंसगणं ॥ कादंबः कलहंसः स्यादित्यमरः ॥ यद्वा सकलाः सर्वे हंसगणा यस्मिन् तथोक्तं ॥ शुचिनिर्मलं मानसं मा
नसाख्यं सरो दधतं ॥ किंच कृतेर्ष्यया कृतश्चिनिमित्तात्कोपितयेत्यर्थः ॥ अगात्मजया पार्वत्या सकलहं सविवादं सगणं
सप्रमथगणाः धूम्रमसंख्योध इति वैजयंती ॥ शुचिमानसं अधिनयानि मुकवित्तं शिवं च दधतं एतेन सकलशैल
रणमस्यालं ॥१३॥ दिवमिति ॥ दिवमभितो दिवोऽभिमुखं ॥ अभितः परितः इत्यादिना द्वितीया ॥ अहाध्वस्रोदयो विमाना

विकचवारिरुहं दधतं सरः सकलहंसगणं शुचिमानसं ॥ शिवमगात्मजया च कृतेर्ष्यया सकलहं सगणं
शुचिमानसं ॥१३॥ अरुणविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना ॥ मुहुरनुस्म
रयतमनुक्षपं त्रिपुरदाहमुमापतिसेविनः ॥१४॥

नि दिवयानानि च व्योमयानं विमानोस्त्री इत्यमरः ॥ तान् गणान् ज्वलयता प्रदीप्यतामितांरस्वः ॥ औषधिजनेन
तृणविशेषजन्येन कृशानुना अनुक्षपं वीप्सायामव्ययीभावः ॥ उमापतिसेविनः प्रमथान् इति बुद्धीसादिनाक
र्मत्वं ॥ त्रयाणां पुराणां समाहारस्त्रिपुरं तद्धितार्थेत्यादिना समासः ॥ पात्रादिभ्यः प्रतिषेधो वक्तव्य इति स्त्रीलिं
गप्रतिषेधः ॥ तस्यदाहस्त्रिपुरदाहं मुहुरनुस्मरयंतं ॥ नन्वधिगर्थेत्यादिना दाहमिसत्र षष्ठी किं न स्यात् नस्या

द्योषार्थविधानात् शेषत्वस्यवैवक्षिकत्वादिति
अत्रकाव्यसंमतसादृश्यात्स्मृतीतिस्मरणालंका
रः ॥१४॥

विनेति ॥ विनूतसीकरराशिभिर्विस्फूतसीकरपुंजै रूपस्थितैः कनकपलरोधेन विवर्तिभिरंबुभिर्हेतुना धृतासितव्यजनामिव गृहीतामलचामरामिव स्थितामिवेक्षलेक्षा उन्नतसानुमुसमुद्गतां वहंतीं जान्हवीं गंगां ददर्श ॥ १५ अनुचरेणेति ॥ अथानंतरं मंगलानंतरारंभप्रश्नकालेष्वथो अथ समरः ॥ धनाधिपतेरनुचरेण क्षेत्रेण नगविलोकनविस्मितमानसः सोऽर्जुनो आदरात्प्रियं वचनं जगदे गदितः गदतेर्धर्थस्य उक्तादित्वा

विनतसीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरंबुभिः ॥ दधतमुन्नतसानुसमुद्धृतां धृतसितव्यजनामिव जान्हवीं ॥ १५ ॥ कुलकं ॥ अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः ॥ स जगदे वचनं प्रियमादरान्मुखरतावसरे हि विराजते ॥ १६ ॥ अलमेष विलोकितः प्रजानां सहसा संहतिमंहसां विहंतुं ॥ घनवर्त्म सहस्रधेव कुर्वन् हिमगौरैरचलाधिपः शिरोभिः १७

तस्याधानेकर्मणि लिट् ॥ अपृष्टपरिभाषणदोषं परिहरति ॥ मुखरीति मुखरता वाचालत्वं अपृष्टपरिभाषिता पीनियावत ॥ अवसरे कौतुकावसरसमये राजते हि ॥ आकांक्षितः अपृष्टोपि ब्रूयादिति भावः ॥ १६ अलमिति हिमनगौरैः शुभ्रैः शिरोभिः शिखरैः घनवर्त्म खं सहस्रधा कुर्वन् विपाटयन् इव स्थितः एषोऽचलाधिपो हिमवान् विलोकितः दृष्टमात्र एव प्रजानां सहसा संहतिं पापानां संघातं सहसा विहंतुमलं समर्थः पर्याप्तवचनेष्वलम्

इहेति ॥ इहास्मिन्पर्वते पुरुषैश्च सुतरां भवती सुसुतरं उत्तरमित्यर्थः इतः खलु प्रसयः ॥ अंतरं मध्यभागं तत्संच दुरधिगमैः दुर्लभैरागमैः पुराणादिभिः ॥ किंचेदेवस्तत्तमवर्णयंती नतु कश्चित्सत्सक्षेणापि निःशेषं ज्ञातुमशक्यत्वादिति भावः ॥ किंतु अतिविपिनं अतिगहनं दिग्व्यापिनं अमुं गिरिं पुरुषं परमात्मानमिव परं केवल परमव्ययमिच्छति केवलमिति विभ्व: ॥ पद्मयोनिः परं ब्रह्मेव वदनान्यद्वित्यर्थः ॥ विदोलटोवेतिणवादेशः

इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयंत्यंतरं ॥ अमुमति विपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परं ॥ १८ ॥ रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः ॥ नयति संततमुत्सुकतामयं धृतिमतीरुपकांतमपि स्त्रियः ॥ १९ ॥

अत्रोपमायमयकयोः संसृष्टिः उरगसपतिनीमृवाग्गसमाः १८ रुचिरेति ॥ असौ गिरिः रुचिराणि पल्लवानि पुष्पाणि येषां तत्तथाभूतालतागृहाय एषु तेन तथोक्तैः उपलसज्जलजैः जलराशिभिः सरोभिः उपकांतं कांतसमीपे धृतिमतीधैर्यवतीः समीपस्थानमपि प्रियान्परगणयतीर्मानिनीरित्यर्थः ॥ स्त्रियः संततमुत्सुकतां नयति ॥ तासां मानं शिथिलयंतीत्यर्थः ॥ अथवा उपकांतं धृतिमतीः स्वप्निमतीरपि सुरतलक्षापि पुनरप्युत्कतां नयतीत्यर्थः ॥ उभयत्रापुदीयकत्वातिशयोक्तिर्व्यंजकं ॥ २० ॥ रामदत्तभा ॥ राम ॥

सुलभेति॥ सदानयवतानीतिमता अयवता भाग्यवता च सुलभैर्नान्यैरित्यर्थः॥ अयः शुभावहो विधिरित्यमरः॥ निनां गुह्यकानां च अधिपं कुबेरं रमयंतीति तथोक्तैः कर्मण्यण्॥ परमैरुत्कृष्टैः धनैः करणैः अमुना क्षितिभृता हेतुना अतिभृता पूर्णा सती जगती मही जगती समतीत्य स्वर्गपातालल्लोकवितीय भाति अमानुषैरपि दुर्लभाः संपदोऽत्र संभवंतीति भावः॥ अत्र धनातिभृतेति पदार्थस्य विशेषणगत्या जगदतिक्रमणहेतुत्वोक्त्या काव्यलिंगं त

॥ सुलभैः सदानयवतायवता निधिगुह्यकाधिपरमैः परमैः॥ अमुना धनैः क्षितिभृतातिभृता सम
॥ तीत्य भाति जगती जगती॥ २०॥ अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तु
॥ ला॥ अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः॥ २१॥

स्वयमकेनेसंसृष्टिः प्रमिताक्षरावृत्तं॥ २०॥ अखिलमिति॥ अमुष्य गौरीगुरोर्हिमवतः इदमखिलं त्रयाणां भुवनानां समाहारस्त्रिभुवनं॥ तद्धितार्थेत्यादिसमासः पात्रादिभ्यस्त्रीभावः॥ तुलां साम्यं नैति इति अहं मन्ये यत् अतो जनैरविदितविभवो ज्ञातमाहिमा भवानीपतिः सदारः एनां गिरिमधिवसति अस्मिन्नधिवसतीत्यर्थः उपान्वध्याङ्वसः इति कर्मत्वं अनो धनतेत्रिनेत्र इति भावः॥ प्रभावात्तं स्वरयति रतिकारो रभेतिल्लक्षणात्॥ २१॥ ॥६॥

वितेति॥ वीतेनिवृत्तेजन्मजरसौ यस्य तत् वीतजन्मजरसं तेन जरायाजरसन्यतरस्यामितिजरसादेशः॥ तदंतविधेरिष्टत्वात् सत्वेनस्यादेशबाधकत्वाच्च॥ तथाहि॥ यटाउः सिङः सामिनात्स्यात् इति स्यादेशाब भाषे भाष्यकारतस्वयंसूत्रकारमते यत्तु ज्ञापकात् परत्वा धनं भवेदपिराङ् स्यो नकर्डसिसंभवतीति मतद्वयेपि तत्तुल्य उसियत पूर्वबाधानं परत्वाज्जरसादेशस्तस्मात्स्यादेशबाधनो ज्ञापकयः चणः ङः स्योर्या ------ देशाविनादिति इकाद्दीर्घयोस्तेवे यथ्यंत द्वितो विनाएकसवर्णदीर्घचरकेरूपसिद्धिर्मवेयतः च्यर्थसत्त्वाक्षरस्यागाकुके तत् ज्ञापकफणी स्वातंत्र्याज्जसादेशं जगौ पूर्वस्यबाधनात्सम्मर्थ

वीतजन्मरसः परंशुचि ब्रह्मणः पदमुपैतुमिच्छतां॥ आगमादिव तमोपहादितः संभवंति मतयो भव
छिदः॥ २२॥ ७॥

नेप्रणे च सत्वभाष्यकंय्यपद्यो॥ इफुङ्पवंचासतिषदत्रजेस इति पाठात् इतः कल्पत्वं ब्रह्मज्ञानावज्रं मितमेव ब्रह्मणः परमात्मनः संबंधिनः पदस्वरूपं शुचि शुचिनिष्कलंकं पयत इति पदस्य च पतंतदात्म्यलक्षणं मुक्तिमित्यर्थः॥ उपेतुमामुमिच्छतां मुमुक्षूणां आगमात् शास्त्रादिव तमोपहात् इति तमोपह इति वर्तकाद्दिदर्पके इतमसोरिति ङः प्रत्ययः॥ इतोस्मादद्रेः भवाघ्र दतीति भवच्छिदः संसारनिवर्तकाः सत्कर्हिंसादिनाशी प्रभृतयः तत्वज्ञानानि संभवंति क्षेत्रविशेषस्यापि ज्ञानोपायकत्वादिर्भिशयः नकेवलं भोगभूमिः किंतु मुक्तिक्षेत्रमयं नितासयार्थः॥ रथोद्धतावृत्तं॥ २२॥ ७॥

दिव्यइति॥ अस्मिन्निरोधेचरणलाक्षारागैः सहवर्ततेतथोक्तः धेनुकपुरुषायुतादिबुधेषुस्त्रियाद्दतलस्यस्पर्शवान्रागांकिता इत्यर्थः निपतिताः व्यानतकरणेस्त्रीणामधोमुखत्वाद्भ्रष्टाः पुष्पापीडाः कुसुमशेखराः यासुतास्तथोक्ताः॥ शिखास्वापीड शेखरावित्यमरः॥ पीडभाजोविमर्दभाजो भंगीमतीत्यर्थः॥ भ्रमरयेखोलितादोसर्वतः कंपियरिभ्रमणसंभवादितिभावः कुसुमेप्सिताः कुसुमचिताः भमार्जारादिकरणेषुस्तनभुजावयवानांशय्यानलस्थितत्वात्भाङ्क्ष्वायकुसुमस्ताइत्यर्थः॥ दिव्यस्त्रीणांसंबंधिन्यः शरतेआस्विन्तिशय्याः तस्मानिसंज्ञायांसमजनिषदेत्यादिनाक्यप्॥ रागयातिरगारिदेकोसतियः सांशंसत्रक्षः सुरतविशेषः तंजातावेकवचनंस्सुरतविशेषानित्यर्थः॥ शंसंतिस्त्त्वयंतीत्यर्थः॥ अत्रलाक्षारागादिपदार्थानां सुरतवि

नि दिव्यस्त्रीणांसचरणलाक्षारागारागायानैंपतितपुष्पापीडाः॥ पीडभाजः कुसुमचिताः सांशंसंशंसंत्यस्मिन्नूकरतविशेषशय्याः॥२३॥

शेषंशंसवंप्रतिविशेषणगत्याहेतुत्वोकयाकाव्यलिंगं॥ सयमकेनसंस्ज्यतस्त्रधरमालावृत्तं॥ धेनुकादिबधलक्षणंतुरतिरहस्ये॥ न्यस्तत्रस्तयुगलानिजेपदेयोषिदेतिकरुरुवल्लभा॥ अग्रतोयदिशनैरधोमुखीधेनुकंरुपवदुन्नुतप्रिये॥१॥ स्वेच्छयाभ्रममिवल्लभेप्रियायोषिदाचरतिवल्लभायितं॥ व्यानतेरतमिदंयदिप्रियास्यादधोमुखचतुष्पदाकृतिः॥२॥ तत्कटिंसमिधूरुत्थवल्लभः स्याद्वृषादियमुसंस्थितः स्वयं॥ चक्रवक्रमतिकुंचिताग्रिकाश्रामरंनिजघनेसमुज्जगे॥३॥ सर्वतःकंपितकश्रमोयदिप्रेरवपूर्वमिदमुकमालितं॥ भूगतस्तनभुजास्यमस्तकामुन्नतास्वयमधोमुखीस्त्रियां॥४॥ कामं तिस्वकरस्तष्ठमेलनेवल्लभेकरिपदंतदुच्यते॥ प्रसारितौपाणिपादेशय्यास्पृशिमुखोरसि॥ उन्नतायांस्त्रियांकथांमार्जार

कारिकाविधिविधान
ने॥२३

गुणेति॥ जगतांमहीभृतेजगङ्क्ष्पूज्यमानेमतीव ऋिस्यादिनाकर्तमानिक्तः॥ तस्यवर्तमानवृत्तिषष्ठी॥ अत्रहिवसोयधयः स्तरण्ज्यातीषिनयशालिन्स्थीयतोनीतिसंपन्नेराज्ञिश्रियः संपदइवगुणसंपदाक्षेत्रगुणसंपसाअन्यत्रसंधिविग्रहादिगुणसंपदापरंमहिमानंउभयत्रापिप्रकाशनंसामर्थ्यं अधिगम्यज्वलितुम्रकाशितुंनविरमंतीअविरतंज्वलंतीत्यर्थः॥ अन्यत्रतुरात्राविति भावः॥२०॥ कुररीति॥ इहाद्रौकुररीगणः उत्क्रोशः सुखीसमाविता

गुणसंपदामधिगम्यपरंमहिमानमत्रमहितेजगतां॥ नयशालिनिश्रियइवाधिपतौविरमंतिनज्वलितुमोषधयः॥२०॥ कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलंकमलं॥ इहसिंधवश्चवरणावरणाः करिणांमुदेसनलदानलदाः॥२५॥

मरः॥ कृतरवः तरवः कुसुमैरानताः कमलंजलंसकमलंसपद्मं कमलंजलपद्मयोरितिविश्वः॥ किंचवरणाः वरणद्रुमाः आवरणंयासांताः वरणेवरणेसेतुमित्यमरः॥ सनलदाः सोशिराः मूलेस्योशीरमस्त्रियाम्भूयनलदंसव्यमित्यमरः॥ अनलसंतापंघंतीस्वंउयंतीतिशामयंतीत्यर्थः॥ नलदाः सिंधवः केरिणांमुदेभवंतीतिशेषः॥ नकुत्राप्युक्वैपरीत्यमितिभावः॥२५॥ रामचंद्रप्रभो॥

सादृश्यमिति॥ एतस्मिन्नेद्रेोऽज्ञयनिडुः चूतगंधेसा दृश्यंगतंफुल्लाम्रसादृश्यंमदंजलसेकनमामोदंपरिमलंदधानः अनएलीनालिः संसक्तभृंगः सुरकरिणांकथ्यतेयत्रेतिकाषः। कर्पेण स्थानतुमस्कंधादिरकालिवसा। नातिरिक्ते कालेकोकिलान्मदयति मितांकुरुवः। अत्रवसंतरूपकरणाभावेपिमदास्त्युकये सतिकथनालंकारः॥ तदुक्तं॥ कारणेनविनाकार्योसत्तिस्याविभावतेतिसचूतगंधेःसादृश्यमाधुपमा वा॥ आमोदंदधानंइतिहेतुपदार्थकंकाव्य लिंगेजवांगांगिभावेसंकीर्यते। किंचकोकिलानांमदंगंधेचूतगंधभ्रांत्यात्रांतिमदलंकारोव्यज्यते॥ प्रहर्षणीवृत्तं॥ २६॥

सादृश्यंगतमपनिद्रचूतगंधैरामोदंमदजलसेकजंदधानः॥ एतस्मिन्मदयतिकोकिलानकाले लीनालिः सुरकरिणांकपोलकाषः॥ २६॥ सनाकवनितंनितंबरुचिरंचिरंसुनिनदेनदैर्वृतममुं॥ मताफणवतोवताऽसपरापरास्तवसुधासुधाधिवसति॥ २७॥

सनाकेति॥ अस्मिन्नुद्रेोऽश्रीमतपुनस्थसनाकवनितंसाप्सरसंनितंबैकटकैः रुचिरंसुनिनदैः श्रव्यघोषैः नदैः प्रवाहैः वृतममुममुष्मिन्गिराविसर्थः॥ डुपाडुञ्वयाइःबसशतिकर्मत्वं॥ अवतोधोलोकरक्षकस्यफणवतोनागराजस्य मताइष्टा॥ गतिबुद्धीसादिनावर्तमानेक्तः तयोगात्षष्ठी॥ रसेनपराउत्कृष्टापरास्तवसुधासकभूलोकसुधाऽमृत माधिवसतिअन्यअन्यत्रभूमंडलेकुत्रापिसुधानास्तीत्यर्थः मेरुभ्रांतिबंधोयंगिरिरितिभावः॥ अत्रप्रस्तुतविशेषणे

माम्यर्थाद्धिरुन्नतमस्कप्रतीतिस्थमासा किरलंकारः संस्पर्शकसंज्ञत्वस्फोटनातिकुल २७॥ रामकृष्ण॥

से

श्रीमदिति॥ अस्मिन्नद्रेोऽश्रीमतः हिमवतः लताएवभवनंओषधयःतृणज्योतींषिप्रदीपाः नद्यानिलस्विंदनपल्लवानिसुरतरु किसलयानिएवशय्याः हरिचंदनमाख्यातंगोशीर्षंसुस्यादवेतिविश्वः॥ रतिश्रमनुदः सुरतश्रमहारिणः सरोजवाताः श्चसुरसुंदरीभ्यः क्रियाग्रहणाच्चतुर्थ्युदिवोदिवंअधिगृह्यसादिनाषष्ठीस्मर्तुनदिशंतिविस्मारयंतीत्यर्थः॥ स्वर्गादि ष्यतिरिच्यतेसावितिभावः॥ अत्रपूर्वार्द्धरूपकत्रयंस्फुटमेव॥ २८॥ इष्टार्थमिति॥ इष्टार्थंदृष्टार्थंयथातथेतिविशेष णं॥ अर्थेनसहनित्यसमासः॥ सर्वलिंगता चिरायचिरमभ्यसितपश्चरस्याअतएवयादोविलघनविलोचनायाः जलजं

श्रीमल्लताभवनमोषधयः प्रदीपाः शय्यानवानिलस्विंदनपल्लवानि॥ अस्मिन्नरतिश्रमजितश्च सरोजवाताः स्मर्तुदिशंतिनदिवः सुरसुंदरीभ्यः॥ २८॥ इष्टार्थमंभसिचिरायतनपश्चरस्या यादोविलंघनविलोलविलोचनायाः॥ आलंबताग्रभुजमत्रभवोभवान्याश्च्योतन्निदाघसलिलांगुलिनाकरेण॥

तुविघट्टनचकितेक्षणायाःनसोप्यधिकंदृष्टेयेनयाविलापर्यंस्याइतिभावः॥ यादांसिजलजंतवइत्यमरः॥ भवन्याः॥ २९॥ भवपत्न्याः प्रयोगकालक्षेपायांनिर्देशः इंद्रवकरणभवेत्यादिनाङीपु॥ नुडागमश्चकरेपिदृश्यापिकरस्त्वादयंचासौक रश्चेतिसमानाधिकरणसमासः॥ अतएववामनः॥ हस्ताग्रायहस्तोरुस्तादयोगुणिनोभेदाभेदाभेदाविति॥ नमयंकर भवशिवश्च्योतान्निदाघसलिलाअंगुलिनास्रवत्स्वेदायुलिनेतिस्वालिकादयोतिकरणत्रंगिराबालवत्गृहीतवान् अत्राद्भुता नुतनवृत्तंतस्यप्रत्यक्षवदभिधानाद्भाव्यलंकारः॥ अतीतानागतयत्रप्रत्यक्षवन्निक्षिप्तेअत्यद्भुतार्थकाव्यत्वाद्भविकंतदु

रायतनमितिलक्षणाद्धर्मसंनातिकश्चहुतं॥२९॥

किरातपं॰
९

येनेति॥ देवाश्च असुराश्च देवासुरैः एवं विधः शाश्वतिकमिति नैकवद्भावः॥ यत्र येषां कार्यमेव विरोधः नगो व्याघ्रादिवत् ध्रुवेतिकश्चारुः॥ येन मंदराद्रिणा मथ्यते उडीकृतेति भावः॥ अपविद्धसलिलो प्रक्षिप्तजलः अतएव स्फुटनागसद्मपातालं यस्मिन् सोंबुनिधिरमृतं ममंथे मथितः॥ द्विकर्मकत्वा दुहादित्वाद् अप्रधाने कर्मणि लिट्॥ अदीयते मर्थगुरणी गुणीकृतस्य वासुकेरिर्थः॥ मंथानं मंथनं कुर्वाणेत्र कुर्वाणु वासुकी मिश्रादिभा रतवचनात्॥ व्यावर्तनैर्वेष्टनैः सहितांककृतचिन्हः समंदराद्रिरयं खंव्यालिखन् विपट्यन्निव भातीऽन्वसः

येनापविद्धसलिलः स्फुटनागसद्मा देवासुरैरमृतमंबुनिधिर्ममंथे॥ व्यावर्तनैरहिपतेरयमाहितांकः खंव्यालिखन्निव विभाति समंदराद्रिः॥ ३०॥ नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रैरानीलाभैर्विरचितपरभागारत्नैः॥ ज्योत्स्नाशंकामिह वितरति हंसश्येनी मध्येप्यन्हः स्फटिक-

नुपादेनेनेवलेख्यतोक्षलक्षणादनुत्तपाउरणनिमित्तक्रियास्वरूपेक्षा ३० नीतेति इहाशवशिशिररश्मेरूष्णांशोरुस्रैर्मयूखैः संक्रांतेरितिभावः॥ नीतोच्छ्रायमुत्कर्षं नीता आपिता विस्तारितेत्यर्थः॥ तयाआनीलाभैरसितप्रभैः रत्नैरिंद्रनीलैर्विरचितभागात्संनिधानालब्धोत्कर्षेत्यर्थः॥ हंसश्येनी श्वेतवर्णा विशदस्येपाडुरा इत्यमरः॥ वर्णादनुदात्तोपधात्तोनइति ङीप्येन शब्दोऽरीपूर्वकारस्य नकारः स्फटिकानां राजितानां भित्तयः तासां छाया कांतिः अन्होमध्येमध्यान्हेजोत्स्नाशंकामुहुः वितरतिजोत्स्नाभ्रमं जनयतीति भ्रांतिमदलंकारः॥ ३१॥

दधत इति॥ इहाद्रौ मृदुपततामंदं वहता पवनेन कंपितानि पंकजानि ललितविलासिनीजनस्य भ्रूगतिवत्कुटिले षु इष्टतरंगितेष्वित्यर्थः॥ पयस्सु विलासशालि नृत्तं दधत इव सविलासं नृत्यंतीत्युत्प्रेक्षा॥ पुष्पिताग्रा वृत्तं॥ ३२॥ अस्मिन्निति॥ अस्मिन्निमाद्रौ पिनाकभृता शिवेनाधीरविलोचनायाः चकितदृष्टेः उरगादर्शनादिति भावः॥ ईश्वरायाः गौर्याः केसभासेत्यादिना वृत्त्य स्याद्यौगादिव विवक्षायां ङीप्॥ आबद्धवेपथुः आप्तकंपः इति सात्विकोक्तिः॥ द्विगेथुजितिथुप्रत्ययः॥ विन्यस्तमंगलमहौषधिर्यवांकुरा हि यस्मिन्सः पाणिस्तउरगः परिसरः कौतुकसूत्रं यस्य तेन ओत्र

दधतइव विलासशालिनृत्तं मृदुपतता पवनेन कंपितानि॥ इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयस्सु पंकजानि ३२ अस्मिन्नगृह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोचनायाः॥ विन्यस्तमंगलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः॥ ३३॥ क्रामद्भिर्घनपदवीमनेकसंख्यैस्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः॥ उस्राणां व्यभिचरतीव सप्तसप्तेः पर्यस्यन्निह निचयः सहस्र-

तिसरंहस्तेसूत्रे सोल्यन्यसंज्ञेन इति विश्वः॥ करेण सलिलमगृह्यते तदिदवस्य पार्वती परिणयवरणं इशार्थमित्यत्र लगुरुकि रित्यपानरुतत्यभावीकसेवालंकारः॥ ३३॥ क्रामद्भिरिति॥ घनपदवीमाकाशं क्रामद्भिर्व्याप्नुवानैरनेकसंख्यैः राशिस्त्रैरित्यर्थः॥ क्वचिदनेकवर्णैरिति पाठः वैयर्थ्यात् व्याघाताच्चेति शुचिमणिभ्यः स्फटिकेभ्यः जन्म येषां तैः ज न्मायुत्तरपदबहुव्रीहि व्याधिकरणोपि घ्यइनिवामनः॥ तेजोभिर्विभिन्नो विमिश्रो अतएव पर्यस्यन्प्रसर्पयन् सप्तसप्तेः

व्यधत इति॥ अथ कैलासवर्णनं॥ यस्मिन्कैलासे धनाधिपः कुबेरः पुरां विजयतीति विजेतुः शिवस्य धृतये संतोषायोच्चगोपुरं उन्नतं पुरद्वारं गोपुरमित्यर्थः॥ पुरं अलकाख्यं व्यधत निर्मितवान् अतस्तस्य सखीत्वादिति भावः॥ स कैलास एषः उपांतसर्पिणः प्रांतचारिणो विवस्वतः अकाले अप्रसिद्धे उत्तरकाले सामयं करोतीत्यर्थः॥ वस्तुवस्तुतत्कारणाभावात् व्यंजकयोगा... सक्षा॥ सर्वोपांतिनवर्तितया असंबंधे संबंधलक्षणातिशयोक्त्युपितेति विवेकः॥ अतामिति मकारांतान्मयेस्वरे जतेनापयध्देन षष्ठीसमासः॥ वंशस्थवृत्तं॥ २४॥ ५॥

रगः

व्यधत्त यस्मिन्पुरमुच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः॥ स एष कैलास उपांतसर्पिणः करोत्यकालास्तमयं विवस्वतः॥ २४॥ नानारत्नज्योतिषां सन्निपातैश्छन्नेष्वंतः सानुवप्रांतरेषु॥ बद्धां बद्धां भित्तिशंकाममुष्मिन्नावानावान्मातरिश्वा निहंति॥ २५॥ ५॥

नानारत्नेदिरिति॥ अस्मिन्कैलासे अंतः सानु सानुष्वित्यर्थः॥ विभक्त्यर्थेऽव्ययीभावः नानारत्नज्योतिषां सन्निपातैर्व्यतिकरैः छन्नेषु वादांतशांतेत्यादिना निपातः॥ वप्रांतरेषु कटकांतरेषु बद्धां बद्धां अभिक्ष्ण्यबद्धां दृष्ट्वा माद्यादितामित्यर्थः॥ नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः॥ नित्यमभीक्ष्णमिति काशिका यां एवाप्यदंत्ये भित्तिशंकां भित्तिरित्ति संदेहं आवानावान् अभीक्ष्णमायतन्॥ आङ् पूर्वाद्धातोः शतृप्रत्ययः॥ द्विर्भावादिपूर्ववत्॥ मातर्यंतरिक्ष्वयतीति मातरिश्वा वायुः इति निप्रत्ययः॥ तत्पुरुषे कृति बहुलमिति अलुक् निहंती निवर्तयती॥ वायुसंचाराद्भित्तिभावो वधार्यत इत्यर्थः॥ अत्र निश्चयपित

रम्येति॥ अस्मिन्नद्रौ शादाः शष्पाणि संत्येष्विति शाद्वलाः तेभ्यः शाद्वलेभ्यः शाद्वलं श्यामहरिते समरः॥ रम्यानवद्युतिर्नापैति न गच्छति किंतु नित्यैवेत्यर्थः॥ नलिनीवनानि अनुदिनं सर्वदा श्यामिभवंति न कदाचित् पांडुरीभवंतीत्यर्थः॥ विचित्रैः कुसुमस्तबकैराचितानां व्याप्तानां शाखाभृतां तरूणां पल्लवानि न परिणमंति न जीर्यंतीत्यर्थः॥ अत्र प्रस्तुतस्यैव तद्वस्तुगतकांतिस्थैर्यरूपकार्यस्य वर्णनात् प्रस्तुतमिव कारणं श्रियः साधारणं कैलासस्य महिमा गम्यत इति॥ पर्यायोक्तिरलंकारः॥ तदुक्तं॥ कारणं गम्यते यत्र प्रस्तुतकार्यवर्णनात् प्रस्तुतत्वेन संबंधात् पर्यायोक्तिमुच्यत इति॥ २६॥ परिसरेति॥ इह

रम्यानवद्युतिरपैति न शाद्वलेभ्यः श्यामीभवंत्यनुदिनं नलिनीवनानि॥ अस्मिन्विचित्रकुसुमस्तबकाचितानां शाखाभृतां परिणमंति न पल्लवानि॥ २६॥ परिसरविषयेषु लीढमुक्ताः प्रथमतरं इणरुग्मशंकयामृगीभिः॥ इह नवशुककोमला मणीनां रविकरसंवलिताः फलंति भासः॥ २७॥

द्रौ परिसरविषयेषु पर्यंतदेशेषु विनायौ देश इति निपातः॥ मृगीभिः हरितरुग्णाम शंकया बालतृणभ्रांत्येति भ्रांतिमदलंकारः॥ लीढाः पूर्वमास्वादिताः पश्चान्मुक्ताः॥ अथ परूढेत्यादिनां पूर्वकाल सादिना समानाधिकरणसमासः नवशुकवत् कोमलाः शुकवर्ण इत्यर्थः मणीनां भासा रवेः करैः संवलिताः संभिन्नाः संयेफलंति भूर्च्छति २८

अथ॥श्रीगणेशाय नमः॥अथ पंचभिः पार्थविशेषणं षड्भिः कुलकमाह॥अथेत्यादि॥अयजयलक्ष्मीप्रसाकांक्षानंतरं आपदामुद्धरणक्षमेषु आपन्निवारणसमर्थेषु अस्त्रेषु प्रस्थापनादिषु ताद्दशेषु मित्रेष्विव तिरोहितेषु अंतर्हितेषु सत्सु गुरुणा महता स्वपौरुषेणेव तादृशेन शरासनेन धृतिं धैर्यं अभिपुष्यन् वर्द्धयन् आद्यापि धनुषि पौरुषे च सति कियानयं क्लेश इति धैर्यमवलंबमान इत्यर्थः॥अत एव गुरुश्रीः

अथापदामुद्धरणक्षमेषु मित्रेष्विवास्त्रेषु तिरोहितेषु॥धृतिं गुरुश्री गुरुणाभिपुष्यन्स्वपौरुषेणेव शरासनेन १ भूरिप्रभावेन रणाभियोगात्प्रीतो विजिह्मस्तु नरीपरेण(?)॥स्फुटोऽप्यविस्पष्टवपुः प्रकाशः सर्पन्महाधूम इवाद्रिवन्हिः॥२॥

रुश्रियः प्रवृद्धशोभा संपत्तिः पमा लक्ष्मीः श्रीर्निगद्यत इति शाश्वतः १ भूरीति। पुनश्च भूरिप्रभावेन महानुभावेन सह रणाभियोगात् युद्धलाभात् प्रीतः। रीतियवृत्त्या तु वध्याविजिह्मो विष्णयश्च तथा च स्फुटः दृष्टाः प्रज्वलन्नप्यविस्पष्टो वपुः प्रकाशो यस्य सः कुतः सर्पन्प्रसरन् मलान धूमो यस्य स सर्पन्महाधूमोः द्रिवन्हि

१ तेजइति। पुनश्च परैरहार्यमभेद्यं निजं स्वकीयं महत्तेजो वीर्यं मित्रमिव समाश्रित्य अतएव भीमे भयानके अरिरेव दुर्गं तस्मिन्नरिदुर्गे शत्रुसंकटे अस्खलितप्रभावमचलं शीलं उरु महद्धैर्यं भुजालंबमिव हस्तावष्टंभमिव आसादयन्नाप्नुवंश्च ईदृशे संकटे महावीर्यत्वात् धैर्यं नात्यजन्नित्यर्थः॥ ३॥ वंशेति पुनश्च अभिमानो नाम मत्ता बुद्धिः तद्वत्या विद्यतया कर्मणि क्तः तत्रोपचारः। अभिमानास्पदेनेत्यर्थः। अन्यकुलशीलाद्यभिमानवत्या

तेजः समाश्रित्य परैरहार्य्यं निजं महन्मित्रमिवोरु धैर्यं॥ आसादयन्नस्खलितप्रभावो भीमे भुजालंबमिवारिदुर्गे॥ ३॥ वंशोचितत्वादभिमानवत्या संप्राप्तया संप्रियतामसुभ्यः॥ समक्षमादित्सितया परेण वध्वेव कीर्त्या परितप्यमानः॥ ४॥

वंशोचितत्वात् स्वकुलानुरूपत्वात् असुभ्यः प्राणेभ्योपि संप्रियतां संप्राप्तया परेण शत्रुणा समक्षं अक्ष्णोः समीपे समक्षमग्रतः अव्ययीभावे शरत्प्रभृतिभ्यः इति समासांतः आहर्तुमिष्टतया आदित्सितया आजिहीर्षयेत्यर्थः। आङ्पूर्वाद्दाञो दाने सन्नंतात् कर्मणि क्तः कीर्त्या हेतुना वध्वेव परितप्यमानकं रिपून्

पतिमिति॥ पुनश्च नागानां पतिं हिमवंतमिव बद्धमूलं विपक्षं शत्रुं तरसा बलेनोन्मूलयिष्यन्। किंच त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा उत्तरपदसमासः तस्या वेगइव ईश्वरेण लघुप्रयत्नं यथा तथा निगृहीतवीर्यः प्रतिबद्धशक्तिः पुरा किल हिमाद्रिविदलनाय गगनात्पतितं गंगाप्रवाहं गंगाधरो निजजूटेन निजग्राहेति पौराणिकी कथा एतदूह्यमित्यर्थः ५

पतिं नगानामिव बद्धमूलमुन्मूलयिष्यंस्तरसा विपक्षं॥ लघुप्रयत्नं निगृहीतवीर्यस्त्रिमार्गगावेग इवेश्वरेण ५ संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षागुरुभूषणेषु॥ जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे ६

संस्कारवत्त्वादिति एवंभूतः पार्थः संस्कारवत्त्वात् संस्कारश्चित्ररचना अन्यत्र साधुत्वं। असाधूनां प्रयोगनिषेध्यादिति भावः। अथवा संस्कारो मुसतिः तद्वत्त्वात् ... तारमयस्य प्रयोगः संधानमोक्षादिः शिक्षा अभ्यासः गुणः स्तदाहितो विन्यासः मौर्वी वा। अन्यत्र तु प्रयोगे भियुक्तव्यवहारो शिक्षा अभ्यासः गुणाः स्वस्थानकरण

२ रयो श्लेषप्रसादादयो वा ते भूषणं येषां ते षु यथाभूता थयिषां ते षु यं यार्थेषु अन्यत्र नियमार्थेषु स्मरणं ति हिंसंती ति शराः ते षु जयंत नि र्वाह कत्वात्तदावारकत्व विवक्षायां सप्तमी शब्देषु उपपदे षु भावः प्रवृत्ति निमित्तं सामान्यादिसएवार्थः तमिवा शंसे। आ-श्रंका क्षः शास्ति शंसस्तोरा ङ् पूर्वयोरिछायामात्मनेपदं उपसंख्यानात् यथा शाब्दिकाः शब्दैरर्थं साधयंति। तद्वत् अयं शरैर्जयं साधयितुमिषे स्वर्थः॥ ६॥ भूयइति। भूयः पुनरपि समाधानेन युध्यमानो व्यवस्थापनेन विविद्धृतेजाः प्रवृद्धसंतापः पुरा पुरातनं युं

भूयः समाधानविवृद्धतेजा नैवं पुरा युद्धमिति व्यथावान्॥ सनिर्ववामास्त्रममर्षनुन्नं विषं महानाग इवेक्षणाभ्यां ७ कुलकं

द्धएव मित्यं शंकितस्मादकरं न भवती ति हेतोर्व्यथावान् परितापवान् सो र्जुनः ईक्षणाभ्यां दृष्टिभ्यां महानागो महासर्पो विषमिव अमर्षनुन्नं क्रोधोत्थापितं आशु निर्वामनिर्जगार॥ सा त्विकानां सर्वरससाधारण्या शृंगारे अश्रुदयोकिः स्तंभस्वेदोथरोमांचस्वरभेदोथवेपथुः वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकामताः ७

रथांगेति रथांगविक्रीडितं रथचक्रकूजितं अश्वानां चहेषा हेषितानि पश्यंतु मध्यमश्वानां हेषा हेषा च निस्वन इत्यमरः बृंहतिमत्तद्विपानां बृंहितानि बृंहितं करिगर्जनं इत्यमरः संघर्षयोगादिव स्पर्धाव धादिव मूर्छितानि वृद्धिगतानि सति नपुंसकमनपुंसकेसादिनान पुंसकैकशेषः दुंदुभिनादं निर्घोषं स्वननिन्हादनिर्घोषा इत्यमरः निगृण्हंति

रथांगसंक्रीडितमश्वहेषा बृंहतिमत्तद्विपबृंहितानि संघर्षयोगादिव मूर्छितानि नादन्निगृण्हंतिनदुंदुभीनां ८ अस्मिन्यशः पौरुषलोलुपानामरातिभिः प्रस्फुरसंक्षितानां मूर्छांतिरायं मुहुराछिनत्तिनासारशीतं करिसीकरांभः ९

तिरस्कुर्वंति ८ अस्मिन्निति अस्मिन्रणेयशः पौरुषोयोर्लोलुपानां योधृणां अतएवारातिभिः प्रस्फुरसमुरसि प्रतेरुरसः सप्तमीस्थादितिसमासांतः क्षतानां विद्धानां संबंधिनं मूर्छां वातरव्यो रणएव विघ्नः तं आसारसंतवर्षधाराशीतं धारासंपात आसार इत्यमरः करीणांसीकरएवांभः कर्तृ मुहुः नोछिनत्ति ९

असृङ्नदीनामिति रुधिरनदीनां उपचीयमानैः प्रवर्द्धमानैः अत एव पदवी मार्गं विहरद्भिः विहरातुः संचरां कुर्वद्भिः आश्यानाईषच्छुष्का संयोगादिरातो धातोर्यण्वत् इति श्यायते र्निष्ठा तलं घनाः सान्द्राः तैराश्यानैर्घनैः शोणितौघैः पंकैरिवाप्रायंत जनिनियांति १० परीति इहरणेदंतिदंतैः परिक्षतवक्षसि नभसः पततीं प्रियायाः अंकः उत्सं उत्सरिवशीतां मंदारमालां सुरैर्मुकेनिशेषः प्रियं साहसं येषां तेषां प्रियसाहसानां यतो गजाभियायिन इतिभावः प्र नि

असृङ्नदीनामुपचीयमानैः र्विवर्द्धस्व पदवी ध्वजिन्याः उच्छ्रायमायांति निशोणितौघैः पंकैरिवाश्यानघनैस्तु जनि १० परिक्षितवक्षसि दंतैदंतैः प्रियांकशीतां नभसः पतंतीं नेहर्म मोहं प्रियसाहसानां मंदारमाला तो

विरलीकरोति ११ निषादिसन्नाह मणिप्रभौघैः परीयमाणे करशीकरेण अर्कत्विषोन्मीलितमभ्युदेति नखंडमाखंडलकार्मुकस्य १२

मोहं प्रहार मूर्छां तु विरलीकरोति मंदीकरोति ११ निषादइति करशीकरेण पुष्करतुषारेण परीयमाणे व्याप्यमाणे निषादिनो हस्त्यारोहाः हस्त्यारोहा निषादिन इत्यमरः तेषां सन्नाहाः कवचाः मणिप्रभौघैः रत्नांशुजालैः कस्य तेज सालिषा उन्मीलितं उत्पादितं आखंडल आखंडलकौ कार्मुकखंडे इव इंद्रधनुषः खंडं नाभ्युदेति १२

महीति पक्षवता महीभृतामैनाकेनेव परवारणेन शत्रुगजेन मध्यं विगाह्य भिन्नाः क्षोभिता ध्वजिन्यः सेनाः अर्थान्निधेरापइव विवर्तमानाः भ्रम्यंतः सस्य पदार्थैरीभसौभ्रमइत्यमरः भीमं यथा तन नदंति १३ महारथानामिति प्रतिहस्ति सैन्यं अधिस्यंदाम हाजवाः स्यंदनाय रथायत्र तत्तथा तरसी तुरयस्यदइत्यमरः उत्थितानां प्रस्थितानां महारथानां रथिकविशेषाणां आत्मानं सारथीवाश्वान् रक्षन् युध्येत्तयो नरः महारथसंज्ञस्याद्यारुर्नीतिविशारदा इतिलक्षणात् आमूललूनैः स्थितैः नागहस्तैः अतिम

महीभृता पक्षवतेव भिन्नाविगाह्य मध्यं परवारणेन आवर्तमानाभिनदंति भीमं अपां निधेरापइव ध्वजिन्यः १३
महारथानां प्रतिदंसनीकं मधिस्यदस्यंदनमुत्थितानां आमूललूनैरतिमन्युनेव मातंगहस्तैर्भ्रियते न पंथाः १४
धृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः न बर्हभारः पतितस्य शंकोर्निषादिवक्षःस्थलमातनोति १५

न्युनेव अतिक्रोधेनेवं पंथान ध्रियंते न रुध्यते १४ धृतोत्पलापीड इव ॥ धृतेति पतितस्य वक्षसि मग्नस्य शंकोस्तोमरस्य संबंधी वापुंसि शल्यं शंकुर्ना शार्व नानो मरेस्त्रियामित्यमरः बर्हिभारः तन्मूलबद्धो लांछनपिच्छकलापो धृत उत्पलापीडः कुवलयशेखरो यस्मिन् स प्रियायाः संबंधी शिथिलः श्लथः शिरोरुहाणां कलापः केशकलाप इव निषादिनो हस्त्यारो

५

उत्सृष्टस्त्विति तत्राहवे संप्रहारे कल्पांतरवत् तेषु वीरेषु निरस्तसंख्यं असंख्यं यथा तथा अन्यायवत् इति अंजसा न्याये समरः न

जीवितानि उत्सृष्टस्तेजस्वी लोकत्रयास्वादनलोलाग्रभुजि लाय यस्मिन् तदामने न व्याददाति विघ्नोति आजौ

दीनास्यविहरणे इति निषेधादात्मनेपदं १६ सत्यमेवं तथापि ते किं कुतूहलं तत्राह इयं मम शक्तिश्चतुर्बाराः महारथाः येषु तेषां महतां बलानां वीर्यं आक्षिप्य निरस्य ताराधिप धाम्नि चंद्रतेजसि सूर्यस्येव सौरी सूर्यतिथ्ये सादिनात्रियाय

उत्सृष्टस्संहारइवास्तसंख्यमन्यायं तेजस्विषु जीवितानि लोकत्रयास्वादनलोलजिव्हं न व्याददात्याननमत्र मृत्युः १६ इयं चतुर्बारिमहारथानामाक्षिप्य कीर्तिं महतां बलानां शक्तिर्ममावस्य निहीन युद्धे सौरीव ताराधिपधाम्नि दीप्तिः १७ मायास्विदेषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्यमुताहमन्यः॥ गांडीवमुक्ता हि यया पुरा मे परा क्रमंते न शराः किराते १८

कात्स्न्याय दीप्तिरिह हीन युद्धे अवस्यति अवसीदति एतच्च विरुद्धमसल्लुनामिति कर्मणि धातोर्लुङ् १७ मायेति एषश किरातो मायास्विते देवतो व्यामोहन नाममिति विभ्रमो बुद्धिविपर्ययो वा अथवा मे वीर्यं ध्वस्तं नष्टं नु उताहमन्यः अर्जु नो वाहं ना यस्मात् गांडीवमुक्ता मे शराः पुरा यथा पूर्वं परिपंथिषु द्विषत्सु किराते न पराक्रमंते अप्रतिबंधेन न प्रवर्तंते उपपराभ्यामिति वृत्ताबात्मनेपदं वृत्तिस्सतिबंधः १८

पुंस इति किंच उत्तमस्य पुंस पुरुषोत्तमस्य मध्यमं पदमाकाशं धनुषः प्रणादैः उपसर्गोदात्समासेपि णोपदेशात् तिणत्वं द्विधा कुर्वन्निव विदारयन्निव स्थितः किरातः नूनं यथा तथा भूतो न कथं अस्य पुरुषस्य वेषो यथा भूतः वेष एषः

न एवायं किरातः न स्वरूपप्रभ इत्यर्थः कुतः हि यस्मात् चेष्टा व्यापारः प्रच्छन्नपि गूढमपि स्वरूपं उह्यते तत्र कं यतेनस्या स्वभावाव्यभिचारात् १९ अथ चतुर्भिश्चेष्टामिवाचष्टे धनुरिति धनुःरूपेव प्रतिबंधेनाविद्धे

पुंसः पदं मध्यममच्युतस्य द्विधेव कुर्वन् धनुषः प्रणादैः॥ नूनं तथा नैष यथास्य वेषः प्रच्छन्नमप्यूहयते हि चेष्टा १९ धनुःप्रबंधध्वनितं रुषेव सकृद्विकृष्टावितते व मौर्वी॥ संधानमुत्कर्षमिव व्युदस्य मुष्टेरसंभेद इवापवर्गे २०

देनाध्वनितं ध्वनते कर्तरि क्तः मौर्वी च सकृद्विस्पष्टा विततेव एकवारा कृष्टा कर्षणादेव विततेव स्थिता संधानं बाणासंधानं उत्कर्षं तूणाद् उद्धारं व्युदस्येव वर्जयित्वा किमुत्तर इतिस्त्रीषः अपवर्गे बाणमोक्षेपि मुष्टेर संभेदो असंघट्टनं च मुष्टिबंधविनैव बाणमोक्षः कृत इव हस्तलाघवोक्तिः॥२०॥

अंसाविति किंच असौ अवष्टब्धोऽस्थिरावपि नतौ चतौ अवष्टब्धनतौ शिरोधरायाः कंधरायाः समाधिः संस्थानं रहितप्रयासो यत्नस्य सतयोक्तः निःप्रयास इत्यर्थः ॥ तथा विकारं संजता जितश्रमत्वात् निर्विकारेणेत्यर्थः ॥ मुखेन च शशलांछनस्य इंदोः प्रसादलक्ष्मीः धृता अ संभवोत्संबंधो निदर्शनालंकारः २१ प्रीयत इति ॥ कार्यवशेन प्रयोजनवशेन आगते षु स्थाने षु अवलिढादिस्थानेके

अंसाववष्टब्धनतौ समाधिः शिरोधराया रहितप्रयासः ॥ धृता विकारांस्त्यजता मुखेन प्रसादलक्ष्मीः शशलांछनस्य ॥ २१ प्रीयते कार्यवशागतेषु स्थानेषु विष्टब्धतया न देहः ॥ स्थिरप्रयातेषु ससौष्ठवस्य लक्ष्येषु पातः सदृशः शराणां ॥ २२ ॥

षु विष्टब्धतया स्थिरतया कर्त्र्या देहः न प्रीयते किंतु स्थिर एव तिष्ठतीत्यर्थः ॥ सुष्ठु भावः सौष्ठवं ड त्राद्रिपागतं अरणप्रसयः ससौष्ठकः शराणां पातः च स्थितानि अचलानि प्रयातानि अचलानि तेषु स्थितप्रयातेषु चलाचलेषु लक्ष्येषु विषयेषु सदृशः एकरूप एव २२

परस्येति किंच परस्य विवरे रंध्रे भूयान् अभियोगः उद्यमः आत्मरंध्रेषु सत्यबलात् संरक्षणं गोपनं च अयि अमितिशेषः इदं द्वितयं भीष्मेणापि गुरोरपि संभाव्यं वनेचरेषु संभवत्येव न अतो नायं किरातः किंतु एषः तेद्वेषतिरोहितः कोपि अमानुषपुरुष एवेति भावः २३ अप्राकृतस्येति अप्राकृतस्यो करीत्या असाधारण

परस्य भूयान्विवरेऽभियोगः प्रसह्य संरक्षणमात्मरंध्रे ॥ भीष्मेप्यसंभाव्यमिदं गुरौ वा न संभवत्येव वनेचरेषु २३ अप्राकृतस्याहवदुर्मदस्य निवार्यमस्यास्त्रबलेन वीर्यं ॥ अल्पीयसोप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः ॥ २४

स्य आहवे दुर्मदस्य मत्तस्य किं मायाकिरातस्य वीर्यं अस्त्रबलेन निवार्यं निराकर्तव्यं अत्रास्य महिमा अनिवार्यसत्वस्येति भावः ॥ तथाहि अल्पीयसि अल्पस्यापि आमयतुल्या वृत्तिर्यस्य रोगसमा विजिगीषा यस्य तस्य रिपोः प्रवृद्धिः महापकाराय किंत्वयं महानुभाव इति भावः २४

सरति॥ अहार्यसारः अनिवार्यवीर्यः सोर्जुनः एवं संप्रधार्य निर्धार्य सबलस्य सानुगस्य शात्रोः सारं स त्वं विनेष्यन् पराकरिष्यन् कुतः प्रस्वापनं स्वप्नस्यास्यते शय्यते अनेनेति प्रस्वायनं तदेवास्त्रं ध्वांतं घनान् ह्वः मेघावरुद्धः अर्द्धरात्रो निशीथः अर्द्धं नपुंसकमिति विशेषः अहःसर्वैकदेशेत्यादिना समासांतः रात्रा

सः संप्रधार्यैवमहार्यसारः सारं विनेष्यन् सबलस्य शात्रोः॥ प्रस्वापनास्त्रं द्रुतमाजहार ध्वांतं घनाबद्ध इवार्द्धरात्रः॥२५॥ प्रसक्तदावानलधूमधूम्रा सं रुंधती धाम सहस्ररश्मेः॥ महावनानीव महातमिस्राछायाततानेत्ववेलाम निकीली॥२६

हाराः पुंस इति पुल्लिंगस्य ध्वांतमिवाजहार च कर्ष २५ प्रसक्तेति॥ प्रसक्तः संततो यो दावानलः धूमस्य धूम्रा सहस्ररश्मेः धाम निरुंधती आरण्यती कालीकस्यैव वर्णा जानपदेत्यादिना ङी प्रयायाकीर्तिः इत्रा बलानि महातमिस्रा महतां तमः सहतिः तमिस्रा तु तमस्तोम इति विश्वः॥ महावनानीव ततानव्यानशे २६

आसादितेति तत्प्रथमं यथा तथा प्रसह्यासादिता प्रगल्भताया वर्त्मा अहार्य धार्ष्ट्यस्य पदवीं हरंती सभेव भीमा विदधे गणानां भयंकरी निद्राऽकविशेषण्णा सभा संसेदियगणानां प्रतिभा प्रज्ञा शक्तिः सैव गुणाः तस्य निरासं प्रतिभा स यं विदधे॥२७॥ गुर्वीरिति॥ केचिदुत्तमवंशजत्वात् वंशो वेणुकुले च वंशो वेणौ कुले वर्गे इति विश्वः। गुरूणि महांति स्थिराणि न गुरु स्थिराणि अनुशीलनेन परिचयरूपलेन वितः ज्ञातः सारो बलं येषां ते न गुणैः मौर्वीभिः भिन्नान्वि

आसादितां तत्प्रथमं प्रसह्य प्रगल्भताया पदवीं हरंती॥ सभेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य॥२७॥ गुरुस्थिराण्युत्तमवंशजानि विज्ञातसाराण्यनुशीलतेन॥ केचित्समाश्रित्य गुणान्वितानि सुहृत्कुलानीव धनूंषि तस्थुः॥२८ कृतांतदुर्वृत्त इवापरेषां पुरः प्रतिद्वंद्विनि पांडवास्त्रे॥ अतर्कितं पाणितलान्निपेतुः क्रियाफलानीव तदायुधानि॥२९

तानि धनूंषि सुहृत्कुलानि मित्रकुलानि इव समाश्रित्य तस्थुः स्थिरीयर्यः॥२८॥ कृतांतेति॥ दैवे दुश्चेष्टिते इवेसतिपुरः पांडवास्त्रे प्रतिद्वंद्विनि प्रतिकूलवर्त्तिनि सति तदा अपरेषां आयुधानि क्रियाफलानि कृष्यादिफलानि व अतर्कितं अविचारितमिव पाणितलान्निपेतुः॥२९

कि॰षो॰

अंसेति अभिन्नधैर्यात्तदानीमक्षततधैर्याः स्कंधेषु संश्लेषवतां तरूणां केचित् असंस्खलैः अंसभागैः सह संश्लेषवतां तरूणां स्कंधेषु प्रकांडेषु मदेन मीलंतिनयनानि येषां ते नागा गजा इव स्त्रस्तकरा स्त्रस्तहस्ताः संतः निषेदुः निषण्णाः ३०
तिरोहितेति तिरोहिते चेः किरात मायायाच्छन्ने चंद्रात्मजे भुमूर्धः प्रणम्यमाने तपसां निवासैः सुमेरु वप्रास्रा दिव बिंबमार्कं पितॄणामुच्चै रुदियाय तेजः ३१

असंस्खलैः केचिदभिन्नधैर्याः स्कंधेषु संश्लेषवतां तरूणां ॥ मदेन मीलयन्नयना स्सलीलं नागाइव स्त्रस्तकरा निषेदुः ॥ ३०॥ तिरोहिते दारयत्रां भुमूर्धः प्रणम्यमानं तपसां निवासैः ॥ सुमेरु वप्रादिव बिंबमार्कं पित्रांग मुच्चै रुदियाय तेजः ॥ ३१॥ छायां विनिर्धूय तमोमयीं तां तत्वस्य संवित्तिरिवापविद्यां ॥ ययौ विकासं द्युतिरिंदुमौलेरालोकमभ्यादिशती गणेभ्यः ॥ ३२॥

छायामिति इंदुमौलेः द्युतिः तत्व संवृत्तितत्वज्ञानं अपविद्यां इव तां तमोमयीं छायां निशं विनिर्धूय गणेभ्यः आलोकं वस्तु प्रकाशं विरमति आदिशती वितरंती विकासं विस्तारं ययौ ॥ ३२॥

त्विषामिति ॥ पाटलिताः पाटलीकृताः अंबुवाहा यया सा तथोक्ता पूर्वीकालत्विषां ततिः पूर्वसरी इति इति पूर्वसरीति टप्रत्यये ङीप् ॥ सर्वनम्नो वृत्तिमात्रे पुंवद्भावः संध्या प्रातः संध्येवाह्लसंती तेषां गणानां विलोचनपंकजानि विनिद्रतां विकासं सन्निनाय ॥ ३३॥ पृथगिति ॥ अस्त्र विरामेण प्रस्थापनास्त्रोपयमेण । बुद्धविनिद्रास्त्वेबला

त्विषां ततिः पाटलितांबुवाहा सा सर्वतः पूर्वसरीव संध्या ॥ निनाय तेषां द्रुतमुल्लसंती विनिद्रतां लोचनपंकजानि ॥ ३३॥ पृथग्विधान्यस्त्रविरामबुद्धाः स्त्राणि भूयः प्रतिपेदिरे ते ॥ मुक्तावितानेन बलाहकानां ज्योतींषि रम्या इव दिग्विभागाः ॥ ३४॥ योरुन्ननामेव दिशः प्रसेदुः स्फुटं विसस्त्रे सवितुर्मयूखैः ॥ क्षयं गतायामिव यामवत्यां पुनस्समीयाय दिनं दिनश्रीः ३५॥

हकानां पटले तु मुक्ता अतरण्वरम्या दिग्विभाः दिगंता ज्योतींषि नक्षत्राणीव ज्योतिस्तारा अग्नि ज्वालासु पुंस्त्वेष्वध यासु इति वैजयंती ॥ पृथग्विधानि नानाविधानि अस्त्राणि भूयः प्रपेदिरे ३४ योरिति ॥ तदा यामवत्यां रात्रौ क्षयं गतायां विभातायां इव द्यौः अंतरिक्षं उन्ननामेव ऊर्ध्व मुत्सपातेव इत्युत्प्रेक्षा दिशः प्रसेदुः सवितुर्मयूखैः स्फुटं वितस्ते विस्तृतं भावे लिट् दिनश्रीः पुनः दिनं समीयाय संजग्मे । अत्र वैयधिकरण्येन गुणक्रियासमुच्चयेन समु

किरात
८

महास्त्रेति ॥ भुजवीर्यशाली जिष्णुः अर्जुनः महास्त्रं स्वापनाख्यं दुर्गस्थमिव तस्मिन् महास्त्रदुर्गे दिग्वारणेन दिग्गजेनेव परेण शत्रुणा शिथिलप्रयत्नमल्पप्रयासं यथा तथा रुग्णे भग्ने सति रुजो भंगे कर्मणि क्तः उदितश्चेति निष्ठानत्वं प्रबंधनाय भुजगास्त्रं वया शास्त्रान् प्रजिघाय प्रहितवान् ॥ २५ ॥

महास्त्रदुर्गे शिथिलप्रयत्नं दिग्वारणेनेव परेण रुग्णे ॥ भुजंगमास्त्रं भुजवीर्यशाली निबंधनाय प्रजिघाय जिष्णुः ॥ २६ ॥ जिह्वाशतान्युल्लसयंत्यजस्रं लसत्तडिल्लोलविषानलानि ॥ त्रासान्निरस्ता भुजगेंद्रसेना नभश्चरैस्तत्पदवीं विवव्रे ॥ २७

जस्त्रं

जिह्वेति ॥ लसंतस्तडिल्लोला विद्युच्चंचला विषानला विषाग्नयो येषु तानि जिह्वाशतानि अजस्त्रं उल्लसंती चालयंती भुजगेंद्रसेना नभश्चरैर्निरस्ता तेषां नभश्चराणां पदवीं मार्गं विवव्रे विशेषेण रुरोध ॥ २७ ॥ छ ॥ छ

दिग्नागेति ॥ दिग्नागहस्ताकृतिमुद्वहद्भिर्भोगैः दिक्करिकराकारैः तथा प्रशस्तानि असितरत्नानि इंद्रनीलमणयः तद्वन्नीलैर्भोगैः कायैः उपलक्षिता सर्पावलिरुल्लसंती प्रक्षुभ्यंती नभश्चार्णवस्य स्यतरंगमालेव रराज ॥ रूपकोत्थापितेयमुत्प्रेक्षा २८ निश्वासेति । उदस्मरश्मिः अस्तं गच्छन्निव उन्नमितानि फणामंडलानि येषां तेषां फणवतां सर्पाणां निश्वा निश्वासेषु ये धूमास्तैः रुरुगितां सु जालं यस्य तत्तथोक्तं अत एव विलोचनानां सुखं सुखकरं च पुरस्त्युवास २९ प्रतप्तेति

दिग्नागहस्ताकृतिमुद्वहद्भिर्भोगैः प्रशस्तासितरत्ननीलैः ॥ रराज सर्पावलिरुल्लसंती तरंगमालेव नभोर्णवस्य २८
निश्वासधूमैः स्थगितांशुजालः फणावतामुत्फणमंडलानां ॥ गच्छन्निवास्तं वपुरभ्युवाह विलोचनानां सुखमुष्णरश्मिः २९
प्रतप्तचामीकरभासुरेण दिशः प्रकाशेन पिशंगयंतः ॥ निश्चक्रमुः प्राणहरेक्षणानां ज्वालामहोल्का इव लोचनेभ्यः
आक्षिप्तसंपातमपेतशोभमुद्वह्निधूमाकुलदिग्विभागं ॥ वृतं नभो भोगिकुलैरवस्थां परोपरुद्धस्य पुरस्य भेजे ३१

प्राणहराणीक्षणानि येषां ते प्राणहरेक्षणानां दृष्टिविषाणां लोचनेभ्यः प्रतप्तचामीकरं सुवर्णं तद्वद्भासुरेण भंजभासे मिदीधुरस्य प्रकाशेन ते असौ दिशः पिशंगयंतः ज्वालामहोल्का इव निश्चक्रमुर्निर्जग्मुः ॥ ३० आक्षिप्तेति आक्षिप्तः प्रतिषिद्धः संपातः संचारो यस्मिन् अपेता शोभा यस्मात् उद्वह्निधूमैराकुलादिग्विभागा यस्य तत् एतद्भोगिकुलैर्वृतं छन्नं नभः परोपरुद्धस्य शत्रुवेष्टितस्य पुरस्य भावस्थामिव भेजे उक्तशीसानत्साधर्म्यमासमिस

पक्षिणां पतिः त्रिविधः तं च चक्षुःश्रवसां सर्पाणां समूहं ताक्ष्योदयकारणेन गरुडाविर्भावहेतुना अस्त्रेण नेता नायकोनयेन नीत्या परेषां सुपजापं परोपजापं परकृतं स्वमण्डलभेदमिव भेदोपजापानुपधे स्मरः निवारयामास ~७२ प्रतीति द्युलोकभाजाम पिअनिमिषाणामपि कृतं मीलितं निमेषो येषां तानि लोचनानि दृष्टिप्रति

तमाशु चक्षुश्रवसां समूहमस्त्रेण ताक्ष्योदयकारणेन ॥ नेता नयेनेव परोपजापं निवारयामास पतिः पशूनां ॥७२॥ प्रतिघ्नतीभिः क्षणमीलितानि द्युलोकभाजामपि लोचनानि ॥ गरुत्मतां संहतिभिर्विहाय क्षणप्रकाशाभिरिवावतेने ~७३ ततः सुपर्णव्रजपक्षजन्मा नानागतिर्मण्डलयन् जवेन ॥ जरत्तृणानीव वियन्निनाय वनस्पतीनां गहनानि वायुः ~७४॥

बध्नतीभिः प्रतिघ्नतीभिः प्रतिबध्नतीभिः शातरिङ्गीपूगरुत्मतां ताक्ष्याणां संहतिभिः क्षणप्रकाशाभिः विद्युद्भिरिव तासां सौवर्णत्वादिति भावः ॥ विहायोन्तरिक्षं अवतेने व्यानश्रे ~७३ ततइति ततः सुपर्णव्रजानां ताक्ष्यकुलानां पक्षेभ्यो जन्म यस्य सः नानागतिः चित्रगतिः वायुर्वनस्पतीनां वृक्षाणां गहनानि जरत्तृणानीव जवेन मं

मनः शिलेति ॥ मनःशिला धातुविशेषः तस्या भङ्गः छेदः तन्निभेन तत्सादृश्येन भासां निचयेन कान्तिपुञ्जेन पश्चाद्भागे निरुध्यमानं आश्रीयमाणं व्यूढैर्विस्तीर्णैः उरोभिश्च विनुद्यमानं प्रेर्यमाणं नभः खगानां पुरः ससर्पेव प्रससार वपुरुत्तरोत्तरदेशैस्तिरोधानेन गच्छतां खगानां अपूर्वोपि पुरोभागः सादृश्यात् पूर्वमेव उपलभ्यमानतया स एवेनोदितात्पुरः प्रसक्त इत्युत्प्रेक्षा ~७५ दरीति ॥ जवानिलेन घूर्णितानि भ्रमितानि सानुजालानि यस्य स हि

मनःशिलाभङ्गनिभेन पश्चान्निरुध्यमानं निकरेण भासां ॥ व्यूढैरुरोभिश्च विनुद्यमानं नभः ससर्पेव पुरः खगानां ~७५ दरीमुखैरासवरागताम्रं विकासिरुक्मच्छदधाम पीत्वा ॥ जवानिलाघूर्णितसानुजालो हिमाचलः क्षीब इवाचकम्पे ~७६ प्रवृत्तनक्तंदिवसंधिदीप्तैर्नभस्तलं गां च पिशङ्गयद्भिः ॥ अन्तर्हितार्कैः परितः पतद्भिश्छायाः समाचिक्षिपिरे वनानां ~७७

माचल आसवस्य रागो रक्तता तेन हृत्ताम्रं गुणयोरेवोपमानोपमेयभावः विकासि विकस्वरं रुक्मच्छदाः सुवर्णपक्षाः ताक्ष्यास्तेषां धाम तेजः दरीमुखैरेव दरीमुखैः पीत्वा क्षीबो मत्त इव आचकम्पे चचाल ॥ उपमानुप्राणितेयमुत्प्रेक्षा ~७६ प्रवृत्तेति ॥ नक्तं च दिवा च नक्तंदिवं अचतुरेत्यादिना समासान्तः द्वन्द्वैकवद्भावनिपातिसमासान्तः ॥ लक्षणया अहोरात्रमात्रवाची ॥ प्रवृत्तः प्रादुर्भूतो यो नक्तंदिवस्य संधिः संध्या तद्वद्दीप्तैर्नभस्तलं गां च भुवं च पिशङ्गयद्भिः पिशङ्गं कुर्वद्भिः अन्तर्हितोर्को यैस्तैः पतद्भिः पक्षिभिः परितो वनानां छायाः समाचिक्षिपिरे ॥ अन्तर्बहिश्च तेजः प्रवेशात्कोप्यं

संयं तू वियं दंता स्त्रिंशानिनाय ॥७४॥

ष्ठीणानी दृष्टवर्द्धं ७८

संज्ञेति॥ सभो गिसंघः सर्पसमूहः उग्रधाम्नां विनतासुतानां ताक्ष्यार्णां मैन्येन महाध्वरे महाक्रतौ विध्यपचारः कर्मस्खलनदोषः महोदयेन महासामर्थ्येन अथवा महाफलेन तन्मूलत्वात्सकृतक्रियाफलसिद्धेरिति कर्मांतरेण प्रायश्चित्तेनेव नाम मंत्रोतिंनिन्ये॥ ४८॥ साफलमिति॥ अस्त्रैः सर्पास्त्रैः भाग्यैः प्राग्भवीयैः शुभकर्मभिरिव रिपुपौरुषस्य साफल्यं कृत्वा अपवर्गे अवसानं गते सति स निःसाफल्यात्सफलीकरणोपचारः॥ समन्युः सक्रोधो जिष्णु

सभोगिसंघः शममुग्रधाम्नां सैन्येन निन्ये विनतासुतानां॥ महाध्वरे विध्यपचारदोषः कर्मांतरेणेव महोदयेन ४८
साफल्यमस्त्रे रिपुपौरुषस्य कृत्वा गते भाग्य इवापवर्गं॥ अनिंधनस्य प्रसभं समन्युः समाददे स्त्रं ज्वलनस्य जिष्णुः ४९
ऊर्ध्वं तिरश्चीनमधश्च कीर्णैर्ज्वालासटैर्लंघितमेघपंक्तिः॥ आयस्तसिंहाकृतिरुत्पपात प्राण्यंतमिच्छन्निव जातवेदाः॥ ५०
भिन्नेव भाभिः सवितुर्मयूखा न्तज्ज्वाल विष्वक् विस्रतस्फुलिंगः॥ विशीर्यमाणाश्म निनादभीमं ध्वनिर्वितत्ये न्नक्रूराः क्रूरा

रर्जुनः अनिंधनस्येंधनं विनैव सादृक्कस्य ज्वलनस्य प्रसभं शीघ्रं कमस्त्रमाग्नेयास्त्रं समाददे जग्राह॥ ४९॥ ऊर्ध्वमिति॥ ऊर्ध्वं तिरश्चीनं तिर्यक् विभाषा च। रेचिकेति द्वियामिति खत्प्रत्ययः। अधश्च कीर्णैर्विस्तृतैर्ज्वाला एव केसराः सटाः जटा केसरयोरिति विश्वः। तैः लंघिता मेघानां पंक्तिर्येन सः आयस्तस्य लंघनस्य सिंहस्येवाकृतिर्यस्य सः जातवेदाः अग्निः प्राण्यतं प्राणिनाशं हरन्निव उत्पपात॥ ५०॥ भिन्नेति॥ क्रूरानुभाभिः तेजोभिः सवितुर्मयूखान् भिन्नेव अभिहत्येव विष्वक् विस्रतस्फुलिंगः स्फुलिंगो यस्य मयूखाभिघातहेतुः कृतमुत्क्षेपते॥ त्रिषु स्फुलिंगोग्निकण इत्यमरः विदारयेन
समंतात् व्यासाः अग्निकणाः यस्य

चयानिति॥ वह्निः पवनानुवृत्त्या वायुवशेन चयानि वहिरण्ययान्प्राकारान्। इयश्चयसमूहे प्राकार इति विश्वः। तुंगशृंगान्दीनि वप्रचिह्निरण्मयानि दहंदिनानयनादिनाभिनयाततनात्साधुः पुराणीव तथा किंशुकानां पलाशानां वर्णं पत्रमात्रे किंशुकः पर्ण इत्यमरः महावनानीव पुष्पितानि इति भावः। ततान विस्तारयामास दाकरणे ज्वाले सन्नर्थः ५२ मुहुरिति॥ सोष्मा जनयामास रुचः पयोदाः मुहुश्चलंत्यश्च ताः पल्लवलोहिन्यो लोहितवर्णाश्च ताभिश्चलत्पल्लवलोहिनीभिः वर्णादनुदात्तात्तोपधात्तो न इति ङीप् तस्य च नकारः शिखिनोग्नेरुच्चैरुन्नताभिः शिखाभिर्ज्वालाभिरवलीढाः दग्धा इत्यर्थः। तलेषु अधोभागेषु मुक्ता विद्रावा मोक्षकध

चयानि याद्रीनिव तुंगशृंगान् क्वचित्पुराणीव हिरण्मयानि॥ महावनानीव च किंशुकानां ततान वह्निः पवनानुवृत्त्या ५२
मुहुश्चलत्पल्लवलोहिनीभिरुच्चैः शिखाभिः शिखिनो वलीढाः॥ तलेषु मुक्ता विद्रावा बभूवुः सांद्रां जनन्याः रुचः पयोदाः ५३
लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि रोहिताश्वे। पिनाकिना हूतमहांबुवाहमस्त्रं पुनः पाशभृतः प्रणिन्ये ५४
ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिंगितनीलमूर्तयः॥ अधोमुखाकाशसरित्निपातिनीरपः प्रसक्तं मुमुचुः पयोमु

चो बभूवुः॥ जलक्षेपणादिति भावः। अधस्वरूपयोरस्त्रीतलमित्यमरः ५३॥ लिलिक्षतीति। क्षयकालवत्तरौद्रे विलोलार्चिषि चलज्ज्वाले रोहिताश्वे ज्वलने लोकं लिलिक्षति लोढुमिच्छति जिघत्सति च। लिहतेः सन्नंतात् शतृप्रत्ययः॥ पिनाकिना आहूतामहांबुवाहा येन तत् पाशभृतो वरुणस्यास्त्रं पुनः प्रणिन्ये प्रयुक्तं॥ ५४॥ तत इति। ततो वरुणास्त्रप्रयोगानंतरं धरित्रीधरतुल्यरोधसः पर्वतसमभ्रां तास्तडिल्लताभिः आलिंगिता नीलमूर्तयः नभोमेघा नियमितपयोमुचो मेघाः अधोमुखाकाशसरिदिव निपततीत्यधोमुखाकाशसरिन्निपातिनीः कर्तर्युपमान इति णिनिप्रत्ययः। अपो जलानि प्रस

तिरस्कृतं

११ पराहतेति। पराहता अभिहतास्ततो ध्वस्ता निर्वापिताः शिखा ज्वालाः यस्मिन् अधिक्षिप्त मोहतं ततः सम्दृ्ं शठति प्रदि
प्तं तेजो यस्य तस्मिन् शिखावतोग्नेर्वपुषि प्रतप्तेय मलिलोहइव कृतास्पदाः कृतस्थितयः आस्पदं प्रतिष्ठायामिति नि
पाताः। प्रथमे पयो निपाताः जलपाताः ध्वनिं वितेनिरे ॥५६॥ महानल इति॥ महानले भिन्ना निरस्ताः निरसिताभ्रापि
ध्यवतंतीति भिन्नासिताभ्रपातिभिः कर्तयुपमान इतिणिनिः अतएव कथनेन थाकेनफेनतां समेसप्राप्यसधः

पराहतध्वस्तशिखेशिखावतो वपुष्यधिक्षिप्तसमृद्धतेजसि॥ कृतास्पदास्तप्तइवायसिध्वनिं पयो
निपाताः प्रथमे वितेनिरे ॥५६॥ महानले भिन्नासिताभ्रपातिभिः समेत्य सधः कथनेन फेनतां
व्रजद्भिरार्द्रेंधनवत्सरिक्षयं जलैर्वितेने दिविधूमसंहतिः ॥५७॥ स्वकेतुभिः पांडुरनीलपाटलैः
समागताः शक्रधनुः प्रभाभिदः॥ असंस्थितामादधिरे विभावसोर्विचित्रचीनांशुकचारुतांत्विषः ५८

परिक्षयं नाशं व्रजद्भिर्जलैरार्द्रेंधनवदार्द्रकाष्ठैस्तुल्यं तेन क्रियाचेति वतिः॥ दिवि स्वर्गे धूमसंततिर्वितेने
फेनादिकमार्द्रेंधनेपि तुल्यं॥५७॥ स्वेति॥ पांडुरैनीलैः पाटलैश्च पांडुरनीलपाटलैर्विचित्रैः स्वकेतुभिर्धू
मैः समागताः संगताः अतएव शक्रधनुः प्रभाभिदोद्युतिभाजो विभावसोरग्नेस्त्विषः असंस्थितामसंस्थिरां
विचित्रचीनांशुकस्य शुकस्य पटइव स्त्रविरोधस्य चारुतां समादधिरे दधुः॥५८॥

जलेति॥ जलौघानां उदकप्रवाहाणां संमूर्छनेन मेलनेन मूर्छितध्वनिः प्रवृद्धघोषः प्रसक्तैः संततैः विद्युतां लसितैः स्फुर
णैरेधिता वर्द्धिता द्युतिर्यस्य सः धूतधूममंडलः जलाघातात्संभृतधूममंडलः पावकः प्रशांमेष्यन् अत्र देशे भू
यानिव बभूव। भूयस्त्वस्यास्त्वाश्चिवित्यादिवे स्फुटं ५९ प्रवृद्धेति। प्रवृद्धानां सिंधोरूर्मिणां चयाराशयइवस्थ
वीयसां स्थूलतराणां पयसां च ये विभिन्ना विश्लेषिताः कृशानवोग्नयः उपात्तसंध्यारुचिभिः प्राप्तसंध्या
जलौघसंमूर्छनमूर्छितस्वनः प्रसक्तविद्युल्लसितैधितद्युतिः॥ प्रशांतिमेष्यन्नृधूतधूममंडलो बभूवभूया
निवतत्र पावकः ५९ प्रवृद्धसिंधूर्मिचयस्थवीयसां चयैर्विभिन्नाः पयसां प्रपेदिरे॥ उपात्तसंध्यारुचिभिः सरू
पतां पयोदविच्छेददैः कृशानवः ६० उपैत्यनंतद्युतिरप्यसंशयं विभिन्नमूलोनुदयाय संक्षयं॥ तथाहितो
योघविभिन्नसंहतिः सहस्यवाहः प्रययौपराभवं॥६१॥

वि रागैः पयोदानां ये विच्छेदास्त इति विच्छेदाः विच्छिन्नाः क्षिप्ताः लवाः शकलास्तैः सरूपतां प्रपेदिरे इत्युपमा॥६०॥ उपैतीती
ति॥ अनंतद्युतिर्महातेजा अपि विभिन्नमूलो नष्टमूलोप्यसंशयं यथा तथा अनुदयाय पुनरनुत्थानाय संक्षयं नाशं
उपैति॥ तथाहि॥ तोयौघैर्विभिन्ना संहतिः संघातो यस्य सः तथोक्तः सहस्यवाहः पराभवं नाशं प्रययौ॥
विशेषसामान्यसमर्थनरूपोर्थांतरन्यासः॥६१॥ श्रीराम॥ रामचंद्रप्रभो रामचंद्रप्रभो रामचंद्रप्रभो रामचंद्रप्रभो

अथेति। अथ अग्निवारणानंतरं विहितविधेयैः कृतकृत्यैरसितनगस्यांजनाद्रेर्नितंबाः कटकास्तद्वत्स्थामभा सांघनानां वितानैः प टलैः आशुमुक्ता घोरा कात्रीव निद्रावी दिवेक्रुसेक्षा। विकसंति चाता न्यमलधामानि स्वच्छकांतीमिचंतेषांनिलीसलानामधि कविशुद्धां इस्कंज्यालों श्रियंमाप॥ निदर्शनालंकारः॥ ५२॥ इतीति। बहुत्वसमरनयानूरणो पायानज्ञानातीतिसमरदिना नुपपदाकर्मीपपदी भवति चिंत्र तिषेधेनेति वार्तिक व्याख्याने भाष्यकारेणार्थग्रहणात् मुदासत्वात्स्यार्थस्य समर्थनात् स सासाचि। आराति सादयिष्यन्नवसादयितुकामः संन्निरर्थः॥ क्रियार्थक्रियायां लृट् सत् इति विधेयंपदस्योद्दासे

अथ विहितविधेयैराशुमुक्ताचिता नैरसितनगनितंबैः स्यामभासांघनानां॥ विकसदमलधाम्नांप्रापनीलोत्पलानां श्रियमधिकविशुद्धांवन्हिदाहादिवद्यौः॥ ५२॥ इति विविधमुदासे सव्यसाची यदस्त्रंबहुसमरनयज्ञः सादयिष्य न्नराति॥ विधिरिधविपरीतः पौरुषंन्यायवृत्तेः सपदितदुपनिन्येरिक्ततांनीलकंठः॥ ५३॥ वीतप्रभावतनुर प्यतनुप्रतापः प्रसांचकांक्षजयनीभुजवीर्यलक्ष्मी॥ अस्त्रेषु भूतपतिनापहृतेषु जिष्णुर्वर्षिष्यतादिनकृतेवभुजले

प्रयुक्तवानित्यर्थः। उपसर्गादस्यत्यूह्योर्वेति वा सनेपदं। विपरीतो विधिः प्रतिकूलदैवं विधिर्विधाने दैवेचेत्यमरः॥ न्या येननीत्यावृत्तिर्यस्यतस्यनीतिज्ञस्य पौरुषमिवनीलकंठः शिवः सपदितदस्त्रंव्यर्थतां उपनिन्ये॥ ५३॥ मालिनी वृत्तं। वीतेति॥ भूतपतिनाशंभुना अनुग्रहिष्यते तिशेषः॥ अस्त्रेष्वप्रहृतेषु सत्सु वर्षिष्यता उत्तरत्र सहस्रेणउष्णं चितरिष्यतादिनकृता जलेष्वप्रहृतेषु सत्सु लोकइववीतप्रभावोगतास्त्रमहिमा अतएवतनुः क्षीणोपि वीतप्रभाव तनुस्तथापि यतोतनुप्रभावः मनसि संगतः सामर्थ्यादिकृतः तओजिष्णुरर्जुनोजयनीजयश्रीलां जिष्ण्वा दिनाइनः प्रत्ययः। भुजवीर्यलक्ष्मी भुजबलसंपदं उभयत्रापि पुरुकार इतिया वत्तत्कालखंडिता मितिशेषः प्रसांचकांक्षयौ

श्रीगणेशायनमः॥ तापीदेव्यैनमः॥ ततइति॥ किराताधिपतेरलघ्वीं आजिक्रियां रणकर्म वीक्ष्य विवृद्धमन्युः प्रवृद्धको पः विविक्तानिः कलंकः तर्कः ऊहः ज्ञानंयस्यसोर्जुनः कारणानिरणभारकरणानि विचिन्वन् विमृशन् इतिइत्थं वक्ष्यमाणक्रमेण तर्कयामास ऊहितवान्॥ १॥ अथत्रयोविंशत्याश्लोकैः वितर्कप्रकारमाह॥ मदेत्यादि इहयु द्धेमदस्रुतिभिः मदप्रवाहैः श्यामिकृताः श्यामिता गंडलेखाः कपोलभागायेषांते विक्रांताः पराक्रमं कुर्वंतः क

ततः किराताधिपतेरलघ्वीमाजिक्रियांवीक्ष्य विवृद्धमन्युः॥ सतर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निति कारणानि॥ १॥ मदस्रुतिश्यामितगंडलेखाः क्रमंति विक्रांतनराधिरूढाः।

रिकः तैर्नरैरधिरूढाः सहिष्णवोरणभरक्षमाः युधां युद्धानां अभिज्ञाः शिक्षिता इत्यर्थः॥ कृयोगकर्मणि षष्ठी किंचनगाः धयं पर्वतानां अन्योन्यं संघयंतेनोपसर्गस्य समासोनोपसृष्टान् घञ्सत्ययः॥ श्रीणिभुयी नुपसर्गइति षष्ठिनिषेधात् आक्षिपंतः प्रतिषेधतइवस्थिताः नयोन्नतानागा गजाः नआक्रमंतिने चरंति युद्धेष्विति शेषः एवमुत्तरत्रापि द्रष्टव्यं तथापिकथमेशक्ति निरासायमिति सर्वत्रापि तात्पर्या र्थश्च॥ २॥ ॥ सहिष्णवोनैरयुधामभिज्ञानागानगाच्छ्रायमिवाक्षिपंतः॥ २॥

विचित्रयेति विचित्रया नानावर्णया केतनानां रत्नानि तेषां भासा प्रभया भिन्नां संवलितां रवेः रु
चं चित्रयतेव चित्रवर्णां कुर्वतेव स्थितेनेत्यर्थः केतनानां रत्नस्य निमित्तत्वेनोत्प्रेक्षा पयोदमंद्रध्वनि
नामेघगंभीरघोषेण महतां रथानां ओघेन धरित्री न सन्निरुद्धा नावृत्ता ३ समुल्लसदिति इह
युद्धप्रासाः कुंताः सप्रासस्तु कुंत इत्यमरः । तेमहोर्मयः इव तेषां मालाः समुल्लसंत्यो यत्र तत्समु

विचित्रया चित्रयतेव भिन्ना रुचं रवेः केतनरत्नभासा महारथौघेन न सन्निरुद्धा पयो
दमंद्रध्वनिना धरित्री ३ समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपं
क्ति विभिन्नमर्यादमिलातनोति नाश्वीयमाशाजलधेरिवांभः ४ ७

ल्लसत्प्रासमहोर्मिमालं चामराणि फेना इव परिस्फुरंत्यः परिस्फुरंती चामरफेनानां पंक्तयो
यत्र तत्तथोक्तं अश्वीयं अश्वसमूहं जलधेः अंभ इव उन्मर्यादमुच्छृंखलं यथा तथा आशा दिशो न
तनोति नावृणोति ४ रामचंद्रप्रभो ७

हतेति हतप्रहरतमाह तवध्यतरुं तेलोंट् मध्यमपुरुषबहुवचनं अनुदात्तोपदेशेत्यादिना अनुना
सिकलोपः आहतेति कर्मणप्रयोगेपि हंतेः स्वाभाविकसकर्मकत्वस्यानपायात् अकर्मकस्यतः वे
वक्षितत्वेन तन्निवृत्त्यैव निवृत्तत्वेन आङो यमहनेचेत्यात्मनेपदं इत्येवमुद्धताः प्रगल्भा भीमा अ

हताहतेत्युद्धतभीमघोषैः समुत्थिता योद्धृभिरभ्यमित्रं न हेतयः प्राप्ततडि
त्विषः खे विवस्वदंशुज्वलिताः पतंति ॥ ५ ॥

घोषा येषां तैः योद्धृभिर्योधैरभ्यमित्रममित्रान् अभि समुत्थिता मुक्ता विवस्वतोंशुभिः प्रतिफ
लिता इति भावः ज्वलिता दीपिता दीपिता इवस्तः एव प्राप्ता स्तडितां त्विष इव त्विषो येस्ते उत्साति
छवो हेतयः खेन पतंति ५ रामचंद्रप्रभो रामचंद्रप्रभो रामचंद्रप्रभो

किरात०
२

अभीति अभ्यायतो वीरान्हंतुं अभिगच्छतः रणशक्रस्यस्य अंतकस्य संबंधि धूमवत् धूम्रं व्यापि व्यापकं घोउशास० प्रभाजालमिव प्रतूर्णैः रश्वैः रथांगैश्चक्रैश्च नुन्नं प्रेरितं रजो मातरिश्वा मरुत् व्योमनि अंतरिक्षे न तनोति न वि स्तारयति ६ भूरेणुनेति अत्रार्द्धवैरासभो गर्दभः तद्वद्धूसरेण रपसां ढुसुधूसर इत्यमरः रासभो गर्द्दभः

अभ्यायतः संततधूमधूम्रं व्यापि प्रभाजालमिवांतकस्य रजः प्रतूर्णाश्वरथांगनुन्नं तनो तिन व्योमनि मातरिश्वा ६ भूरेणुना रासभधूसरेण तिरोहिते वर्त्मनि लोचनानां ना स्त्यन्नतेजस्विभिरुत्सुकानां मन्हिप्रदोषसुरसुन्दरीणां॥ ७

तिचामरः भूरेणुना लोचनानां वर्त्मनि चक्षुर्मार्गे तिरोहिते सति तेजस्विभिः तेजस्विषु वीरेषु उत्सु कानां वीरवरणार्थमागतानां इत्यर्थः प्रसितोत्सुकाभ्यां तृतीया चेति विकल्पात् तृतीया सुरसुन्दरीणां अन्हि दिवसे एव प्रदोषः रात्रिर्नास्ति अंधकारवत् दृष्टेस्तिरोधानात् रात्रिभ्रमस्यादिति भावः ७ ७

२

तस्येति आहवायसेनाविलोलमौलेः स्वस्तकेशबंधस्य चूडाकिरीटं केशाश्च संयता मौलयस्त्रियामित्य० संरभतास्त्रिकोपारुणे आयते लोचनेयस्य तस्य संरभः संभ्रमे कोप इति वि० तस्यार्जुनस्य रोषतसं मुखं निदाघो घर्मः निर्वापयिष्यन् शिशिरीकरिष्यन्निव सुरेश्वत्री प्रस्नापयामास सिषेच। स्वेदं जनयामासे त्यर्थः॥ स्मरतेर्मित्यविकल्पितत्वात् स्वविकल्पः ८

तस्याहवायासविलोलमौलेः संरभतास्त्रायतलोचनस्य निर्वापयिष्यन्निव रोषतप्तं प्रस्नापयामा समुखन्निदाघः ८ क्रोधांधकारांतरितो रणाय भ्रूभंगलेखाः सवमार्रतिरस्मः घनोपरुद्धः प्रभवा यवृष्टेरूर्ध्वांशुराजीरिव घर्मरश्मिः ९

क्रोधेति क्रोधांधकार इव तेनांतरितः आवृतः सोर्जुनः घनोरुद्धो मेघावृतः तिग्मरश्मिः वृष्टेः प्रभावाय वर्ष नायतिस्मः ऊर्ध्वांशुना राजिरिव अर्कस्य ऊर्ध्वांशुरेवोरयोरु ष्टिलिंगमित्यागमः रणायरणप्रवृत्तये इति स्त्रो भ्रूमेदोभ्रूभंगः तस्य रेखा बभार ९

२

मइति॥ सोऽर्जुनः अंबुदवन्मदतीति अंबुदना दिवर्नुर्युपमान इति णिनिः तापंदिङ्नागः दिग्गजः अद्रिशृंगमिमि
व हस्तेन करेण ध्मानयन् शुंभो बलानि अशरीरो नंगः कामः चेतांसि युवमनांसि चिंताभिः प्रयोजनध्यानै
रिव इषुभिस्तता पतापयामास तपनिः सकर्मकः अत्रे षुशब्दः स्त्रीलिंगः अन्यथा उपमानोपमेययोर्भि
न्नलिंगदोषात् पत्रीरोपइषुर्द्वयोरित्यमरः १० सद्भिति॥ अभिविष्टबुद्धेर्गुणस्वनिष्ठात् सतो विषयेस

सप्रध्वनं यांबुदनादि चापं हस्तेन दिङ्नागइवाद्रिशृंगं॥ बलानि शुंभोरिषुभिस्ततापचेतांसि चिंताभि
रिवाशरीरः १० सद्भादिते वाभिनिविष्टबुद्धौ गुणाभ्यसूयेव निपक्षपाते अगोचरे वागिव चोपरेमे
शक्तिः शराणां शितिकंठकाये ११

द्वितोदिप्रमाणि कार्थसमर्थनकथेव न हिंसन्यगम्य स्तन्नाम्नं प्रति मूढाय पिशुक्नोतीति व्याचक्षते इति केचि
त् अन्येतु अभिनिविष्टबुद्धौ आग्रहविष्टचित्ते विषये सद्भादिता हितोपदेशस्त्वमिव नस्याग्रहीष्यते गृण्हाती
तिभावः विपक्षपाते वीतरागे विषये गुणाभ्यसूयागुणासहिष्णुताइवसहिसमदृष्टी द्विषंतमपि न द्वेष्टि

२

यत इतिभावः। अगोचरे अवाङ्मनसगोचरे ब्रह्मणि वाग्भिर्यतो वाचो निवर्तंते अप्राप्य मनसा सह इति श्रुतेरिति भावः
शराणां शक्तिरिति कंठकाये उपरमे उपरतात्तस्याक्षोभ्यमहिमत्वादिति भावः। विभाषाकर्मकादिति विकल्पादात्मने
पदं अत्र मालोपमा ११ उपमेति पांडुसुतेन प्रणुन्नाः प्रक्षिप्ताः शिलीमुखा बाणाः उमापतिं अभ्युत्थितस्याभ्युन्न
तस्याद्रिपतेर्नितंबकंठकं हेमंते भवस्य सर्वत्राण च तलोपश्चेत्यस्य यः। कारलोपश्च अर्कस्य पादा रश्मयः इव पादर

उमापतिं पांडुसुतप्रणुन्नाः शिलीमुखा न व्यथयां बभूवुः अभ्युत्थितस्याद्रिपतेर्नितंबमर्कस्य पादा इव हैमनस्य १२
संप्रीयमाणोऽनुबभूव तीव्रं पराक्रमं तस्य पतिर्गुणानां विषाणभेदं हिमवानसह्यं वप्रानतस्येव सुरद्विपस्य १३
तस्मै हि भारोद्धरणे समर्थं प्रदास्यता बाहुमिव प्रतापं चिरं विषेहे भिभवस्तदानीं स कारणानामपि कारणेन १४

रश्मयः पादा इत्यमरः न व्यथयां बभूवुः १२ संप्रीति गुणानां पतिः शिवः तीव्रं तस्यार्जुनस्य पराक्रमं वप्रे आननस्य परि
णतस्य तटप्रहारिणः इत्यर्थः सुरद्विपस्यासह्यं विषाणाभेदं दंतप्रहार हिमवानिव संप्रीयमाणः संतुष्यन् अनुबभूव तस्याक्षो
भ्यत्वाद नुजिघृत्साश्चेति भावः १३ तस्मा इति तस्मै पार्थाय भारस्य भूभारस्योद्धरणे समर्थं प्रतापं बाहुमिव अवष्टंभतयेति शे
षः अन्यथा भारोद्वहस्य दुष्करत्वादिति भावः प्रदास्यता वितरिष्यता कारणानां ब्रह्मादीनामपि कारणेन जनकेन देवेन सोऽभिभवस्तु

[illegible] भावः १४

अथ त्रिभिर्भगवदभिप्रायमाविष्कुर्वन्नचतुर्भिः कलापमाह प्रसाहतेति प्रसाहतौजाः परेणाप्रतिहतबलः सन्नपि कृतस
त्त्ववेगः कृतोत्साहातिशयः सन्नयः पुमान् ज्यायसि स्वस्मादधिके यः पराक्रमं तनोति तस्य पुंसः भानोरर्कस्य तेजांसीव वीर्येण
शौर्येण ज्वलितानि प्रकाशितानि यशांसि निष्पतंति उद्भवंतीत्यर्थः हीनस्याधिकाभियोगो यशस्कर इतिभावः १५ ततः कि
मित्यत आह दूष्येति दूष्यावदानात् दूष्यपौरुषात् अरिलोको व्यथते विभेति धूर्जटेः विजयिनः स्तस्यान्यः कियान्नामेतिमत्वा

प्रसाहतौजाः कृतसत्त्ववेगः पराक्रमं ज्यायसि यस्तनोति तेजांसि भानोरिव निष्पतंती यशांसि वीर्यज्वलितानि तस्या १५
दूष्यावदानाद्व्यथतेरिलोकः प्रध्वंसमेति व्यथितस्य तेजः तेजोविहीनं विजहाति दर्पः शांतार्चिषं दीपमिव प्रकाशः १६
ततः प्रयात्यस्तमदावलेपः सजय्यतायाः पदवीं जिगीषोः गंधेन जेतुः प्रमुखागतस्य गंधद्विपस्येव मतंगजौघः १७

न इतिभावः व्यथितात् भीतात् तेजः प्रध्वंसमेति ततो विहीनं दर्पः उत्साहः शान्तार्चिषं निर्वाणज्वालं दीपं प्रकाश इव प्रजहाति
त्यजति १६ ततइति ततो दर्पहान्यंतरं अस्तो मदावलेपो यस्य सः स्तैरिलोकः गंधेन मदगंधेनैव जेतुर्जयनशीलस्य तस्य
स्येयः प्रमुखागतस्याभिमुखागतस्य प्रतिद्विपस्यान्यो मतंगजौघ इव जिगीषोर्नायकस्य जय्यतायाः पदवीं प्रयाति
प्राप्नोति विजिगीषुण्यजेतुं शक्यो भवतीत्यर्थः क्षय्यजय्यो शक्यार्थ इति निपातः अत्र श्लोकद्वयेन ज्यायसि पराक्रम
कारणादीनां पूर्वस्योत्तरोत्तरं प्रति कारणत्व कथनात् कारणमालाख्योलंकारः लक्षणंतूक्तं १७ राम राम राम

एवमिति एवमुक्तरीत्या प्रतिद्वंद्विषु प्रस्परिमध्येतस्यार्जुनस्य मौलीन्दुलेखाविषदां कीर्तिं विधास्यन् करिष्यन् आनुक्रमेणाविपर्यासेन प
र्यायेण जयो भुवसादो भंगश्च तौ जयावसादौ यस्यां तां पर्यायजयावसादां रणक्रियामियेष इष्टवान् तिस्म जयानंतरं भंगो भंगानंतरं जयः
इति पर्यायार्थः तस्य विपर्यासोन्यतरनैरंतर्येनत्तद्भावोनुक्रम इत्यपौनरुक्त्यं १८ मुनेरिति मुनेर्विचित्रैरिषुभिः स भूयान् असंख्यो
भूतपतेर्बलौघः आत्मलाभेन जन्मना सह समुत्पतद्भिराविर्भावद्भिः जन्मसिद्धैरित्यर्थः जातयो गोत्वमनुष्यत्वादयः स्वभावाः

एवं प्रतिद्वंद्विषु तस्य कीर्तिं मौलींदुलेखाविषदां विधास्यन् इयेषपर्यायजयावसादां रणक्रियां शंभुरनुक्रमेण १८ कलापकं
मुनेर्विचित्रैरिषुभिः स भूयानिन्ये वशं भूतपतेर्बलौघः सहात्मलाभेन समुत्पतद्भिर्जातिस्वभावैरिव जीवलोकः १९
वितन्वतस्तस्य शरांधकारं त्रस्तानि सैन्यानि रवं निरासुः प्रवर्षतः संततवेपथूनि क्षपाघनस्येव गवां कुलानि २०

जातिनियताः धर्मास्तैर्जातिस्वभावैर्जीवलोकः प्राणिजातमिव वशं निन्ये नीतः कर्मणि लिट् प्राणिनो जातिधर्माणिव गणा मुनिशरा
न्नातिक्रमितुं शक्नुवन्नित्यर्थः १९ वितन्वन्निति त्रस्तानि सैन्यानि संभृतवेपथूनि निरंतरं कंपानि गवां कुलानि वृंदानि प्रवर्ष
तः क्षपाघनस्य रात्रिमेघस्येव शरैर्यो ऽधकारं वितन्वतः तस्य मुनेः संबंधिनं रवं शरवर्षघोषं निषेमुः शुश्रुवुः ॥ ननु किं वि
दूदशुः श्येष्टानुदरापास्तेतिभावः २०

सश्रति अतिसौष्टवेनातिलाघवेन सायकान् क्षिपन् सोर्जुनः साध्वसेन विस्मितानां भ्रान्तानां परेषां दृष्टां दोषेण रणादिना आकुलित लोचनानां दुष्टचक्षुषां नाराचीव पृथग्विभिद्यमानाव भासे एकोप्यनेक इव दृष्ट इत्यर्थः २१ क्षोभेणेति अथ गणाधिपानां संबंधिना तेन क्षोभेन कंपेन ईश्वरस्याकृतिराकारो मूर्तिर्महाह्रदानां तरंगकंपेन छायामयस्य प्रतिबिंबरूपस्य दिवाकरस्य आकृतिरिव भेदं विकारं ययौ प्राप स्वयं निर्विकारोपि प्रतिस्तर्यवत्सं पूसर्गान्नतथा प्रतीयत इत्यर्थः २२ यदि देवोपि विकृतस्तर्हि कोपोपि किन्नेत्याह आसेदिवांसमिति प्रसेदिवांसं अर्जुनं प्रति प्रसन्नचित्तं तं देवं कोपो नाप न हेतुः परस्मिन् पुरुषे परात्मनि दे

सप्तसायकान्साध्वसविधुतानां क्षिपन्परेषामतिसौष्ठवेन भ्रान्तीविदोषाद्दृगलोचनानां विभिद्यमानः पृथगाबभासे २१

क्षोभेण तेनाथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य तरंगकंपेन महाह्रदानां छायामयस्येव दिनस्य भर्तुः २२

प्रसेदिवांसं न तमाप कोपः कुतः परस्मिन्पुरुषे रजो वा आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिन्हा महतां हि वृत्तिः २३

विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुरंतकस्य भिन्नाकृतिर्ज्या ददृशुः स्फुरंती क्रुद्धस्य जिह्वामिव तक्षकस्य २४

देवस्वतो निर्विकारत्वमित्यर्थः त्राप्य नुग्रहं ययावितिभावः विकारः कोपरूपः कुत न कुत्रश्चिदित्यर्थः नहि एतस्य निर्विकारस्य कथं तर्हि आकारभेदः कारणाभावादिति चेद् विसहस्तास इदं पूर्वोक्तं आकारवैषम्यं च भेजे किमिति न विद्मः तत्राह महतां वृत्तिश्च दुर्वृत्त चिन्हानि दुर्ग्रहहेतुकानि २३ विकारमेवाह तत इति अनंतरं विस्फार्यमाणस्येति भूतानि भर्त्रा भूतपतिना भर्त्रा स्तेन प्रसयः अतएव न लोके सादिनां प्रति प्रतिषेधः भुजाभ्यां कृत करणयोः स्तृतीया विस्फार्यमाणस्याकृष्यमाणस्य धनुरंतक इवतस्य धनुरंतकस्य संबंधिनी संस्फुरंती चलंती अतएव भिन्ना द्विदलेव दृश्यमाना आकृतिर्यस्याः सा ज्या क्रुद्धस्य तक्षकस्य जिह्वामिव ददृशुः द्विधाभावात् रूपकरत्वात्प्रतिभावः २४

सव्येति पार्थः सव्यापसव्याभ्यां वामदक्षिणगतिभ्यां ध्वनितं नादितमुग्रं चापं येन तं किराताधिपतिं अपराद्धः प्रमग्नो यं तां पर्यायेण योगपद्येन संपादितः करणयोः तालः आस्फालनं येन तं व्यालकुष्टं भेय लिंगः नाथ्याल इस मरः गजभिवात्रानं के तत्र्यापद्यालुयद्दृष्ट नाद्वडयः कोप्यमममनर्थकरस्येति नूनं किं तवानिस्यर्थः २५ निर्जिघिरिति हरेषुजालैरस्यार्जुनस्य पतंती धावति शिलीमुखं व्ययघातान्त्रीलीमुखानां शराणां वृंदानि ओजस्विभिः प्रबलैः अंबुराशेर्यादोभिर्जलग्रहैः सिंधुमुखेन नदीमुखेन आगतानि यादांसीव निर्जघ्निरे भेदविभेदमिति अंतर्विभेदं व्यूहविश्लेषं उपजायं च पदवीनिरोधं मार्गे च प्रतिबंधं अन्यत्र तासा रेश्रसादप्रतिबंधं विध्वंसनं स्वउनं दुर्गेषु

सव्यापसव्यध्वनितोग्रचापं पार्थः किराताधिपमाशशंसे वैशाम्य संपादितकर्णतालं यंता गजं व्यालमिवापराद्धः २५

निजघ्निरे चास्य हरेषुजालैः पतंति वृंदानि शिलीमुखानां ओजस्विभिः सिंधुमुखागतानि यादांसि यादोभिरिवार्णवस्य २६

विभेदमंतः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः नेतारिलोके षु करोति यद्यत्तत्तच्चकारास्य शरेषु शंभुः २७

सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर्वेगितया पतद्भिः छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थैरिव तस्य बाणैः २८

हनदाहादिकं चेत्यादि यद्यनेता नायकः जिगीषुरविदितप्रयोगः संरक्तमंत्रस्यादविज्ञानप्रयोगः संन् अरिलोके षु नानाकुले षु करोति तत्तद्भुरविदितप्रयोगः अज्ञानसंधानमोक्षादिकः संन् अस्य अर्जुनस्य शरेषु चकार नूषालंकारः २७ सोरेति सोढनिपरैस्वगर्तानि च प्रथमायुधानि पूर्वास्त्र एव बाणाः यस्य तस्यार्जुनस्य संबंधिभिः क्रोधोभिषिक्तैः पूर्वबाणवैपल्यात् कोपेन सक्तैः अत एव चेंगित वेगेनेत्यर्थः पतद्भिः अतएव विछिन्नैरपि त्रासिता वाहिन्यो यैस्ते अतएव कृतार्थैरिव बाणैः पेते पतितेति भावे लिट् वस्तुतस्तु अकृतार्था एवेत्यर्थः २८

६

अलमिति ऋजुता अवक्राकारत्वं अवक्रशीलत्वं चैव गुणः तेनालंकृतानां गुर्वीभिर्धनुर्विद्यागुरुभिः धर्मशास्त्रगुरुभिश्चोप
दिष्टां गतिं गमनमाचारः चास्थितानां प्राप्तानां मार्गणानां शराणां सतां साधूनामिवापर्वण्यपर्वणीत्यत्र प्रस्तावे अकांड
अन्य इत्यर्थः पर्वस्यादुत्सवे ग्रंथौ प्रस्तावे लक्षणांतरे इति विश्वः स ईश्वरकृतः भंगश्छेदो व्यसनं च जिष्णोरर्जुनस्य जित्वरस्य जिष्णुः
शक्रे धनंजये जित्वरे इति विश्वः धृतिं धैर्यमुन्ममाथ जहारेत्यर्थः अकांडे साधुविपत्तिदर्शनादिव शरभंगदर्शनाद्धैर्यभंगोभू
दित्यर्थः २९ बाणेति बाणच्छिदः पार्थशिरश्छेदिनस्ते स्मरारेर्विशिखाः अवाङ्मुखीभूतफलाः विमुखाग्राः विफलाश्च संतः पां

अलंकृतानामृजुतागुणेन गुरूपदिष्टां गतिमास्थितानां सतामिवापर्वणि मार्गणानां भंगः स जिष्णोर्धृतिमुन्ममाथ २९
बाणच्छिदस्ते विशिखाः स्मरारेरवाङ्मुखीभूतफलाः पतंतः अखंडितं पांडवसायकेभ्यः कृतस्य सद्यः प्रतिकारमापुः ३०
चित्रीयमाणानतिलाघवेन प्रमाथिनस्तान्भवमार्गणानां शंकाकुलायानिचखान दूरं बाणान्ध्वजिन्याः हृदयेष्वरातिः ३१

डवसायकेभ्यः क्रियाग्रहणाच्चतुर्थी पांडवसायकानां कृतस्य फलभंगरूपस्य स्वकर्मणः सद्यो खंडितं प्रतीकारमापुः अस्कलंकं क
र्मसद्यः फलं दर्शयतीति भावः ३० पुनरर्जुनस्य जयमाह चित्रीयमाणानिति अरातिरर्जुनः अतिलाघवेन चित्रीयमाणान् चित्रमा
श्चर्यं कुर्वाणान् नमोयतिव श्चित्रउः क्वचू भवमार्गणानां प्रमाथिनः खंडिनः तान्बाणान् शंकाकुलायाः संबंधाकुलायाः सं
क्षुभितायाः ध्वजिन्याः हृदयेषु कूरं गाढं भित्त्वा चखान् निखातवान् ३१ ६

तस्येति तस्यार्जुनस्य पराक्रमेतिशयत्वाद्धेतोरन्योन्यस्य विशेषणेनातिशयकारणेनातिरिच्यमाने उत्कृष्यमाणे सति
पुरां हंता हरो भूरि प्रभूतं पृषत्कवर्षं पृषत्कबाणविशिखा इत्यमरः निदाघे भवो नैदाघो मेघः अंबुजलमिव निरास
मुमोच अस्यतेर्लिट् निदाघग्रहणं वर्षस्यानीतिव्रवद्योतनार्थं ३२ अनामृशंतश्च इति प्रियेषिणा प्रियचिकीर्षु

तस्यातिशयत्वादतिरिच्यमाने पराक्रमेन्योन्यविशेषणेन हंता पुरां भूरि पृषत्कवर्षं निरास नैदाघमिवांबुमे
घः ३२ अनामृशंतः क्वचिदेव मर्म प्रियैषिणानुग्रहिताः शिवेन सुहृत्प्रयुक्ता इव नर्मवादाः शराः मु
नेः प्रीतिकरा बभूवुः ३३ अस्त्रैः समानामतिरेकिणीं वा पश्यन्निषूणामथ तस्य शक्तिं विषादवक्त
व्यबलः प्रमाथी स्वमाललंबे बलमिंदुमौलिः ३४

णा शिवेनानुग्रहीताः प्रयुक्ताः अतएव क्वचिदपि मर्म अनामृशंतः अस्पृशंतः ते शराः सुमित्रसो प्रियैषिणा तेन
प्रयुक्ताः उच्चारिताः नर्मवादाः प्रियवादा इव मुनेः प्रीतिकरा बभूवुः ३३ अस्त्रैरिति अस्त्रैः स्वायुधैः समानां तुल्यां
अतिरेकिणीं ततो अधिकां तस्य मुनेः इषूणां शक्तिं पश्यन् विषादेनोत्साहभंगेन वक्तव्यानि निर्वाच्यानि बलानि
यस्य सः प्रमाथी शत्रुमर्दनः इंदुमौलिः स्वबलं महिमानमाललंबे ३४

ततइति ततोदेवः तपोवीर्याभ्यां समुद्धतस्य प्रगल्भस्य समरएवार्णवस्तस्य पारमंतंपिपासोर्जिष्णोरर्जुनस्याखि
लानि इषुजालानि अर्कः पयांसीव समाचचामजरेत्यर्थः ३५ रिक्तइति अथबाणांतधीनानंतरं अर्जुनस्य पा
णिः रिक्ते बाणशून्ये निषंगवक्त्रे तूणिरमुखे अन्यद्विपेन गजांतरेण पीतजले गस्याचलस्यान्तमरंध्रे शैलागर्भे
प्रदरइत्यर्थः अतएव सतृष्णंयथातेथामतंगजस्य पाणिः लक्षणयाकरइवसविस्रंभसस्येवबाणाः सविश्वासंनिपा

ततस्तपोवीर्यसमुद्धतस्य पारंपिपासोः समरार्णवस्य महेजालान्यखिलानि जिष्णोरर्कः पयांसीवस
माचचाम ३५ रिक्ते सविश्रंभमथार्जुनस्य निषंगवक्त्रे निपपात पाणिः अन्यद्विपापीतसजलेसतर्षमते
गजस्येवनगाश्मरंध्रे ३६ च्युतेसतस्मिन्निषुधौ शरार्थाद्ध्स्तार्थसारेसहसैववंध्यो तत्कालमोघः प्र
णयः प्रपेदे निर्वाच्यता कामइवाभिमुख्यं ३७

भि

पात ३६ च्युतइति शराएवार्थोधनंजयस्य तस्माच्युतेभ्रष्टे तस्मिन्निषुधौ निषंगे सहसा अकाण्डेध्वस्तार्थसा
रेन एधनसारेवंध्याविववितथकामेमोघप्रयासः अर्थप्रार्थने प्रवर्तकृतार्थ एवेतिभावः सपाणिनिर्वाच्यतांकुत

लि

श्रत्वास्वादराहि संकामय इतिनिर्वाच्यताकामः स्त्रींकामिभिस्त्यरम्योणः सइवस्त्रश्रेक्षाअभिमुख्यं प्रपेदे यथा

आघट्टयामासेति अस्यमुनेः अग्रेचासावंगुलिश्चेति अंग्रांगुलिश्चेति अग्रांगुलिः हस्ताग्रहस्तयोर्गुणिगुणि
नोर्भेदाद्रिति सवोविधियमार्गंकर्तव्यान्वेषणेउन्मुखं प्रवृत्तस्यगां भुवं जिगीषोरन्नायकस्य मतिः बुद्धिः
नयः षाड्गुण्यप्रयोगः उपायतोनयप्रयोगाविवतूणौ निषंगौ सवेगं ससंभ्रमं रष्णानिष्टागमाज्ञानैः

आघट्टयामासगतागताभ्यांसवेगमग्रांगुलिरस्यतूणौ विधेयमार्गेमतिरुत्सुकस्य
नयप्रयोगाविवगांजिगीषोः ३८ बभारशून्याकृतिरर्जुनस्तौ महेषुधीवीतमहे
षुजालौ युगांतसंशुष्कजलौविजिह्मः पूर्वापरौलोकइवांबुराशी ३९

आवेगश्चित्तसंभ्रमः गतागताभ्यां आवापोद्धराभ्यां चाघट्टयामास अन्यत्रतुवितर्कयामासनाड
यामासग्रहणात् पुनः पुनः तूणयोः पाणिं व्यापारयामसेत्यर्थः ३८ बभारेति शून्याकृतिरिष्टनाशा
त्तनिस्तेजस्करूपोर्जुनः तौवीतमहेषुजालौ विंतानिरिक्तानिमहेषुजालानि ययोस्तौ महेषुधीमहानि
षंगौ विजिह्मः संत्यलोकः युगांतरेसंशुष्कजलौ पश्चाक इति निष्टाननकारस्यककारः पूर्वापरायंबुराशी

भा॰ ३९

१

तेनेति पार्थस्तयोस्तूणयोरिक्ततया हेतुना यथा शुशोच तथा तेन अनिमित्तेन बाणक्षयरूपेण उर्निमित्तेन न शुशोच तथाहि संतः स्वामापदं शोकं विसृज्य विपत्तिमग्नं उपकारिणां वर्गं शोचंति स्वानाथ्य सनातनं परकीयव्यसनमेव संतापकारकमित्यर्थः ४० शतीति प्रतिक्रियायै विधुरः प्रतिकर्तुमसमर्थः तुमर्थाच्चभाववचनादिति चतुर्थी तस्यार्जुनस्य सपाणिपराम्रष्टुरस्य तत्कालवैमुख्यं पिशुनोपकारात्तस्मात्तूणी

तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयानुतेपे स्वामापदं उज्झ्य विपत्तिमग्नं शोचंति संतो ह्युपकारिवर्गं ४०
प्रतिक्रियायै विधुरः स तस्मात्कृच्छ्रेण विश्लेषमियाय हस्तः परानुबंधात्पिशुनोपकारात्तूणीमुखान्मित्रकुलादिवार्यः ४१ पश्चात्क्रियात्तूणयुगस्य भर्तुर्जज्ञे तदानीमुपकारिणी वा संभावनायाविफलीकृतायां पश्चात्
मुखान्मित्रकुलादार्यसाधुः चूनद्वैइव आर्यः साधुकुलीनयोरिति विश्वः कृच्छ्रेण विश्लेषमियाय गोरादित्यात्मजीवान्नात इषुः ४१ पश्चादिति तदानीं भर्तुः स्वामिनः कर्तरि षष्ठी पश्चात्क्रियापृष्ठतः करणं तूणयुगस्योपकारिणी उपकारिकेव जज्ञे आनात तथाहि संभावनायां योग्यतायां अधरीकृतायां पराक्रमः स्वामिनः पुरो मे आसितव्यमासं स्थितं बहुल ग्रहणाद्भावेक्त्यप्रत्ययः सा हसं भर्तासंभावितस्य भयस्य रेज अनुपकर्तुरनुजीविनः तस्मान्मृत्यमनुचितमित्यर्थः ४२

तमिति त्र्यंबुराक्षिप्तानि आहतानि महेषुजालानि यस्य तं मुनिं तत्त्वविचारमध्ये वादमध्ये उत्तरं निरुत्तरीकृतं विपक्षं प्रतिवादिनं वक्तावादि गुरुभिर्दोषैर्निग्रहस्थानै रिव लोहैर्लोहमयैः शरैर्मर्मसु निस्तुतोद व्यथयामास ४३ जहारेति किंच अस्मान्मुनेः अचिरेण त्री घ्रं ज्वलद्भिर्मणिभिर्द्योतिताः हेम्यः सौवर्ण्यः रेखाः यस्य तत्तथोक्तं वर्म कवचं प्रचंडमरुत् पतंगात्सूर मुक्तकंचुके मुनिर्मेघनिर्मुक्तः सूर्य इवादिदीप इवेति भावः ४४ कथयुग्मेनाह विकोशेति सोऽर्जुनः तनुत्राय तत्र वितनुत्रं वर्म इति अतो

तं त्र्यंबुराक्षिप्तमहेषुजालं लोहैः शरैर्मर्मसु निस्तुतोद। ह्रुनोत्तरं तत्त्वविचारणायां वादीव दोषैर्गुरुभिर्विपक्षं ४३
जहार चास्मादचिरेण वर्म ज्वलन्मणिद्योतितहेमलेखं चंडः पतंगान्मरुदेकनीलं न उज्ज्वलतः खंडमिवांबुदस्य ४४
विकोशनिर्धौततनोर्महासेः फणावतस्त्वचि विच्युतायां प्रतिद्विपावद्धरुषः समक्षं नागस्य वाक्षिप्तमुखच्छदस्य ४५
विबोधितस्य ध्वनिना घनानां हरेरपेतस्य च शैलरंध्रात्। निरस्तधूमस्य च रात्रिवह्नेर्विना तनुत्रेण रुचिं स लेभे ४६

नुपसर्गे कः इति कप्रत्ययः तेन विना विकोशः कोशाउद्धृतः निर्धौतत नुः शाणोल्लीढमूर्तिः ततो विशेषण समासः विकोशनिर्धौततनोर्महासेमहाखड्गस्य तथा त्वचि विच्युतायां सत्यां फणावतस्य मुक्तकंचुकस्याहेश्च प्रतिद्विप आवद्धरुषोवद्धकोपस्य समक्षे प्रतिगजास्याग्रे आक्षिप्तमुखच्छदस्य निरस्तमुखावरणस्य नागस्य गजस्य च ४५ विबोधितस्येति घनानां ध्वनिना जागरितेन विबोतस्य शैलरंध्रात्कुहरादपेतस्य निष्क्रांतस्य हरेः सिंहस्य च तथा निरस्तधूमस्य रात्रिवह्नेश्च रुचिं शोभां भेजे। पतेस्पनी

युग्मं अचिंततायामिति तदानीं कवचपतनसमये महीं गतौ इषुधी निषंगौ अचिंततायामिति नाम अचेतनत्वे पितृदीयरूपे स्वामिव्यसनैर्युक्तौ योग्यौ अकिंचित्करत्वादिति भावः॥ अनूद्भूतां अवाङ्मुखत्वं प्राप्य चेतनया योगं चैतन्यं विप्रलुरिवेत्युत्प्रेक्षा अचेतनत्वे अवाङ्मुखत्वादि चेतनधर्मयोगादिति भावः ४९ स्थितमिति विशुद्धेन निर्मलेन भसीव सत्वे सत्वगुणे स्थितं तपोवीर्यमयेन तपोवीर्याभ्यां गतेन धाम्ना तेजसा युक्तं तमर्जुनमीशा स्वष्टा विश्वकर्मा विवस्वंतमिवाजस्रं शस्त्राभि

युग्मम् अचिंततायामपि नामयुक्तावनूद्भूतां प्राप्य तदीयरूपे। महीं गतौ ताविषुधी तदानीं विवव्रतुश्चेतनयेव योगं ४९

स्थितं विशुद्धेन भसीव सत्वे धाम्ना तपोवीर्यमयेन युक्तं। शस्त्राभिघातैस्तमजस्रमीशा त्वष्टा विवस्वंतमिवोल्लिलेख ४८

संरंभवेगोज्झितवेदनेषु गात्रेषु बाधिर्यमुपागतेषु। बभूव तस्यागणितागतेयो लोहास्तिरस्कार इवात्ममन्युः ४९

ततोनुपूर्वायतवृत्तबाहुः श्रीमान्क्षरल्लोहितदिग्धदेहः। आस्कंधवेगेन विमुक्तनादः क्षितिं विधुन्वन्निव पार्ष्णिघातैः ५०

घातैः शस्त्रकर्षणरूपैर्लिलेख ४८ संरंभेति संरंभवेगेन संभ्रमातिशयेन उज्झितवेदनेषु त्यक्तदुःखेषु गात्रेषु बाधिर्यं स्तैमित्यं उपागतेषु सत्सु अगणितारिपुराधयायेन तस्य मुनेरर्जुनस्यात्ममन्युः स्वकोपो लोहस्य विकारो लोहः कार्ष्ण्यायसः तिरस्क्रियते आच्छाद्यतेनेनेति तिरस्कारः कंचुक इव बभूव रोषवशात्तेन किंचिच्छ्रहारदुःखमज्ञासीदित्यर्थः। क्रोधैकधर्मणां वीराणां किमन्यैर्लोहभारैरित्यर्थः ४९ तत इति ततः अनुपूर्वौ पूर्वं पूर्वमनुगतौ गोपुच्छाकारौ आयतौ दीर्घौ वृत्तौ वर्तुलौ बाहू यस्य सः श्रीमान् शोभावान् क्षरल्लोहितदिग्धदेहः स्रवद्रुधिरलिप्तमात्रः पार्ष्णिघातैः तलाग्रैर्धीपुरि कृतगुल्फो पुमान्पार्ष्णिरभस्तयोरिसमरः

साम्यमिति मघोनः इंद्रस्य अशनिरिव वज्रेण साम्यं गतेन वज्रकलापेन शशांकस्य खंडं शशांकलं तस्येव आकृतिर्यस्य तदुत्क्रमित्यर्थः परदुरूत्तरंच तद्दूदवेति भावः। तेन शशांकखंडाकृति पांडुरेण धनुषा शंभुं विभिस्कः भेत्तुमिच्छुः सन् महानिभो विषाणोनस्तंभमिव जघान ५१ स्ययेणेति स्ययेण प्रनयंती सा चायययष्टिः भवोद्भवेन ईश्वरेण ऊर्जसि परमे ज्योतिःस्थितेन जनुना राजर्षिणा समुद्धृता अनेकमार्गा सिंधुगंगेव आत्मनि संनिदधे सम्यग् अभिहिता अंतर्निर्वापेत्यर्थः ५२

साम्यं गतेनाशनिना मघोनः शशांकलेखाकृतिपांडुरेण। शंभुं विभित्सुर्धनुषा जघान स्तंभं विषाणेन महानिवेभः ५१

रयेण सा संनिदधे पतंती भवोद्भवेनात्मनि चापयष्टिः॥ समुद्धृता सिंधुरनेकमार्गा यथा स्थितेनोजसि जन्हुनेव ५२

विकार्मुकः कर्मसु शोचनीयः परिच्युतौदार्य इवोपचारः। विचिक्षिपे शूलभृता सलीलं स पत्रिभिर्दूरमदूरपातैः ५३

उपारतः कल्याणफलोभिरक्षन्वीरव्रतं पुण्यरणाश्रमस्थः। जपोपवासैरिव संयतात्मा तेपे मुनिस्तैरिषुभिः शिवस्य ५४

विकार्मुक इति विकार्मुकः अत एव परिच्युतौदार्यौदानवर्जितः उपचारः सत्कार इव कर्मसु कृत्येषु शोचनीयः सोर्जुनः शूलभृता समं महायानेगा दप्रहारैः पत्रिभिः दूरं अत्यंतं विचिक्षिपे क्षिप्तः ५३ उपारतेति उपारतः सन्नपि कल्याण फलं अस्त्रलाभरूपं स्वर्गादिकं च यस्य सः वीरव्रतमाहावादेनिवृत्तिरूपं तीव्रं तपश्चाभिरक्षन् पालयन् पुण्यो यो रण एवाश्रमः तत्र तीष्ठतीति पुण्यरणाश्रमस्थः संयतात्मा नियतचित्तः मुनिरर्जुनः अग्रे भूमौ विपदि गते त्र्यस्त्रा ने शरणमित्यर्थः कुतः अयं सायासिद्धः शीकाश्चित्तपस्विनो शिवेषु भिज्ञ पोपवासैरिव तेपे तपः कर्म निर्लिङ्गु ५४

ततइति ततश्चार्पातशूलानंतरंसोर्जुनः अग्रभूमिं विपदिगंतव्यस्थानं तूरणमित्यर्थः उत्तमोसिर्महास्वड्गः सन्महिमादिनासमासः
व्यवसायसिद्धेःसीमानंमवधिसाधकत्वमित्यर्थः उत्तमोसिमहास्वड्ग अन्यैःपरैः अतिदुस्तरं दुरतिक्रमंतेजःश्रियाप्रतापसंपदा
आश्रयहेतुमित्यर्थः उत्तमासिंमहास्वड्गं सन्महिमादिनासमासः साक्षाद्दहंकारं सविग्रहमभिमानमिवाललंबे ५५
शरानिति अनवद्यकर्मा अगर्ह्यकर्मा अवद्यपण्यसादिना निपातः शरान् अवद्यंन् खंडयन् वीरनिस्त्रिंशभर्तास्वड्ग
मुक्तेन साकोशुनाश्चकोंशुसहितेन उर्मिणावारिधिवदीपितः सोर्जुनः प्रविचारमार्गैः गङ्गानंगनिभेदरौश्चित्रंयथातथा
ततोग्रभूमिंव्यवसायसिद्धेःसीमानमन्यैरतिदुस्तरंसः तेजश्रियामाश्रयमुत्तमासिं साक्षादहंकारमिवाललंबे ५५
शरानवद्यन्नवद्यकर्मा चचारचित्रं प्रविचारमार्गैः हस्तेननिःस्त्रिंशभृतातिदीप्तः साकोंशुनावारिधिरूर्मिणेव ५६
यथानिजेवर्त्मनिभातिभामिश्छायामयश्चाप्सुसहस्ररश्मिः तथाभ्रमन्नाशुनभस्स्थलीषुस्पष्टद्विमूर्तिर्ददृशेसभूतैः ५७
शिवप्रणुन्नेनशिलीमुखेनत्सरुप्रदेशादपवर्जितांगः ज्वलन्नसिस्तस्यपपातपाणेर्घनस्यवप्रादिववैद्युतोग्निः ५८
यथेति भाभिरुपलक्षितः सहस्ररश्मिरर्कोयथानिजवर्त्मनिनामसिछायामयःप्रतिबिंबरूपः संनू अप्सुचस्पष्टद्विमूर्तिरागरू
रणस्थलीषुचस्पष्टद्वेभूर्तिर्यस्यसस्पष्टद्विभूतिःसन् सोर्जुनः भ्रानितथाभूतेगणैर्ददृशे यथैकोर्कोनभस्यप्सुचअनेकवद्द
श्यतेतथासोपिदिविभुविचाशुसंचाराघोगपद्यभ्रमादेवैकोप्यनेकरवगणैर्ददृश इत्यर्थः ५७ शिवेति शिवेनप्रणुन्नः क्षि
प्तःतेनशिलीमुखेनत्सरुप्रदेशान्मुष्टिप्रदेशामपवर्जितंकलासरुःखड्गादिमुष्टौस्यादित्यमरः अपवर्जितांगोलूनावयवःअ
सिःखड्गःतस्यार्जुनस्यपाणेः घनस्यमेघस्यवप्रातप्रान्तदेशात् वैद्युतोविद्युत्संबंधीअग्निरिवजज्वालपपात ५८

आक्षिपेति आक्षिप्तान्यपहृतानिचापवरणेषुजालानिधनुर्वर्मबाणसमूहायस्यसः लूनोत्तमासिःछिन्नमहास्वड्गःमृधेरणेमृधमा
स्कंदनंसंख्यमित्यमरः अवधूतोनिरस्तःसोर्जुनः उत्पादितमुद्धानंयस्यसः भूमेःप्रदेशेणभूमिभागइवरिक्तःशून्यःप्रकाशोनिःसंबंध
श्चवभूव ५९ सइति परास्परस्मात्स्थलोःपूर्वाभ्यिोनवभ्योयेनिविकल्पात्तस्मादेवशःखंडनांभगंप्राप्यअमवान्सोर्जुनःभुजद्वितीयो
भुजमात्रसहायःसन्विजेतुमिच्छयाद्रवेभ्यःइतराणितेषांद्रवेतरेषांकठिनानांपयसामिवकरकाणामिवेत्यर्थः अश्मनांसंबंधिनी
परिरुग्णाःपादपाःयस्यास्तांवृष्टिंससर्ज अश्मभिर्जघानेत्यर्थः ५९० नीरंध्रमिति शिलाविताननिघ्नीश्वजालेभूतानामधिपति
आक्षिप्तचापावरणेषुजालश्छिन्नोत्तमासिःसंमृधेवधूतः रिक्तःप्रकाशश्चवभूवभूमेरुत्सादितोद्यानइवप्रदेशः ५९
सखंडनांप्राप्यपरादमर्षवानभुजद्वितीयोपिविजेतुमिच्छया ससर्जवृष्टिंपरिरुग्णपादपांजवेनमेघःपयसामिवाश्मनां ६०
नीरंध्रंपरिगतमितेक्षयंपृषत्कैर्भूतानामधिपतिनाशिलावितानं उच्चायःस्थितिशनभोदिगंतरालंविक्षेपक्षितिरुहजालमिंद्रसूनुः ६१
निःशेषंशकलितवल्कलांगसारैःकुर्वद्भिर्भुवमभितःकषायचित्रां ईशानस्सकुसुमपल्लवैर्नगोस्तैराराधेनयलिमिवरंगलक्ष्याभ्यः ६२
नाशिवेनपृषत्कैर्बाणैःक्षयंगमितेनीतेसतिइंद्रसूनुःउच्चायेणोत्सावेनस्थगितंआच्छादितंनभोदिगामंतरालयेनतन्नीरंध्रसां
द्रंरोहंतीतिरुहाःइगुपधलक्षणःकःप्रत्ययः क्षितौरुहास्तेषांजालविक्षेपमेरयामास ६१ निःशेषंगमितवतीनिप्रामोदिकःपाठः ६१
निःशेषमिति ईशानःशिवःशानदानिःशेषंयथातथाशकलितानिवल्कलानिसारःअंगानिशाखाःसारोमज्जाचयेषांतैः भुवमभितः
कषायोरागःस्वरसेनरंजनमितियावत् रागेकाथेकषायोस्त्रीतियेजयंतीतेनचित्रांचित्रवर्णांकुर्वद्भिःसकुसुमपल्लवैः
स्तेर्नगैर्वृक्षैःरंगोरणरंगोयादेवतास्ताभ्योबलिंपूजामिवातेने ६२

उन्मज्जन्निति गांडीवी अर्जुनः उन्मज्जन् उत्तरन् मकरो जलग्राहविशेषः अमरापगायाः इव बाणनद्याः बाणप्रवाहात् वेगेनातिप्रमुखम
भिमुखमेत्यागत्य कनकशिलानिभं कनकग्रहणं काठिन्यातिशयार्थं विषमविलोचनस्य त्र्यंबकस्य वक्षो हृदयं भुजाभ्यामाजघ्ने प्र
हतवान् अत्रात्मनेपदं विचार्यं आङो यमहनः इत्यस्याकर्मकाधिकारात् नापि स्वांगकर्मकात्वेति वक्तव्यत्वात् अतो नित्यादानवरणा
त् स्वयुद्धायमन्ने दुस्तेन निपुणोऽपि मल्लः सत्यं वक्षस्ताडनमाचरति किंपुनस्त्वभुजास्फालनं किंच अनंतरं वक्ष्यमाण भवत्कृतकाचि
नय सहनप्रतिघाताविरोधाच्च वक्षस्येवेत्यर्थः च यस्तु व्यवधानान् पूर्वं विदूषितः तस्मात् व्याकरणान्तरात् द्रष्टव्यं ६३

उन्मज्जन्मकर इवामरापगायाः वेगेन प्रतिमुखमेत्य बाणनद्याः। गांडीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषम
विलोचनस्य वक्षः ६३ अभिलषत उपायं विक्रमं कीर्तिलक्ष्म्योरसुकरमरिसैन्यैरंकमभ्यागतस्य जनक इव शिशुत्वे सु
प्रियस्यैकसूनोरविनयमपि सेहे पांडवस्य स्मरारिः ६४ इति श्रीकिरातार्जुनीये महाकाव्ये भारवीकृतौ श्र्यंके सप्तदशः

अभिलषत इति कीर्तिलक्ष्म्योरुपायं साधनभूतं अरिसैन्यैरसुगमं दुरासदं विक्रममभिलषतः स्वानुपक्षे यत्किंचिन्महत्फलं प्रार्थ
यमानस्येत्यर्थः अत एव अंकमंकं अभ्यागतस्य उत्संगं समारूढस्य च पांडवस्य अविनयं स्मरारिः अनेकशः किंवा सत्यमेव सहन
कारणमुच्यते शिशुत्वे शैशवे प्रियस्य प्रेमास्पदस्य कुतः एक एव सूनुः तस्यैकसूनोः जनक इव सेहे ६४ इति श्रीमहो
पाध्यायकोलाचलमल्लिनाथसूरिविरचितायां घंटापथसमाख्यायां सप्तदशः सर्गः १८

क्षितिति॥ परस्परेऽन्योन्यं कर्मव्यतीहारे सर्वनाम्नो द्वे भवत इति वक्तव्यात् परस्परशब्दस्य द्विर्भावः समासव
च्च बहुलं यदा समासवत् प्रथमैकवचनं वा अन्योन्यशब्देऽप्येवं यथा माघे अन्योन्येषां पुष्करैरामृशानमिति
अदृष्टाः परस्परं ये ते तथोक्ताः क्षितौ नभसि स्वर्लोके च निवसन्तीति एते तथोक्ताः भूर्भुवः स्वर्लोकनि

॥क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः॥
॥प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शंभुना॥३॥

निवासिभिरित्यर्थः कृतनिकेतं कृतास्पदं अत एव शंभुना विभुतां स्वसामर्थ्यं प्रथयितुं अभिनिर्मितं
जगतां प्रतिनिधिं प्रतिकृतिमिव सृष्टमित्युत्प्रेक्षा प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमानं स्यादित्यमरः॥
त्रैलोक्यश्लाघ्योऽयमपरिच्छेद्यश्चेति भावः॥३॥ श्रीरामजयराम जयजयराम जयजयराम॥५५

अभ्यायतः संततधूमधूम्रं

॥श्रीगणेशायनमः

॥हेपोथीकिरातपंचमसर्गटीकाहोय॥

हेपोथी

॥हेपोथीकीरातप्रथमस॥

आनंदमानंदवनेवसंतयानंदकंदंदलितपाप

[OrderDescription]
,CREATED=11.09.19 16:44
,TRANSFERRED=2019/09/11 at 17:03:38
,PAGES=87
,TYPE=STD
,NAME=S0001766
,Book Name=M-698-KIRANAJUNIYAMM-698-KIRANAJUNIYAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF

FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF

FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,